# Shri Shiva Mahapuranam 22 Rudra Samhita SatikhandaH

# શ્રીશિવમહાપુરાણમ્ ૨૨ રુદ્રસંહિતાયાં સતીખણ્ડઃ

## Document Information

Text title : Shivapuranam 2.2 rudrasaMhitA satIkhaNDaH

File name : shivapurANam2rudrasaMhitA2satIkhaNDaH.itx

Category : shiva, purANa, shivapurANa

Location : doc_purana

Proofread by : Revathy Rajaraman and team members

Latest update : January 23, 2026

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2026

*sanskritdocuments.org*

# શ્રીશિવમહાપુરાણમ્ ૨૨ રુદ્રસંહિતાયાં સતીખણ્ડઃ

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૧. પ્રથમોઽધ્યાયઃ । સતીસઙ્ક્ષેપચરિત્રવર્ણનમ્ ।

સતીસઙ્ક્ષેપચરિત્રવર્ણનં નારદ ઉવાચ ।
વિધે સર્વં વિજાનાસિ કૃપયા શઙ્કરસ્ય ચ ।
ત્વયાદ્ભુતા હિ કથિતાઃ કથા મે શિવયોઃ શુભાઃ ॥ ૧॥

ત્વન્મુખામ્ભોજસંવૃત્તાં શ્રુત્વા શિવકથાં પરામ્ ।
અતૃપ્તો હિ પુનસ્તાં વૈ શ્રોતુમિચ્છામ્યહં પ્રભો ॥ ૨॥

પૂર્ણાંશઃ શઙ્કરસ્યૈવ યો રુદ્રો વર્ણિતઃ પુરા ।
વિધે ત્વયા મહેશાનઃ કૈલાસનિલયો વશી ॥ ૩॥

સ યોગી સર્વવિષ્ણ્વાદિસુરસેવ્યઃ સતાં ગતિઃ ।
નિર્દ્વન્દ્વઃ ક્રીડતિ સદા નિર્વિકારો મહાપ્રભુઃ ॥ ૪॥

સોઽભૂત્પુનર્ગૃહસ્થશ્ચ વિવાહ્ય પરમાં સ્ત્રિયમ્ ।
હરિપ્રાર્થનયા પ્રીત્યા મઙ્ગલાં સુતપસ્વિનીમ્ ॥ ૫॥

પ્રથમં દક્ષપુત્રી સા પશ્ચાત્સા પર્વતાત્મજા ।
કથમેકશરીરેણ દ્વયોરપ્યાત્મજા મતા ॥ ૬॥

કથં સતી પાર્વતી સા પુનઃ શિવમુપાગતા ।
એતત્સર્વં તથાન્યચ્ચ બ્રહ્મન્ ગદિતુમર્હસિ ॥ ૭॥

સૂત ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા સુરર્ષેઃ શઙ્કરાત્મનઃ ।

પ્રસન્નમાનસો ભૂત્વા બ્રહ્મા વચનમબ્રવીત્ ॥ ૮॥

બ્રહ્મોવાચ ।
શૃણુ તાત મુનિશ્રેષ્ઠ કથયામિ કથાં શુભામ્ ।
યાં શ્રુત્વા સફલં જન્મ ભવિષ્યતિ ન સંશયઃ ॥ ૯॥

પુરાહં સ્વસુતાં દૃષ્ટ્વા સન્ધ્યાહ્વાં તનયૈઃ સહ ।
અભવં વિકૃતસ્તાત કામબાણપ્રપીડિતઃ ॥ ૧૦॥

ધર્મઃ સ્મૃતસ્તદા રુદ્રો મહાયોગી પરઃ પ્રભુઃ ।
ધિક્કૃત્ય માં સુતૈસ્તાત સ્વસ્થાનં ગતવાનયમ્ ॥ ૧૧॥

યન્માયામોહિતશ્ચાહં વેદવક્તા ચ મૂઢધીઃ ।
તેનાકાર્ષં સહાકાર્યં પરમેશેન શમ્ભુના ॥ ૧૨॥

તદીર્ષયાહમાકાર્ષં બહૂપાયાન્સુતૈઃ સહ ।
કર્તું તન્મોહનં મૂઢઃ શિવમાયાવિમોહિતઃ ॥ ૧૩॥

અભવંસ્તેઽથ વૈ સર્વે તસ્મિન્ શમ્ભૌ પરપ્રભૌ ।
ઉપાયા નિષ્ફલાસ્તેષાં મમ ચાપિ મુનીશ્વર ॥ ૧૪॥

તદાસ્મરં રમેશાનં વ્યર્થોપાયઃ સુતૈઃ સહ ।
અબોધયત્સ આગત્ય શિવભક્તિરતઃ સુધીઃ ॥ ૧૫॥

પ્રબોધિતો રમેશેન શિવતત્ત્વપ્રદર્શિના ।
તદીર્ષામત્યજં સોઽહં તં હઠં ન વિમોહિતઃ ॥ ૧૬॥

શક્તિં સંસેવ્ય તત્પ્રીત્યોત્પાદયામાસ તાં તદા ।
દક્ષાદસિક્ન્યાં વીરિણ્યાં સ્વપુત્રાદ્ધરમોહને ॥ ૧૭॥

સોમા ભૂત્વા દક્ષસુતા તપઃ કૃત્વા તુ દુઃસહમ્ ।
રુદ્રપત્ન્યભવદ્ભક્ત્યા સ્વભક્તહિતકારિણી ॥ ૧૮॥

સોમો રુદ્રો ગૃહી ભૂત્વાકાર્ષીલ્લીલાં પરાં પ્રભુઃ ।
મોહયિત્વાથ માં તત્ર સ્વવિવાહેઽવિકારધીઃ ॥ ૧૯॥

વિવાહ્ય તાં સ આગત્ય સ્વગિરૌ સૂતિકૃત્તયા ।
રેમે બહુવિમોહો હિ સ્વતન્ત્રઃ સ્વાત્તવિગ્રહઃ ॥ ૨૦॥

તયા વિહરતસ્તસ્ય વ્યતીયાય મહાન્ મુને ।
કાલઃ સુખકરઃ શમ્ભોર્નિર્વિકારસ્ય સદ્વ્રતેઃ ॥ ૨૧॥

તતો રુદ્રસ્ય દક્ષેણ સ્પર્ધા જાતા નિજેચ્છયા ।
મહામૂઢસ્ય તન્માયામોહિતસ્ય સુગર્વિણઃ ॥ ૨૨॥

તત્પ્રભાવાદ્ધરં દક્ષો મહાગર્વી વિમૂઢધીઃ ।
મહાશાન્તં નિર્વિકારં નિનિન્દ બહુમોહિતઃ ॥ ૨૩॥

તતો દક્ષઃ સ્વયં યજ્ઞં કૃતવાન્ગર્વિતોઽહરમ્ ।
સર્વાનાહૂય દેવાદીન્ વિષ્ણું માં ચાખિલાધિપઃ ॥ ૨૪॥

નાજુહાવ તથાભૂતો રુદ્રં રોષસમાકુલઃ ।
તથા તત્ર સતીં નામ્નીં સ્વપુત્રીં વિધિમોહિતઃ ॥ ૨૫॥

યદા નાકારિતા પિત્રા માયામોહિત ચેતસા ।
લીલાં ચકાર સુજ્ઞાના મહાસાધ્વી શિવા તદા ॥ ૨૬॥

અથાગતા સતી તત્ર શિવાજ્ઞામધિગમ્ય સા ।
અનાહૂતાપિ દક્ષેણ ગર્વિણા સ્વપિતુર્ગૃહમ્ ॥ ૨૭॥

વિલોક્ય રુદ્રભાગં નો પ્રાપ્યાવજ્ઞાં ચ તાતતઃ ।
વિનિન્દ્ય તત્ર તાન્સર્વાન્દેહત્યાગમથાકરોત્ ॥ ૨૮॥

તચ્છ્રુત્વા દેવદેવેશઃ ક્રોધં કૃત્વા તુ દુઃસહમ્ ।
જટામુત્કૃત્ય મહતીં વીરભદ્રમજીજનત્ ॥ ૨૯॥

સગણં તં સમુત્પાદ્ય કિં કુર્યામિતિ વાદિનમ્ ।
સર્વાપમાનપૂર્વં હિ યજ્ઞધ્વંસં દિદેશ હ ॥ ૩૦॥

ગણાધીશસ્તદાજ્ઞાં સ પ્રાપ્ય બહુબલાન્વિતઃ ।
ગતોઽરં તત્ર સહસા મહાબલપરાક્રમઃ ॥ ૩૧॥

મહોપદ્રવમાચેરુર્ગણાસ્તત્ર તદાજ્ઞયા ।
સર્વાન્સ દણ્ડયામાસ ન કશ્ચિદવશેષિતઃ ॥ ૩૨॥

વિષ્ણું સઞ્જિત્ય યત્નેન સામરં ગણસત્તમઃ ।
ચક્રે દક્ષશિરશ્છેદં તચ્છિરોઽગ્નૌ જુહાવ ચ ॥ ૩૩॥

યજ્ઞધ્વંસં ચકારાશુ મહોપદ્રવમાચરન્ ।
તતો જગામ સ્વગિરિં પ્રણનામ પ્રભું શિવમ્ ॥ ૩૪॥

યજ્ઞધ્વંસોઽભવચ્ચેત્થં દેવલોકે હિ પશ્યતિ ।

રુદ્રસ્યાનુચરૈસ્તત્ર વીરભદ્રાદિભિઃ કૃતઃ ॥ ૩૫॥

મુને નીતિરિયં જ્ઞેયા શ્રુતિસ્મૃતિષુ સમ્મતા ।
રુદ્રે રુષ્ટે કથં લોકે સુખં ભવતિ સુપ્રભૌ ॥ ૩૬॥

તતો રુદ્રઃ પ્રસન્નોઽભૂત્સ્તુતિમાકર્ણ્ય તાં પરામ્ ।
વિજ્ઞપ્તિં સફલાં ચક્રે સર્વેષાં દીનવત્સલઃ ॥ ૩૭॥

પૂર્વવચ્ચ કૃતં તેન કૃપાલુત્વં મહાત્મના ।
શઙ્કરેણ મહેશેન નાનાલીલાવિહારિણા ॥ ૩૮॥

જીવિતસ્તેન દક્ષો હિ તત્ર સર્વે હિ સત્કૃતાઃ ।
પુનઃ સ કારિતો યજ્ઞઃ શઙ્કરેણ કૃપાલુના ॥ ૩૯॥

રુદ્રશ્ચ પૂજિતસ્તત્ર સર્વૈર્દેવૈર્વિશેષતઃ ।
યજ્ઞે વિષ્ણ્વાદિભિર્ભક્ત્યા સુપ્રસન્નાત્મભિર્મુને ॥ ૪૦॥

સતીદેહસમુત્પન્ના જ્વાલા લોકસુખાવહા ।
પતિતા પર્વતે તત્ર પૂજિતા સુખદાયિની ॥ ૪૧॥

જ્વાલામુખીતિ વિખ્યાતા સર્વકામફલપ્રદા ।
બભૂવ પરમા દેવી દર્શનાત્પાપહારિણી ॥ ૪૨॥

ઇદાનીં પૂજ્યતે લોકે સર્વકામફલાપ્તયે ।
સંવિધાભિરનેકાભિર્મહોત્સવપરઃસરમ્ ॥ ૪૩॥

તતશ્ચ સા સતી દેવી હિમાલયસુતાભવત્ ।
તસ્યાશ્ચ પાર્વતી નામ પ્રસિદ્ધમભવત્તદા ॥ ૪૪॥

સા પુનશ્ચ સમારાધ્ય તપસા કઠિનેન વૈ ।
તમેવ પરમેશાનં ભર્તારં સમુપાશ્રિતા ॥ ૪૫॥

એતત્સર્વં સમાખ્યાતં યત્પૃષ્ટોઽહં મુનીશ્વર ।
યચ્છ્રુત્વા સર્વપાપેભ્યો મુચ્યતે નાત્ર સંશયઃ ॥ ૪૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે સતીસઙ્ક્ષેપચરિત્રવર્ણનં નામ પ્રથમોઽધ્યાયઃ ॥ ૨.૨.૧॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૨. દ્વિતીયોઽધ્યાયઃ । કામપ્રાદુર્ભાવઃ ।

સૂત ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય નૈમિષારણ્યવાસિનઃ ।
પપ્રચ્છ ચ મુનિશ્રેષ્ઠઃ કથાં પાપપ્રણાશિનીમ્ ॥ ૧॥

નારદ ઉવાચ ।
વિધે વિધે મહાભાગ કથાં શમ્ભોઃ શુભાવહામ્ ।
શ‍ૃણ્વન્ ભવન્મુખામ્ભોજાન્ન તૃપ્તોઽસ્મિ મહાપ્રભો ॥ ૨॥

અતઃ કથય તત્સર્વં શિવસ્ય ચરિતં શુભમ્ ।
સતીકીર્ત્યન્વિતં દિવ્યં શ્રોતુમિચ્છામિ વિશ્વકૃત્ ॥ ૩॥

સતી હિ કથમુત્પન્ના દક્ષદારેષુ શોભના ।
કથં હરો મનશ્ચક્રે દારાહરણકર્મણિ ॥ ૪॥

કથં વા દક્ષકોપેન ત્યક્તદેહા સતી પુરા ।
હિમવત્તનયા જાતા ભૂયો વાકાશમાગતા ॥ ૫॥

પાર્વત્યાશ્ચ તપોઽત્યુગ્રં વિવાહશ્ચ કથં ત્વભૂત્ ।
કથમર્ધશરીરસ્થા બભૂવ સ્મરનાશિનઃ ॥ ૬॥

એતત્સર્વં સમાચક્ષ્વ વિસ્તરેણ મહામતે ।
નાન્યોઽસ્તિ સંશયચ્છેત્તા ત્વત્સમો ન ભવિષ્યતિ ॥ ૭॥

બ્રહ્મોવાચ ।
શ‍ૃણુ ત્વં ચ મુને સર્વં સતીશિવયશઃ શુભમ્ ।
પાવનં પરમં દિવ્યં ગુહ્યાદ્ ગુહ્યતમં પરમ્ ॥ ૮॥

એતચ્છમ્ભુઃ પુરોવાચ ભક્તવર્યાય વિષ્ણવે ।
પૃષ્ટસ્તેન મહાભક્ત્યા પરોપકૃતયે મુને ॥ ૯॥

તતઃ સોઽપિ મયા પૃષ્ટો વિષ્ણુઃ શૈવવરઃ સુધીઃ ।
પ્રીત્યા મહ્યં સમાચખ્યૌ વિસ્તરાન્મુનિસત્તમ ॥ ૧૦॥

અહં તત્કથયિષ્યામિ કથામેતાં પુરાતનીમ્ ।
શિવાશિવયશોયુક્તાં સર્વકામફલપ્રદામ્ ॥ ૧૧॥

પુરા યદા શિવો દેવો નિર્ગુણો નિર્વિકલ્પકઃ ।
અરૂપઃ શક્તિરહિતશ્ચિન્માત્રઃ સદસત્પરઃ ॥ ૧૨॥

અભવત્સગુણઃ સોઽપિ દ્વિરૂપઃ શક્તિમાન્પ્રભુઃ ।
સોમો દિવ્યાકૃતિર્વિપ્ર નિર્વિકારી પરાત્પરઃ ॥ ૧૩॥

તસ્ય વામાઙ્ગજો વિષ્ણુર્બ્રહ્માહં દક્ષિણાઙ્ગજઃ ।
રુદ્રો હૃદયતો જાતોઽભવચ્ચ મુનિસત્તમ ॥ ૧૪॥

સૃષ્ટિકર્તાભવં બ્રહ્મા વિષ્ણુઃ પાલનકારકઃ ।
લયકર્તા સ્વયં રુદ્રસ્ત્રિધાભૂતઃ સદાશિવઃ ॥ ૧૫॥

તમેવાહં સમારાધ્ય બ્રહ્મા લોકપિતામહઃ ।
પ્રજાઃ સસર્જ સર્વાસ્તાઃ સુરાસુરનરાદિકાઃ ॥ ૧૬॥

સૃષ્ટ્વા પ્રજાપતીન્ દક્ષપ્રમુખાન્સુરસત્તમાન્ ।
અમન્યં સુપ્રસન્નોઽહં નિજં સર્વમહોન્નતમ્ ॥ ૧૭॥

મરીચિમત્રિં પુલહં પુલસ્ત્યાઙ્ગિરસૌ ક્રતુમ્ ।
વસિષ્ઠં નારદં દક્ષં ભૃગું ચેતિ મહાપ્રભૂન્ ॥ ૧૬॥

બ્રહ્માહં માનસાન્પુત્રાનસર્જં ચ યદા મુને ।
તદા મન્મનસો જાતા ચારુરૂપા વરાઙ્ગના ॥ ૧૯॥

નામ્ના સન્ધ્યા દિવાક્ષાન્તા સાયં સન્ધ્યા જપન્તિકા ।
અતીવ સુન્દરી સુભ્રૂર્મુનિચેતોવિમોહિની ॥ ૨૦॥

ન તાદૃશી દેવલોકે ન મર્ત્યે ન રસાતલે ।
કાલત્રયેઽપિ વૈ નારી સમ્પૂર્ણગુણશાલિની ॥ ૨૧॥

દૃષ્ટ્વાહં તાં સમુત્થાય ચિન્તયન્ હૃદિ હૃદ્ગતામ્ ।
દક્ષાદયશ્ચ સ્રષ્ટારો મરીચ્યાદ્યાશ્ચ મત્સુતાઃ ॥ ૨૨॥

એવં ચિન્તયતો મે હિ બ્રહ્મણો મુનિસત્તમ ।
માનસઃ પુરુષો મઞ્જુરાવિર્ભૂતો મહાદ્ભુતઃ ॥ ૨૩॥

કાઞ્ચનીકૃતજાતાભઃ પીનોરસ્કઃ સુનાસિકઃ ।
સુવૃત્તોરુકટીજઙ્ઘો નીલવેલિતકેસરઃ ॥ ૨૪॥

લગ્નભ્રૂયુગલો લોલઃ પૂર્ણચન્દ્રનિભાનનઃ ।
કપાટાયતસદ્વક્ષો રોમરાજીવિરાજિતઃ ॥ ૨૫॥

અભ્રમાતઙ્ગકાકારઃ પીનો નીલસુવાસકઃ ।
આરક્તપાણિનયનમુખપાદકરોદ્ભવઃ ॥ ૨૬॥

ક્ષીણમધ્યશ્ચારુદન્તઃ પ્રમત્તગજગન્ધનઃ ।
પ્રફુલ્લપદ્મપત્રાક્ષઃ કેસરઘ્રાણતર્પણઃ ॥ ૨૭॥

કમ્બુગ્રીવો મીનકેતુઃ પ્રાંશુર્મકરવાહનઃ ।
પઞ્ચપુષ્પાયુધો વેગી પુષ્પકોદણ્ડમણ્ડિતઃ ॥ ૨૮॥

કાન્તઃ કટાક્ષપાતેન ભ્રામયન્નયનદ્વયમ્ ।
સુગન્ધિમારુતો તાત શ‍ૃઙ્ગારરસસેવિતઃ ॥ ૨૯॥

તં વીક્ષ્ય પુરુષં સર્વે દક્ષાદ્યા મત્સુતાશ્ચ તે ।
ઔત્સુક્યં પરમં જગ્મુર્વિસ્મયાવિષ્ટમાનસાઃ ॥ ૩૦॥

અભવદ્વિકૃતં તેષાં મત્સુતાનાં મનો દ્રુતમ્ ।
ધૈર્યં નૈવાલભત્તાત કામાકુલિતચેતસામ્ ॥ ૩૧॥

માં સોઽપિ વેધસં વીક્ષ્ય સ્રષ્ટારં જગતાં પતિમ્ ।
પ્રણમ્ય પુરુષઃ પ્રાહ વિનયાનતકન્ધરઃ ॥ ૩૨॥

પુરુષ ઉવાચ ।
કિં કરિષ્યામ્યહં કર્મ બ્રહ્મંસ્તત્ર નિયોજય ।
માન્યોઽદ્ય પુરુષો યસ્માદુચિતઃ શોભિતો વિધે ॥ ૩૩॥

અભિમાનં ચ યોગ્યં ચ સ્થાનં પત્ની ચ યા મમ ।
તન્મે વદ ત્રિલોકેશ ત્વં સ્રષ્ટા જગતાં પતિઃ ॥ ૩૪॥

બ્રહ્મોવાચ ।
એવં તસ્ય વચઃ શ્રુત્વા પુરુષસ્ય મહાત્મનઃ ।
ક્ષણં ન કિઞ્ચિત્ પ્રોવાચ સ સ્રષ્ટા ચાતિવિસ્મિતઃ ॥ ૩૫॥

અતો મનઃ સુસંયમ્ય સમ્યગુત્સૃજ્ય વિસ્મયમ્ ।
અવોચત્પુરુષં બ્રહ્મા તત્કામં ચ સમાવહન્ ॥ ૩૬॥

બ્રહ્મોવાચ ।
અનેન ત્વં સ્વરૂપેણ પુષ્પબાણૈશ્ચ પઞ્ચભિઃ ।
મોહયન્ પુરુષાન્ સ્ત્રીંશ્ચ કુરુ સૃષ્ટિં સનાતનીમ્ ॥ ૩૭॥

અસ્મિઞ્જીવાશ્ચ દેવાદ્યાસ્ત્રૈલોક્યે સચરાચરે ।
એતે સર્વે ભવિષ્યન્તિ ન ક્ષમાસ્તવ લઙ્ઘને ॥ ૩૮॥

અહં વા વાસુદેવો વા સ્થાણુર્વા પુરુષોત્તમ ।
ભવિષ્યામસ્તવ વશે કિમન્યે પ્રાણધારકાઃ ॥ ૩૯॥

પ્રચ્છન્નરૂપો જન્તૂનાં પ્રવિશન્ હૃદયં સદા ।
સુખહેતુઃ સ્વયં ભૂત્વા સૃષ્ટિં કુરુ સનાતનીમ્ ॥ ૪૦॥

ત્વત્પુષ્પબાણસ્ય સદા સુખલક્ષ્યં મનોઽદ્ભુતમ્ ।
સર્વેષાં પ્રાણિનાં નિત્યં સદા મદકરો ભવાન્ ॥ ૪૧॥

ઇતિ તે કર્મ કથિતં સૃષ્ટિપ્રાવર્તકં પુનઃ ।
નામાન્યેતે વદિષ્યન્તિ સુતા મે તવ તત્ત્વતઃ ॥ ૪૨॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વાહં સુરશ્રેષ્ઠ સ્વસુતાનાં મુખાનિ ચ ।
આલોક્ય સ્વાસને પાદ્મે પ્રોપવિષ્ટોઽભવં ક્ષણમ્ ॥ ૪૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે કામપ્રાદુર્ભાવો નામ દ્વિતીયોઽધ્યાયઃ ॥ ૨.૨.૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૩. તૃતીયોઽધ્યાયઃ । કામશાપાનુગ્રહઃ ।

બ્રહ્મોવાચ ।
તતસ્તે મુનયઃ સર્વે મદભિપ્રાયવેદિનઃ ।
ચક્રુસ્તદુચિતં નામ મરીચિપ્રમુખાઃ સુતાઃ ॥ ૧॥

મુખાવલોકનાદેવ જ્ઞાત્વા વૃત્તાન્તમન્યતઃ ।
દક્ષાદયશ્ચ સ્રષ્ટારઃ સ્થાનં પત્નીં ચ તે દદુઃ ॥ ૨॥

તતો નિશ્ચિત્ય નામાનિ મરીચિપ્રમુખા દ્વિજાઃ ।
ઊચુઃ સઙ્ગતમેતસ્મૈ પુરુષાય મમાત્મજાઃ ॥ ૩॥

ઋષય ઊચુઃ ।
યસ્માત્પ્રમથસે તત્ત્વં જાતોઽસ્માકં યથા વિધેઃ ।
તસ્માન્મન્મથનામા ત્વં લોકે ખ્યાતો ભવિષ્યસિ ॥ ૪॥

જગત્સુ કામરૂપસ્ત્વં ત્વત્સમો ન હિ વિદ્યતે ।
અતસ્ત્વં કામનામાપિ ખ્યાતો ભવ મનોભવ ॥ ૫॥

મદનાન્મદનાખ્યસ્ત્વં જાતો દર્પાત્સદર્પકઃ ।
તસ્માત્કન્દર્પનામાપિ લોકે ખ્યાતો ભવિષ્યસિ ॥ ૬॥

ત્વત્સમં સર્વદેવાનાં યદ્વીર્યં ન ભવિષ્યતિ ।
તતઃ સ્થાનાનિ સર્વાણિ સર્વવ્યાપી ભવાંસ્તતઃ ॥ ૭॥

દક્ષોઽયં ભવતઃ પત્નીં સ્વયં દાસ્યતિ કામિનીમ્ ।
આદ્યઃ પ્રજાપતિર્યો હિ યથેષ્ટં પુરુષોત્તમઃ ॥ ૮॥

એષા ચ કન્યકા ચારુરૂપા બ્રહ્મમનોભવા ।
સન્ધ્યા નામ્નેતિ વિખ્યાતા સર્વલોકે ભવિષ્યતિ ॥ ૯॥

બ્રહ્મણો ધ્યાયતો યસ્માત્સમ્યગ્જાતા વરાઙ્ગના ।
અતઃ સન્ધ્યેતિ વિખ્યાતા ક્રાન્તાભા તુલ્યમલ્લિકા ॥ ૧૦॥

બ્રહ્મોવાચ ।
કૌસુમાનિ તથાસ્ત્રાણિ પઞ્ચાદાય મનોભવઃ ।
પ્રચ્છન્નરૂપી તત્રૈવ ચિન્તયામાસ નિશ્ચયમ્ ॥ ૧૧॥

હર્ષણં રોચનાખ્યં ચ મોહનં શોષણં તથા ।
મારણં ચેતિ પ્રોક્તાનિ મુનેર્મોહકરાણ્યપિ ॥ ૧૨॥

બ્રહ્મણા મમ યત્કર્મ સમુદ્દિષ્ટં સનાતનમ્ ।
તદિહૈવ કરિષ્યામિ મુનીનાં સન્નિધૌ વિધેઃ ॥ ૧૩॥

તિષ્ઠન્તિ મુનયશ્ચાત્ર સ્વયં ચાપિ પ્રજાપતિઃ ।
એતેષાં સાક્ષિભૂતં મે ભવિષ્યત્યદ્ય નિશ્ચયમ્ ॥ ૧૪॥

સન્ધ્યાપિ બ્રહ્મણા પ્રોક્તા ચેદાનીં પ્રેષયેદ્વચઃ ।
ઇહ કર્મ પરીક્ષ્યૈવ પ્રયોગાન્મોહયામ્યહમ્ ॥ ૧૫॥

બ્રહ્મોવાચ ।
ઇતિ સઞ્ચિન્ત્ય મનસા નિશ્ચિત્ય ચ મનોભવઃ ।

પુષ્પજં પુષ્પજાતૈશ્ચ યોજયામાસ માર્ગણૈઃ ॥ ૧૬॥

આલીઢસ્થાનમાસાદ્ય ધનુરાકૃષ્ય યત્નતઃ ।
ચકાર વલયાકારં કામો ધન્વિવરસ્તદા ॥ ૧૭॥

સંહિતે તેન કોદણ્ડે મારુતાશ્ચ સુગન્ધયઃ ।
વવુસ્તત્ર મુનિશ્રેષ્ઠ સમ્યગાહ્લાદકારિણઃ ॥ ૧૮॥

તતસ્તાનપિ ધાત્રાદીન્ સર્વાનેવ ચ માનસાન્ ।
પૃથક્ પુષ્પશરૈસ્તીક્ષ્ણૈર્મોહયામાસ મોહનઃ ॥ ૧૯॥

તતસ્તે મુનયઃ સર્વે મોહિતાશ્ચાપ્યહં મુને ।
સંહિતો મનસા કિઞ્ચિદ્વિકારં પ્રાપુરાદિતઃ ॥ ૨૦॥

સન્ધ્યાં સર્વે નિરીક્ષન્તઃ સવિકારં મુહુર્મુહુઃ ।
આસન્ પ્રવૃદ્ધમદનાઃ સ્ત્રી યસ્માન્મદનૈધિની ॥ ૨૧॥

તતઃ સર્વાન્સ મદનો મોહયિત્વા પુનઃ પુનઃ ।
યથેન્દ્રિયવિકારં તે પ્રાપુસ્તાનકરોત્તથા ॥ ૨૨॥

ઉદીરિતેન્દ્રિયો ધાતા વીક્ષ્યાહં સ યદા ચ તામ્ ।
તદૈવ ચોનપઞ્ચાશદ્ભાવા જાતાઃ શરીરતઃ ॥ ૨૩॥

સાપિ તૈર્વીક્ષ્યમાણાથ કન્દર્પશરપાતનાત્ ।
ચક્રે મુહુર્મુહુર્ભાવાન્ કટાક્ષાવરણાદિકાન્ ॥ ૨૪॥

નિસર્ગસુન્દરી સન્ધ્યા તાન્ભાવાન્ માનસોદ્ભવાન્ ।
કુર્વન્ત્યતિતરાં રેજે સ્વર્ણદીવ તનૂર્મિભિઃ ॥ ૨૫॥

અથ ભાવયુતાં સન્ધ્યાં વીક્ષ્યાકાર્ષં પ્રજાપતિઃ ।
ધર્માભિપૂરિતતનુરભિલાષમહં મુને ॥ ૨૬॥

તતસ્તે મુનયઃ સર્વે મરીચ્યત્રિમુખા અપિ ।
દક્ષાદ્યાશ્ચ દ્વિજશ્રેષ્ઠ પ્રાપુર્વૈકારિકેન્દ્રિયમ્ ॥ ૨૭॥

દૃષ્ટ્વા તથાવિધાન્ દક્ષમરીચિપ્રમુખાંશ્ચ મામ્ ।
સન્ધ્યાં ચ કર્મણિ નિજે શ્રદ્દધે મદનસ્તદા ॥ ૨૮॥

યદિદં બ્રહ્મણા કર્મ મમોદ્દિષ્ટં મયાપિ તત્ ।
કર્તું શક્યમિતિ હ્યદ્ધા ભાવિતં સ્વભુવા તદા ॥ ૨૯॥

ઇત્થં પાપગતિં વીક્ષ્ય ભ્રાતૃણાં ચ પિતુસ્તથા ।
ધર્મઃ સસ્માર શમ્ભું વૈ તદા ધર્માવનં પ્રભુમ્ ॥ ૩૦॥

સંસ્મરન્મનસા ધર્મઃ શઙ્કરં ધર્મપાલકમ્ ।
તુષ્ટાવ વિવિધૈર્વાક્યૈર્દીનો ભૂત્વાજસમ્ભવઃ ॥ ૩૧॥

ધર્મ ઉવાચ ।
દેવદેવ મહાદેવ ધર્મપાલ નમોઽસ્તુ તે ।
સૃષ્ટિસ્થિતિવિનાશાનાં કર્તા શમ્ભો ત્વમેવ હિ ॥ ૩૨॥

સૃષ્ટૌ બ્રહ્મા સ્થિતૌ વિષ્ણુઃ પ્રલયે હરરૂપધૃક્ ।
રજઃસત્ત્વતમોભિશ્ચ ત્રિગુણૈરગુણઃ પ્રભો ॥ ૩૩॥

નિસ્ત્રૈગુણ્યઃ શિવઃ સાક્ષાત્તુર્યશ્ચ પ્રકૃતેઃ પરઃ ।
નિર્ગુણો નિર્વિકારી ત્વં નાનાલીલાવિશારદઃ ॥ ૩૪॥

રક્ષ રક્ષ મહાદેવ પાપાન્માં દુસ્તરાદિતઃ ।
મત્પિતાયં તથા ચેમે ભ્રાતરઃ પાપબુદ્ધયઃ ॥ ૩૫॥

બ્રહ્મોવાચ ।
ઇતિ સ્તુતો મહેશાનો ધર્મેણૈવ પરઃ પ્રભુઃ ।
તત્રાજગામ શીઘ્રં વૈ રક્ષિતું ધર્મમાત્મભૂઃ ॥ ૩૬॥

જાતો વિયદ્ગતઃ શમ્ભુર્વિધિં દૃષ્ટ્વા તથાવિધમ્ ।
માં દક્ષાદ્યાંશ્ચ મનસા જહાસોપજહાસ ચ ॥ ૩૭॥

સ સાધુવાદં તાન્ સર્વાન્ વિહસ્ય ચ પુનઃ પુનઃ ।
ઉવાચેદં મુનિશ્રેષ્ઠ લજ્જયન્ વૃષભધ્વજઃ ॥ ૩૮॥

શિવ ઉવાચ ।
અહો બ્રહ્મંસ્તવ કથં કામભાવઃ સમુદ્ગતઃ ।
દૃષ્ટ્વા ચ તનયાં નૈવ યોગ્યં વેદાનુસારિણામ્ ॥ ૩૯॥

યથા માતા ચ ભગિની ભ્રાતૃપત્ની તથા સુતા ।
એતાઃ કુદૃષ્ટ્યા દ્રષ્ટવ્યા ન કદાપિ વિપશ્ચિતા ॥ ૪૦॥

એષ વૈ વેદમાર્ગસ્ય નિશ્ચયસ્ત્વન્મુખે સ્થિતઃ ।
કથં તુ કામમાત્રેણ સ તે વિસ્મારિતો વિધે ॥ ૪૧॥

ધૈર્યં જાગરિતં ચિત્તે ન કથં ચતુરાનન ।

યેન ક્ષુદ્રેણ કામેન રન્તું વિઘટિતં વિધે ॥। ૪૨॥

એકાન્તયોગિનસ્તસ્માત્સર્વદાદિત્યદર્શિનઃ ।
કથં દક્ષમરીચ્યાદ્યા લોલુપાઃ સ્ત્રીષુ માનસાઃ ॥ ૪૩॥

કથં કામોઽપિ મન્દાત્મા પ્રાબલ્યાત્સોઽધુનૈવ હિ ।
વિકૃતાન્ કૃતવાન્ બાણૈરકાલજ્ઞોઽલ્પચેતનઃ ॥ ૪૪॥

ધિક્ તં શ્રુતં સદા તસ્ય યસ્ય કાન્તા મનોઽહરત્ ।
ધૈર્યાદાકૃષ્ય લૌલ્યેષુ મજ્જયત્યપિ માનસમ્ ॥ ૪૫॥

બ્રહ્મોવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા લોકે સોઽહં શિવસ્ય ચ ।
વ્રીડયા દ્વિગુણીભૂતઃ સ્વેદાર્દ્રસ્ત્વભવં ક્ષણાત્ ॥ ૪૬॥

તતઃ કામવિકારં હિ નિગૃહ્ય ચાત્યજં મુને ।
જિઘૃક્ષુરપિ તદ્ભીત્યા તાં સન્ધ્યાં કામરૂપિણીમ્ ॥ ૪૭॥

મચ્છરીરાત્તુ ઘર્મામ્ભો યત્પપાત દ્વિજોત્તમ ।
અગ્નિષ્વાત્તાઃ પિતૃગણા જાતાઃ પિતૃગણાસ્તતઃ ॥ ૪૮॥

ભિન્નાઞ્જનનિભાઃ સર્વે ફુલ્લરાજીવલોચનાઃ ।
નિતાન્તયતયઃ પુણ્યાઃ સંસારવિમુખાઃ પરે ॥ ૪૯॥

સહસ્રાણાં ચતુઃષષ્ટિરગ્નિષ્વાત્તાઃ પ્રકીર્તિતાઃ ।
ષડશીતિસહસ્રાણિ તથા બર્હિષદો મુને ॥ ૫૦॥

ઘર્માંમ્ભઃ પતિતં ભૂમૌ તદા દક્ષશરીરતઃ ।
સમસ્તગુણસમ્પન્ના તસ્માજ્જાતા વરાઙ્ગના ॥ ૫૧॥

તન્વઙ્ગી સમમધ્યા ચ તનુરોમાવલી શ્રુતા ।
મૃદ્વઙ્ગી ચારુદશના નવકાઞ્ચનસુપ્રભા ॥ ૫૨॥

સર્વાવયવરમ્યા ચ પૂર્ણચન્દ્રાનનામ્બુજા ।
નામ્ના રતિરિતિ ખ્યાતા મુનીનામપિ મોહિની ॥ ૫૩॥

મરીચિપ્રમુખાઃ ષડ્ વૈ નિગૃહીતેન્દ્રિયક્રિયાઃ ।
ઋતે ક્રતું વસિષ્ઠં ચ પુલસ્ત્યાઙ્ગિરસૌ તથા ॥ ૫૪॥

ક્રત્વાદીનાં ચતુર્ણાં ચ બીજં ભૂમૌ પપાત ચ ।
તેભ્યઃ પિતૃગણા જાતા અપરે મુનિસત્તમ ॥ ૫૫॥

સોમપા આજ્યપા નામ્ના તથૈવાન્યે સુકાલિનઃ ।
હવિષ્મન્તઃ સુતાઃ સર્વે કવ્યવાહાઃ પ્રકીર્તિતાઃ ॥ ૫૬॥

ક્રતોસ્તુ સોમપાઃ પુત્રા વસિષ્ઠાત્કાલિનસ્તથા ।
આજ્યપાખ્યાઃ પુલસ્ત્યસ્ય હવિષ્મન્તોઽઙ્ગિરઃ સુતાઃ ॥ ૫૭॥

જાતેષુ તેષુ વિપ્રેન્દ્ર અગ્નિષ્વાત્તાદિકેષ્વથ ।
લોકાનાં પિતૃવર્ગેષુ કવ્યવાટ્ સ સમન્તતઃ ॥ ૫૮॥

સન્ધ્યા પિતૃપ્રસૂર્ભૂત્વા તદુદ્દેશયુતાભવત્ ।
નિર્દોષા શમ્ભુસન્દૃષ્ટા ધર્મકર્મપરાયણા ॥ ૫૯॥

એતસ્મિન્નન્તરે શમ્ભુરનુગૃહ્યાખિલાન્દ્વિજાન્ ।
ધર્મં સંરક્ષ્ય વિધિવદન્તર્ધાનં ગતો દ્રુતમ્ ॥ ૬૦॥

અથ શઙ્કરવાક્યેન લજ્જિતોઽહં પિતામહઃ ।
કન્દર્પાયાકોપિષં હિ ભ્રુકુટીકુટિલાનનઃ ॥ ૬૧॥

દૃષ્ટ્વા મુખમભિપ્રાયં વિદિત્વા સોઽપિ મન્મથઃ ।
સ્વબાણાન્સઞ્જહારાશુ ભીતઃ પશુપતેર્મુને ॥ ૬૨॥

તતઃ કોપસમાયુક્તઃ પદ્મયોનિરહં મુને ।
અજ્વલં ચાતિબલવાન્ દિધક્ષુરિવ પાવકઃ ॥ ૬૩॥

ભવનેત્રાગ્નિનિર્દગ્ધઃ કન્દર્પો દર્પમોહિતઃ ।
ભવિષ્યતિ મહાદેવે કૃત્વા કર્મ સુદુષ્કરમ્ ॥ ૬૪॥

ઇતિ વેધાસ્ત્વહં કામમક્ષયં દ્વિજસત્તમ ।
સમક્ષં પિતૃસઙ્ઘસ્ય મુનીનાં ચ યતાત્મનામ્ ॥ ૬૫॥

ઇતિ ભીતો રતિપતિસ્તત્ક્ષણાત્ત્યક્તમાર્ગણઃ ।
પ્રાદુર્બભૂવ પ્રત્યક્ષં શાપં શ્રુત્વાતિદારુણમ્ ॥ ૬૬॥

બ્રહ્માણં મામુવાચેદં સદક્ષાદિસુતં મુને ।
શૃણ્વતાં પિતૃસઙ્ઘાનાં સન્ધ્યાયાશ્ચ વિગર્વધીઃ ॥ ૬૭॥

કામ ઉવાચ ।
કિમર્થં ભવતા બ્રહ્મન્ શપ્તોઽહમિતિ દારુણમ્ ।
અનાગાસ્તવ લોકેશ ન્યાય્યમાર્ગાનુસારિણઃ ॥ ૬૮॥

ત્વયા ચોક્તં નુ મત્કર્મ યત્તદ્ બ્રહ્મન્ કૃતં મયા ।
તત્ર યોગ્યો ન શાપો મે યતો નાન્યત્કૃતં મયા ॥ ૬૯॥

અહં વિષ્ણુસ્તથા શમ્ભુઃ સર્વે ત્વચ્છરગોચરાઃ ।
ઇતિ યદ્ભવતા પ્રોક્તં તન્મયાપિ પરીક્ષિતમ્ ॥ ૭૦॥

નાપરાધો મમાપ્યત્ર બ્રહ્મન્ મયિ નિરાગસિ ।
દારુણઃ સમયશ્ચૈષ શાપો દેવ જગત્પતે ॥ ૭૧॥

બ્રહ્મોવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા બ્રહ્માહં જગતાં પતિઃ ।
પ્રત્યવોચં યતાત્માનં મદનં દમયન્મુહુઃ ॥ ૭૨॥

બ્રહ્મોવાચ ।
આત્મજા મમ સન્ધ્યેયં યસ્માદેતત્સકામતઃ ।
લક્ષ્યીકૃતોઽહં ભવતા તતઃ શાપો મયા કૃતઃ ॥ ૭૩॥

અધુના શાન્તરોષોઽહં ત્વાં વદામિ મનોભવ ।
શ‍ૃણુષ્વ ગતસન્દેહઃ સુખી ભવ ભયં ત્યજ ॥ ૭૪॥

ત્વં ભસ્મ ભૂત્વા મદન ભર્ગલોચનવહ્નિના ।
તથૈવાશુ સમં પશ્ચાચ્છરીરં પ્રાપયિષ્યસિ ॥ ૭૫॥

યદા કરિષ્યતિ હરોઽઞ્જસા દારપરિગ્રહમ્ ।
તદા સ એવ ભવતઃ શરીરં પ્રાપયિષ્યતિ ॥ ૭૬॥

એવમુક્ત્વાથ મદનમહં લોકપિતામહઃ ।
અન્તર્ગતો મુનીન્દ્રાણાં માનસાનાં પ્રપશ્યતામ્ ॥ ૭૭॥

ઇત્યેવં મે વચઃ શ્રુત્વા મદનસ્તેઽપિ માનસાઃ ।
સમ્બભૂવુઃ સુતાઃ સર્વે સુખિનોઽરં ગૃહં ગતાઃ ॥ ૭૮॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે કામશાપાનુગ્રહો નામ તૃતીયોઽધ્યાયઃ ॥ ૨.૨.૩॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૪. ચતુર્થોઽધ્યાયઃ । કામવિવાહઃ ।

નારદ ઉવાચ ।
વિષ્ણુશિષ્ય મહાપ્રાજ્ઞ વિધે લોકકર પ્રભો ।
અદ્ભુતેયં કથા પ્રોક્તા શિવલીલામૃતાન્વિતા ॥ ૧॥

તતઃ કિમભવત્તાત ચરિતં તદ્ વદાધુના ।
અહં શ્રદ્ધાન્વિતઃ શ્રોતું યદિ શમ્ભુકથાશ્રયમ્ ॥ ૨॥

બ્રહ્મોવાચ ।
શમ્ભૌ ગતે નિજસ્થાને વેધસ્યન્તર્હિતે મયિ ।
દક્ષઃ પ્રાહાથ કન્દર્પં સંસ્મરન્ મમ તદ્વચઃ ॥ ૩॥

દક્ષ ઉવાચ ।
મદ્દેહજેયં કન્દર્પ સદ્રૂપગુણસંયુતા ।
એનાં ગૃહ્ણીષ્વ ભાર્યાર્થં ભવતઃ સદૃશીં ગુણૈઃ ॥ ૪॥

એષા તવ મહાતેજાઃ સર્વદા સહચારિણી ।
ભવિષ્યતિ યથાકામં ધર્મતો વશવર્તિની ॥ ૫॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા પ્રદદૌ તસ્યૈ દેહસ્વેદામ્બુસમ્ભવામ્ ।
કન્દર્પાયાગ્રતઃ કૃત્વા નામ કૃત્વા રતીતિ તામ્ ॥ ૬॥

વિવાહ્ય તાં સ્મરઃ સોઽપિ મુમોદાતીવ નારદ ।
દક્ષજાં તનયાં રમ્યાં મુનીનામપિ મોહિનીમ્ ॥ ૭॥

અથ તાં વીક્ષ્ય મદનો રત્યાખ્યાં સ્વસ્ત્રિયં શુભામ્ ।
આત્માગુણેન વિદ્ધોઽસૌ મુમોહ રતિરઞ્જિતઃ ॥ ૮॥

ક્ષણપ્રદાભવત્કાન્તા ગૌરી મૃગદૃશી મુદા ।
લોલાપાઙ્ગ્યથ તસ્યૈવ ભાર્યા ચ સદૃશી રતૌ ॥ ૯॥

તસ્યા ભ્રૂયુગલં વીક્ષ્ય સંશયં મદનોઽકરોત્ ।
ઉત્સાદનં મત્કોદણ્ડં વિધાત્રાસ્યાં નિવેશિતમ્ ॥ ૧૦॥

ગતિં દૃષ્ટ્વા કટાક્ષાણામાશુ તસ્યા દ્વિજોત્તમ ।
આશુ ગન્તું નિજાસ્ત્રાણાં શ્રદ્દધે ન ચ ચારુતામ્ ॥ ૧૧॥

તસ્યાઃ સ્વભાવસૌરભ્યં ધીરશ્વાસાનિલં તથા ।
આઘ્રાય મદનઃ શ્રદ્ધાં ત્યક્તવાન્ મલયાનિલે ॥ ૧૨॥

પૂર્ણેન્દુસદૃશં વક્ત્રં દૃષ્ટ્વા લક્ષ્મસુલક્ષિતમ્ ।
ન નિશ્ચિકાય મદનો ભેદં તન્મુખચન્દ્રયોઃ ॥ ૧૩॥

સુવર્ણપદ્મકલિકાતુલ્યં તસ્યાઃ કુચદ્વયમ્ ।
રેજે ચૂચુકયુગ્મેન ભ્રમરેણેવ વેષ્ટિતમ્ ॥ ૧૪॥

દૃઢપીનોન્નતં તસ્યાઃ સ્તનમધ્યં વિલમ્બિનીમ્ ।
આનાભિલમ્બિનીં માલાં તન્વીં ચન્દ્રાયિતાં શુભામ્ ॥ ૧૫॥

જ્યાં પુષ્પધનુષઃ કામઃ ષટ્પદાવલિસમ્ભ્રમામ્ ।
વિસસ્માર ચ યસ્માત્તાં વિસૃજ્યૈનાં નિરીક્ષતે ॥ ૧૬॥

ગમ્ભીરનાભિરન્ધ્રાન્તશ્ચતુઃપાર્શ્વત્વગાવૃતમ્ ।
આનનાબ્જેક્ષણદ્વન્દ્વમારક્તકમલં યથા ॥ ૧૭॥

ક્ષીણમધ્યેન વપુષા નિસર્ગાષ્ટાપદપ્રભા ।
રુક્મવેદીવ દદૃશે કામેન રમણી હિ સા ॥ ૧૮॥

રમ્ભાસ્તમ્ભાયતં સ્નિગ્ધં યદૂરુયુગલં મૃદુ ।
નિજશક્તિસમં કામો વીક્ષાઞ્ચક્રે મનોહરમ્ ॥ ૧૯॥

આરક્તપાર્ષ્ણિપાદાગ્રં પ્રાન્તભાગં પદદ્વયમ્ ।
અનુરાગમિવાનેન મિત્રં તસ્યા મનોભવઃ ॥ ૨૦॥

તસ્યાઃ કરયુગં રક્તં નખરૈઃ કિંશુકોપમૈઃ ।
વૃત્તાભિરઙ્ગુલીભિશ્ચ સૂક્ષ્માગ્રાભિર્મનોહરમ્ ॥ ૨૧॥

તદ્ બાહુયુગુલં કાન્તં મૃણાલયુગલાયતમ્ ।
મૃદુ સ્નિગ્ધં ચિરં રાજત્કાન્તિલોહપ્રવાલવત્ ॥ ૨૨॥

નીલનીરદસઙ્કાશઃ કેશપાશો મનોહરઃ ।
ચમરીબાલભરવદ્વિભાતિ સ્મ સ્મરપ્રિયા ॥ ૨૩॥

એતાદૃશીં રતિં નામ્નીં પ્રાલેયાદ્રિસમુદ્ભવામ્ ।
ગઙ્ગામિવ મહાદેવો જગ્રાહોત્ફુલ્લલોચનઃ ॥ ૨૪॥

ચક્રપદ્માં ચારુબાહું મૃણાલશકલાન્વિતામ્ ।
ભ્રૂયુગ્મવિભ્રમવ્રાતતનૂર્મિપરિરાજિતામ્ ॥ ૨૫॥

કટાક્ષપાતતુઙ્ગૌઘાં સ્વીયનેત્રોત્પલાન્વિતામ્ ।
તનુલોમામ્બુશૈવાલાં મનોદ્રુમવિલાસિનીમ્ ॥ ૨૬॥

નિમ્નનાભિહ્રદાં ક્ષામાં સર્વાઙ્ગરમણીયિકામ્ ।
સર્વલાવણ્યસદનાં શોભમાનાં રમામિવ ॥ ૨૭॥

દ્વાદશાભરણૈર્યુક્તાં શૃઙ્ગારૈઃ ષોડશૈર્યુતામ્ ।
મોહનીં સર્વલોકાનાં ભાસયન્તીં દિશો દશ ॥ ૨૮॥

ઇતિ તાં મદનો વીક્ષ્ય રતિં જગ્રાહ સોત્સુકઃ ।
રાગાદુપસ્થિતાં લક્ષ્મીં હૃષીકેશ ઇવોત્તમામ્ ॥ ૨૯॥

નોવાચ ચ તદા દક્ષં કામો મોદભવાત્તતઃ ।
વિસ્મૃત્ય દારુણં શાપં વિધિદત્તં વિમોહિતઃ ॥ ૩૦॥

તદા મહોત્સવસ્તાત બભૂવ સુખવર્ધનઃ ।
દક્ષઃ પ્રીતતરશ્ચાસીન્મુમુદે તનયા મમ ॥ ૩૧॥

કામોઽતીવ સુખં પ્રાપ્ય સર્વદુઃખક્ષયં ગતઃ ।
દક્ષજાપિ રતિઃ કામં પ્રાપ્ય ચાપિ જહર્ષ હ ॥ ૩૨॥

રરાજ ચ તયા સાર્ધં ભિન્નશ્ચારુવચાઃ સ્મરઃ ।
જીમૂત ઇવ સન્ધ્યાયાં સૌદામન્યા મનોજ્ઞયા ॥ ૩૩॥

ઇતિ રતિપતિરુચ્ચૈર્મોહયુક્તો રતિં તાં
હૃદુપરિ જગૃહે વૈ યોગદર્શીવ વિદ્યામ્ ।
રતિરપિ પતિમગ્ર્યં પ્રાપ્ય સા ચાપિ રેજે
હરિમિવ કમલા વૈ પૂર્ણચન્દ્રોપમાસ્યા ॥ ૩૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે કામવિવાહવર્ણનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૨.૨.૪॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૫. પઞ્ચમોઽધ્યાયઃ । સન્ધ્યાચરિત્રમ્ ।

સૂત ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય બ્રહ્મણો મુનિસત્તમઃ ।
સ મુદોવાચ સંસ્મૃત્ય શઙ્કરં પ્રીતમાનસઃ ॥ ૧॥

નારદ ઉવાચ ।
બ્રહ્મન્ વિધે મહાભાગ વિષ્ણુશિષ્ય મહામતે ।
અદ્ભુતા કથિતા લીલા ત્વયા ચ શશિમૌલિનઃ ॥ ૨॥

ગૃહીતદારે મદને હૃષ્ટે હિ સ્વગૃહં ગતે ।
દક્ષે ચ સ્વગૃહં યાતે તથા હિ ત્વયિ કર્તરિ ॥ ૩॥

માનસેષુ ચ પુત્રેષુ ગતેષુ સ્વસ્વધામસુ ।
સન્ધ્યા કુત્ર ગતા સા ચ બ્રહ્મપુત્રી પિતૃપ્રસૂઃ ॥ ૪॥

કિં ચકાર ચ કેનૈવ પુરુષેણ વિવાહિતા ।
એતત્સર્વં વિશેષેણ સન્ધ્યાયાશ્ચરિતં વદ ॥ ૫॥

સૂત ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય બ્રહ્મપુત્રસ્ય ધીમતઃ ।
સંસ્મૃત્ય શઙ્કરં ભક્ત્યા બ્રહ્મા પ્રોવાચ તત્ત્વવિત્ ॥ ૬॥

બ્રહ્મોવાચ ।
શ઼ૃણુ ત્વં ચ મુને સર્વં સન્ધ્યાયાશ્ચરિતં શુભમ્ ।
યચ્છ્રુત્વા સર્વકામિન્યઃસાધ્વ્યઃ સ્યુઃ સર્વદા મુને ॥ ૭॥

સા ચ સન્ધ્યા સુતા મે હિ મનોજાતા પુરાભવત્ ।
તપસ્તપ્ત્વા તનું ત્યક્ત્વા સૈવ જાતા ત્વરુન્ધતી ॥ ૮॥

મેધાતિથેઃ સુતા ભૂત્વા મુનિશ્રેષ્ઠસ્ય ધીમતી ।
બ્રહ્મવિષ્ણુમહેશાનવચનાચ્ચરિતવ્રતા ॥ ૯॥

વવ્રે પતિં મહાત્માનં વસિષ્ઠં શંસિતવ્રતમ્ ।
પતિવ્રતા ચ મુખ્યાભૂદ્વન્દ્યા પૂજ્યા ત્વભીષણા ॥ ૧૦॥

નારદ ઉવાચ ।
કથં તયા તપસ્તપ્તં કિમર્થં કુત્ર સન્ધ્યયા ।
કથં શરીરં સા ત્યક્ત્વાભવન્મેધાતિથેઃ સુતા ॥ ૧૧॥

કથં વા વિહિતં દેવૈર્બ્રહ્મવિષ્ણુશિવૈઃ પતિમ્ ।
વસિષ્ઠં તુ મહાત્માનં સંવવ્રે શંસિતવ્રતમ્ ॥ ૧૨॥

એતન્મે શ્રોષ્યમાણાય વિસ્તરેણ પિતામહ ।
કૌતૂહલમરુન્ધત્યાશ્ચરિતં બ્રૂહિ તત્ત્વતઃ ॥ ૧૩॥

બ્રહ્મોવાચ ।
અહં સ્વતનયાં સન્ધ્યાં દૃષ્ટ્વા પૂર્વમથાત્મનઃ ।
કામાયાશુ મનોઽકાર્ષં ત્યક્ત્વા શિવભયાચ્ચ સા ॥ ૧૪॥

સન્ધ્યાયાશ્ચલિતં ચિત્તં કામબાણવિલોડિતમ્ ।
ઋષીણામપિ સંરુદ્ધમાનસાનાં મહાત્મનામ્ ॥ ૧૫॥

ભર્ગસ્ય વચનં શ્રુત્વા સોપહાસં ચ માં પ્રતિ ।
આત્મનશ્ચલિતત્વં વૈ હ્યમર્યાદમૃષીન્પ્રતિ ॥ ૧૬॥

કામસ્ય તાદૃશં ભાવં મુનિમોહકરં મુહુઃ ।
દૃષ્ટ્વા સન્ધ્યા સ્વયં તત્રોપયમાયાતિદુઃખિતા ॥ ૧૭॥

તતસ્તુ બ્રહ્મણા શપ્તે મદને ચ મયા મુને ।
અન્તર્ભૂતે મયિ શિવે ગતે ચાપિ નિજાસ્પદે ॥ ૧૮॥

આમર્ષવશમાપન્ના સા સન્ધ્યા મુનિસત્તમ ।
મમ પુત્રી વિચાર્યૈવં તદા ધ્યાનપરાભવત્ ॥ ૧૯॥

ધ્યાયન્તી ક્ષણમેવાશુ પૂર્વં વૃત્તં મનસ્વિની ।
ઇદં વિમમૃશે સન્ધ્યા તસ્મિન્કાલે યથોચિતમ્ ॥ ૨૦॥

સન્ધ્યોવાચ ।
ઉત્પન્નમાત્રાં માં દૃષ્ટ્વા યુવતીં મદનેરિતઃ ।
અકાર્ષીત્સાનુરાગોઽયમભિલાષં પિતા મમ ॥ ૨૧॥

પશ્યતાં માનસાનાં ચ મુનીનાં ભાવિતાત્મનામ્ ।
દૃષ્ટ્વૈવ મામમર્યાદં સકામમભવન્મનઃ ॥ ૨૨॥

મમાપિ મથિતં ચિત્તં મદનેન દુરાત્મના ।
યેન દૃષ્ટ્વા મુનીન્સર્વાંશ્ચલિતં મન્મનો ભૃશમ્ ॥ ૨૩॥

ફલમેતસ્ય પાપસ્ય મદનઃ સ્વયમાપ્તવાન્ ।
યસ્તં શશાપ કુપિતઃ શમ્ભોરગ્રે પિતામહઃ ॥ ૨૪॥

પ્રાપ્નુયાં ફલમેતસ્ય પાપસ્ય સ્વઘકારિણી ।
તચ્છોધનફલમહમાશુ ચેચ્છામિ સાધનમ્ ॥ ૨૫॥

યન્માં પિતા ભ્રાતરશ્ચ સકામામપરોક્ષતઃ ।
દૃષ્ટ્વા ચક્રુઃ સ્પૃહાં તસ્માન્ન મત્તઃ પાપકૃત્પરા ॥ ૨૬॥

મમાપિ કામભાવોઽભૂદમર્યાદં સમીક્ષ્ય તાન્ ।
પત્યા ઇવ સ્વકે તાતે સર્વેષુ સહજેષ્વપિ ॥ ૨૭॥

કરિષ્યામ્યસ્ય પાપસ્ય પ્રાયશ્ચિત્તમહં સ્વયમ્ ।
આત્માનમગ્નૌ હોષ્યામિ વેદમાર્ગાનુસારતઃ ॥ ૨૮॥

કિં ત્વેકાં સ્થાપયિષ્યામિ મર્યાદામિહ ભૂતલે ।
ઉત્પન્નમાત્રા ન યથા સકામાઃ સ્યુઃ શરીરિણઃ ॥ ૨૯॥

એતદર્થમહં કૃત્વા તપઃ પરમદારુણમ્ ।
મર્યાદાં સ્થાપયિષ્યામિ પશ્ચાત્ત્યક્ષ્યામિ જીવિતમ્ ॥ ૩૦॥

યસ્મિન્ શરીરે પિત્રા મે હ્યભિલાષઃ સ્વયં કૃતઃ ।
ભ્રાતૃભિસ્તેન કાયેન કિઞ્ચિન્નાસ્તિ પ્રયોજનમ્ ॥ ૩૧॥

મયા યેન શરીરેણ તાતેષુ સહજેષુ ચ ।
ઉદ્ભાવિતઃ કામભાવો ન તત્સુકૃતસાધનમ્ ॥ ૩૨॥

ઇતિ સઞ્ચિન્ત્ય મનસા સન્ધ્યા શૈલવરં તતઃ ।
જગામ ચન્દ્રભાગાખ્યં ચન્દ્રભાગાપગા યતઃ ॥ ૩૩॥

અથ તત્ર ગતાં જ્ઞાત્વા સન્ધ્યાં ગિરિવરં પ્રતિ ।
તપસે નિયતાત્માનં બ્રહ્માવોચમહં સુતમ્ ॥ ૩૪॥

વસિષ્ઠં સંયતાત્માનં સર્વજ્ઞં જ્ઞાનયોગિનમ્ ।
સમીપે સ્વે સમાસીનં વેદવેદાઙ્ગપારગમ્ ॥ ૩૫॥

બ્રહ્મોવાચ ।
વસિષ્ઠ પુત્ર ગચ્છ ત્વં સન્ધ્યાં જાતાં મનસ્વિનીમ્ ।
તપસે ધૃતકામાં ચ દીક્ષસ્વૈનાં યથાવિધિ ॥ ૩૬॥

મન્દાક્ષમભવત્તસ્યાઃ પુરા દૃષ્ટ્વૈવ કામુકાન્ ।
યુષ્માન્માં ચ તથાત્માનં સકામાં મુનિસત્તમ ॥ ૩૭॥

અનુક્તમૂર્ત્તં તત્કર્મ પૂર્વમૃત્યું વિમૃશ્ય સા ।

યુષ્માકમાત્મનશ્ચાપિ પ્રાણાન્સન્ત્યક્તુમિચ્છતિ ॥ ૩૮॥

અમર્યાદિષુ મર્યાદાં તપસા સ્થાપયિષ્યતિ ।
તપઃ કર્તું ગતા સાધ્વી ચન્દ્રભાગાખ્યભૂધરે ॥ ૩૯॥

ન ભાવં તપસસ્તાત સાનુજાનાતિ કઞ્ચન ।
તસ્માદ્યથોપદેશાત્સા પ્રાપ્નોત્વિષ્ટં તથા કુરુ ॥ ૪૦॥

ઇદં રૂપં પરિત્યજ્ય નિજં રૂપાન્તરં મુને ।
પરિગૃહ્યાન્તિકે તસ્યાઃ તપશ્ચર્યાં નિદર્શય ॥ ૪૧॥

ઇદં સ્વરૂપં ભવતો દૃષ્ટ્વા પૂર્વં યથાત્ર વામ્ ।
નાપ્નુયાત્સાઽથ કિઞ્ચિદ્વૈ તતો રૂપાન્તરં કુરુ ॥ ૪૨॥

બ્રહ્મોવાચ ।
નારદેત્થં વસિષ્ઠો મે સમાજ્ઞપ્તો દયાયુતઃ ॥

તથાસ્ત્વિતિ ચ માં પ્રોચ્ય યયૌ સન્ધ્યાન્તિકં મુનિઃ । ૪૩॥

તત્ર દેવસરઃ પૂર્ણં ગુણૈર્માનસસમ્મિતમ્ ।
દદર્શ સ વસિષ્ઠોઽથ સન્ધ્યાં તત્તીરગામપિ ॥। ૪૪॥

તીરસ્થયા તયા રેજે તત્સરઃ કમલોજ્જ્વલમ્ ।
ઉદ્યદિન્દુસુનક્ષત્રં પ્રદોષે ગગનં યથા ॥ ૪૫॥

મુનિર્દૃષ્ટ્વાથ તાં તત્ર સુસમ્ભાવાં સ કૌતુકી ।
વીક્ષાઞ્ચક્રે સરસ્તત્ર બૃહલ્લોહિતસંજ્ઞકમ્ ॥ ૪૬॥

ચન્દ્રભાગા નદી તસ્માત્પ્રાકારાદ્દક્ષિણામ્બુધિમ્ ।
યાન્તી સા ચૈવ દદૃશે તેન સાનુગિરેર્મહત્ ॥ ૪૭॥

નિર્ભિદ્ય પશ્ચિમં સા તુ ચન્દ્રભાગસ્ય સા નદી ।
યથા હિમવતો ગઙ્ગા તથા ગચ્છતિ સાગરમ્ ॥ ૪૮॥

તસ્મિન્ ગિરૌ ચન્દ્રભાગે બૃહલ્લોહિતતીરગામ્ ।
સન્ધ્યાં દૃષ્ટ્વાથ પપ્રચ્છ વસિષ્ઠઃ સાદરં તદા ॥ ૪૯॥

વસિષ્ઠ ઉવાચ ।
કિમર્થમાગતા ભદ્રે નિર્જનં ત્વં મહીધરમ્ ।
કસ્ય વા તનયા કિં વા ભવત્યાપિ ચિકીર્ષિતમ્ ॥ ૫૦॥

એતદિચ્છામ્યહં શ્રોતું વદ ગુહ્યં ન ચેદ્ભવેત્ ।
વદનં પૂર્ણચન્દ્રાભં નિષ્પ્રેષ્ટં વા કથં તવ ॥ ૫૧॥

બ્રહ્મોવાચ ।
તચ્છ્રુત્વા વચનં તસ્ય વસિષ્ઠસ્ય મહાત્મનઃ ।
દૃષ્ટ્વા ચ તં મહાત્માનં જ્વલન્તમિવ પાવકમ્ ॥ ૫૨॥

શરીરધૃગ્બ્રહ્મચર્યં વિલસન્તં જટાધરમ્ ।
સાદરં પ્રણિપત્યાથ સન્ધ્યોવાચ તપોધનમ્ ॥ ૫૩॥

સન્ધ્યોવાચ ।
યદર્થમાગતા શૈલં સિદ્ધં તન્મે નિબોધ હ ।
તવ દર્શનમાત્રેણ યન્મે સેત્સ્યતિ વૈ વિભો ॥ ૫૪॥

તપશ્ચર્તુમહં બ્રહ્મન્નિર્જનં શૈલમાગતા ।
બ્રહ્મણોઽહં સુતા જાતા નામ્ના સન્ધ્યેતિ વિશ્રુતા ॥ ૫૫॥

યદિ તે યુજ્યતે સહ્યં માં ત્વં સમુપદેશય ।
એતચ્ચિકીર્ષિતં ગુહ્યં નાન્યં કિઞ્ચન વિદ્યતે ॥ ૫૬॥

અજ્ઞાત્વા તપસો ભાવં તપોવનમુપાશ્રિતા ।
ચિન્તયા પરિશુષ્યેઽહં વેપતે હિ મનો મમ ॥ ૫૭॥

બ્રહ્મોવાચ ।
આકર્ણ્ય તસ્યા વચનં વસિષ્ઠો બ્રહ્મવિત્તમઃ ।
સ્વયં ચ સર્વકૃત્યજ્ઞો નાન્યત્કિઞ્ચન પૃષ્ટવાન્ ॥ ૫૮॥

અથ તાં નિયતાત્માનં તપસેતિ ધૃતોદ્યમામ્ ।
પ્રોવાચ મનસા સ્મૃત્વા શઙ્કરં ભક્તવત્સલમ્ ॥ ૫૯॥

વસિષ્ઠ ઉવાચ ।
પરમં યો મહત્તેજઃ પરમં યો મહત્તપઃ ।
પરમઃ પરમારાધ્યઃ શમ્ભુર્મનસિ ધાર્યતામ્ ॥ ૬૦॥

ધર્માર્થકામમોક્ષાણાં ય એકસ્ત્વાદિકારણમ્ ।
તમેકં જગતામાદ્યં ભજસ્વ પુરુષોત્તમમ્ ॥ ૬૧॥

મન્ત્રેણાનેન દેવેશં શમ્ભું ભજ શુભાનને ।
તેન તે સકલાવાપ્તિર્ભવિષ્યતિ ન સંશયઃ ॥ ૬૨॥

ॐ નમઃ શઙ્કરાયેતિ ઓમિત્યન્તેન સન્તતમ્ ।
મૌનં તપઃ સમારમ્ભં તન્મે નિગદતઃ શ‍ૃણુ ॥ ૬૩॥

સ્નાનં મૌનેન કર્તવ્યં મૌનેન હરપૂજનમ્ ।
દ્વયોઃ પૂર્ણજલાહારં પ્રથમં ષષ્ઠકાલયોઃ ॥ ૬૪॥

તૃતીયે ષષ્ઠકાલે તુ હ્યુપવાસપરો ભવેત્ ।
એવં તપઃસમાપ્તૌ વા ષષ્ઠે કાલે ક્રિયા ભવેત્ ॥ ૬૫॥

એવં મૌનતપસ્યાખ્યા બ્રહ્મચર્યફલપ્રદા ।
સર્વાભીષ્ટપ્રદા દેવિ સત્યં સત્યં ન સંશયઃ ॥ ૬૬॥

એવં ચિત્તે સમુદ્દિશ્ય કામં ચિન્તય શઙ્કરમ્ ।
સ તે પ્રસન્ન ઇષ્ટાર્થમચિરાદેવ દાસ્યતિ ॥ ૬૭॥

બ્રહ્મોવાચ ।
ઉપવિશ્ય વસિષ્ઠોઽથ સન્ધ્યાયૈ તપસઃ ક્રિયામ્ ।
તામાભાષ્ય યથાન્યાયં તત્રૈવાન્તર્દધે મુનિઃ ॥ ૬૮॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે સન્ધ્યાચરિત્રવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૨.૨.૫॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૬. ષષ્ઠોઽધ્યાયઃ । સન્ધ્યાચરિત્રવર્ણનમ્ ।

બ્રહ્મોવાચ ।
સુતવર્ય મહાપ્રાજ્ઞ શ‍ૃણુ સન્ધ્યાતપો મહત્ ।
યચ્છ્રુત્વા નશ્યતે પાપસમૂહસ્તત્ક્ષણાદ્ ધ્રુવમ્ ॥ ૧॥

ઉપદિશ્ય તપોભાવં વસિષ્ઠે સ્વગૃહં ગતે ।
સન્ધ્યાપિ તપસો ભાવં જ્ઞાત્વા મોદમવાપ હ ॥ ૨॥

તતઃ સાનન્દમનસો વેષં કૃત્વા તુ યાદૃશમ્ ।
તપશ્ચર્તું સમારેભે બૃહલ્લોહિતતીરગા ॥ ૩॥

યથોક્તં તુ વસિષ્ઠેન મન્ત્રં તપસિ સાધનમ્ ।
મન્ત્રેણ તેન સદ્ભક્ત્યા પૂજયામાસ શઙ્કરમ્ ॥ ૪॥

એકાન્તમનસસ્તસ્યાઃ કુર્વન્ત્યાઃ સુમહત્તપઃ ।
શમ્ભૌ વિન્યસ્તચિત્તાયા ગતમેકં ચતુર્યુગમ્ ॥ ૫॥

પ્રસન્નોઽભૂત્તદા શમ્ભુસ્તપસા તેન તોષિતઃ ।
અન્તર્બહિસ્તથાકાશે દર્શયિત્વા નિજં વપુઃ ॥ ૬॥

યદ્રૂપં ચિન્તયન્તી સા તેન પ્રત્યક્ષતાં ગતઃ । ૭॥

અથ સા પુરતો દૃષ્ટ્વા મનસા ચિન્તિતં પ્રભુમ્ ।
પ્રસન્નવદનં શાન્તં મુમોદાતીવ શઙ્કરમ્ ॥ ૮॥

સસાધ્વસમહં વક્ષ્યે કિં કથં સ્તૌમિ વા હરમ્ ।
ઇતિ ચિન્તાપરા ભૂત્વા ન્યમીલયત ચક્ષુષી ॥ ૯॥

નિમીલિતાક્ષ્યાસ્તસ્યાસ્તુ પ્રવિશ્ય હૃદયં હરઃ ।
દિવ્યં જ્ઞાનં દદૌ તસ્યૈ વાચં દિવ્યે ચ ચક્ષુષી ॥ ૧૦॥

દિવ્યજ્ઞાનં દિવ્યચક્ષુર્દિવ્યાં વાચમવાપ સા ।
પ્રત્યક્ષં વીક્ષ્ય દુર્ગેશં તુષ્ટાવ જગતાં પતિમ્ ॥ ૧૧॥

સન્ધ્યોવાચ ।
નિરાકારં જ્ઞાનગમ્યં પરં ય-
ન્નૈવ સ્થૂલં નાપિ સૂક્ષ્મં ન ચોચ્ચમ્ ।
અન્તશ્ચિન્ત્યં યોગિભિસ્તસ્ય રૂપં
તસ્મૈ તુભ્યં લોકકર્ત્રે નમોઽસ્તુ ॥ ૧૨॥

સર્વં શાન્તં નિર્મલં નિર્વિકારં
જ્ઞાનાગમ્યં સ્વપ્રકાશેઽવિકારમ્ ।
ખાધ્વપ્રખ્યં ધ્વાન્તમાર્ગાત્પરસ્તાદ્-
રૂપં યસ્ય ત્વાં નમામિ પ્રસન્નમ્ ॥ ૧૩॥

એકં શુદ્ધં દીપ્યમાનં વિનાજાં
ચિદાનન્દં સહજં ચાવિકારિ ।
નિત્યાનન્દં સત્યભૂતિપ્રસન્નં
યસ્ય શ્રીદં રૂપમસ્મૈ નમસ્તે ॥ ૧૪॥

વિદ્યાકારોદ્ભાવનીયં પ્રભિન્નં
સત્ત્વચ્છન્દં ધ્યેયમાત્મસ્વરૂપમ્ ।
સારં પારં પાવનાનાં પવિત્રં
તસ્મૈ રૂપં યસ્ય ચૈવં નમસ્તે ॥ ૧૫॥

યત્ત્વાકારં શુદ્ધરૂપં મનોજ્ઞં
રત્નાકલ્પં સ્વચ્છકર્પૂરગૌરમ્ ।
ઇષ્ટાભીતી શૂલમુણ્ડં દધાનં
હસ્તૈર્નમો યોગયુક્તાય તુભ્યમ્ ॥ ૧૬॥

ગગનં ભૂર્દિશશ્ચૈવ સલિલં જ્યોતિરેવ ચ ।
પુનઃ કાલશ્ચ રૂપાણિ યસ્ય તુભ્યં નમોઽસ્તુ તે ॥ ૧૭॥

પ્રધાનપુરુષૌ યસ્ય કાયત્વેન વિનિર્ગતૌ ।
તસ્માદવ્યક્તરૂપાય શઙ્કરાય નમો નમઃ ॥ ૧૮॥

યો બ્રહ્મા કુરુતે સૃષ્ટિં યો વિષ્ણુઃ કુરુતે સ્થિતિમ્ ।
સંહરિષ્યતિ યો રુદ્રસ્તસ્મૈ તુભ્યં નમો નમઃ ॥ ૧૯॥

નમો નમઃ કારણકારણાય
દિવ્યામૃતજ્ઞાનવિભૂતિદાય ।
સમસ્તલોકાન્તરભૂતિદાય
પ્રકાશરૂપાય પરાત્પરાય ॥ ૨૦॥

યસ્યાપરં નો જગદુચ્યતે પદાત્
ક્ષિતિર્દિશઃ સૂર્ય ઇન્દુર્મનોજઃ ।
બહિર્મુખા નાભિતશ્ચાન્તરિક્ષં
તસ્મૈ તુભ્યં શમ્ભવે મે નમોઽસ્તુ ॥ ૨૧॥

ત્વં પરઃ પરમાત્મા ચ ત્વં વિદ્યા વિવિધા હરઃ ।
સદ્બ્રહ્મ ચ પરં બ્રહ્મ વિચારણપરાયણઃ ॥ ૨૨॥

યસ્ય નાદિર્ન મધ્યં ચ નાન્તમસ્તિ જગદ્યતઃ ।
કથં સ્તોષ્યામિ તં દેવં વાઙ્મનોઽગોચરં હરમ્ ॥ ૨૩॥

યસ્ય બ્રહ્માદયો દેવ મુનયશ્ચ તપોધનાઃ ।
ન વિવૃણ્વન્તિ રૂપાણિ વર્ણનીયઃ કથં સ મે ॥ ૨૪॥

સ્ત્રિયા મયા તે કિં જ્ઞેયા નિર્ગુણસ્ય ગુણાઃ પ્રભો ।

નૈવ જાનન્તિ યદ્રૂપં સેન્દ્રા અપિ સુરાસુરાઃ ॥ ૨૫॥

નમસ્તુભ્યં મહેશાન નમસ્તુભ્યં તપોમય ।
પ્રસીદ શમ્ભો દેવેશ ભૂયો ભૂયો નમોઽસ્તુ તે ॥ ૨૬॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્યાઃ સંસ્તુતઃ પરમેશ્વરઃ ।
સુપ્રસન્નતરશ્ચાભૂચ્છઙ્કરો ભક્તવત્સલઃ ॥ ૨૭॥

અથ તસ્યાઃ શરીરં તુ વલ્કલાજિનસંયુતમ્ ।
પરિચ્છન્નં જટાવ્રાતૈઃ પવિત્રે મૂર્ધ્નિ રાજિતૈઃ ॥ ૨૮॥

હિમાનીતર્જિતામ્ભોજસદૃશં વદનં તદા ।
નિરીક્ષ્ય કૃપયાવિષ્ટો હરઃ પ્રોવાચ તામિદમ્ ॥ ૨૯॥

મહેશ્વર ઉવાચ ।
પ્રીતોઽસ્મિ તપસા ભદ્રે ભવત્યાઃ પરમેણ વૈ ।
સ્તવેન ચ શુભપ્રાજ્ઞે વરં વરય સામ્પ્રતમ્ ॥ ૩૦॥

યેન તે વિદ્યતે કાર્યં વરેણાસ્મિન્મનોગતમ્ ।
તત્કરિષ્યે ચ ભદ્રં તે પ્રસન્નોઽહં તવ વ્રતૈઃ ॥ ૩૧॥

બ્રહ્મોવાચ ।
ઇતિ શ્રુત્વા મહેશસ્ય પ્રસન્નમનસસ્તદા ।
સન્ધ્યોવાચ સુપ્રસન્ના પ્રણમ્ય ચ મુહુર્મુહુઃ ॥ ૩૨॥

સન્ધ્યોવાચ ।
યદિ દેયો વરઃ પ્રીત્યા વરયોગ્યાસ્મ્યહં યદિ ।
યદિ શુદ્ધાસ્મ્યહં જાતા તસ્માત્પાપાન્મહેશ્વર ॥ ૩૩॥

યદિ દેવ પ્રસન્નોઽસિ તપસા મમ સામ્પ્રતમ્ ।
વૃતસ્તદાયં પ્રથમં વરો મમ વિધીયતામ્ ॥ ૩૪॥

ઉત્પન્નમાત્રા દેવેશ પ્રાણિનોઽસ્મિન્ ભુવસ્થલે ।
ન ભવન્તુ સમેનૈવ સકામાઃ સમ્ભવન્તુ વૈ ॥ ૩૫॥

યદ્ધિ વૃત્તા હિ લોકેષુ ત્રિષ્વપિ પ્રથિતા યથા ।
ભવિષ્યામિ તથા નાન્યા વર એકો વૃતો મયા ॥ ૩૬॥

સકામા મમ સૃષ્ટિસ્તુ કુત્રચિન્ન પતિષ્યતિ ।

યો મે પતિર્ભવેન્નાથ સોઽપિ મેઽતિસુહૃચ્ચ વૈ ॥ ૩૭॥

યો દ્રક્ષ્યતિ સકામો માં પુરુષસ્તસ્ય પૌરુષમ્ ।
ગમિષ્યતિ તદા નાશં સ ચ ક્લીબો ભવિષ્યતિ ॥ ૩૮॥

બ્રહ્મોવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્યાઃ શઙ્કરો ભક્તવત્સલઃ ।
ઉવાચ સુપ્રસન્નાત્મા નિષ્પાપાયાસ્તયેરિતે ॥ ૩૯॥

મહેશ્વર ઉવાચ ।
શ‍ૃણુ દેવિ ચ સન્ધ્યે ત્વં ત્વત્પાપં ભસ્મતાં ગતમ્ ।
ત્વયિ ત્યક્તો મયા ક્રોધઃ શુદ્ધા જાતા તપઃકરાત્ ॥ ૪૦॥

યદ્યદ્વૃતં ત્વયા ભદ્રે દત્તં તદખિલં મયા ।
સુપ્રસન્નેન તપસા તવ સન્ધ્યે વરેણ હિ ॥ ૪૧॥

પ્રથમં શૈશવો ભાવઃ કૌમારાખ્યો દ્વિતીયકઃ ।
તૃતીયો યૌવનો ભાવશ્ચતુર્થો વાર્ધકસ્તથા ॥ ૪૨॥

તૃતીયે ત્વથ સમ્પ્રાપ્તે વયોભાગે શરીરિણઃ ।
સકામાઃ સ્યુર્દ્વિતીયાન્તે ભવિષ્યતિ ક્વચિત્ ક્વચિત્ ॥ ૪૩॥

તપસા તવ મર્યાદા જગતિ સ્થાપિતા મયા ।
ઉત્પન્નમાત્રા ન યથા સકામાઃ સ્યુઃ શરીરિણઃ ॥ ૪૪॥

ત્વં ચ લોકે સતીભાવં તાદૃશં સમવાપ્નુહિ ।
ત્રિષુ લોકેષુ નાન્યસ્યા યાદૃશં સમ્ભવિષ્યતિ ॥ ૪૫॥

યઃ પશ્યતિ સકામસ્ત્વાં પાણિગ્રાહમૃતે તવ ।
સ સદ્યઃ ક્લીબતાં પ્રાપ્ય દુર્બલત્વં ગમિષ્યતિ ॥ ૪૬॥

પતિસ્તવ મહાભાગસ્તપોરૂપસમન્વિતઃ ।
સપ્તકલ્પાન્તજીવી ચ ભવિષ્યતિ સહ ત્વયા ॥ ૪૭॥

ઇતિ તે યે વરા મત્તઃ પ્રાર્થિતાસ્તે કૃતા મયા ।
અન્યચ્ચ તે વદિષ્યામિ પૂર્વજન્મનિ સંસ્થિતમ્ ॥ ૪૮॥

અગ્નૌ શરીરત્યાગસ્તે પૂર્વમેવ પ્રતિશ્રુતઃ ।
તદુપાયં વદામિ ત્વાં તત્કુરુષ્વ ન સંશયઃ ॥ ૪૯॥

સ ચ મેધાતિથેર્યજ્ઞે મુનેર્દ્વાદશવાર્ષિકે ।

કૃત્સ્નપ્રજ્વલિતે વહ્નાવચિરાત્ ક્રિયતાં ત્વયા ॥ ૫૦॥

એતચ્છૈલોપત્યકાયાં ચન્દ્રભાગાનદીતટે ।
મેધાતિથિર્મહાયજ્ઞં કુરુતે તાપસાશ્રમે ॥ ૫૧॥

તત્ર ગત્વા સ્વયં છન્દં મુનિભિર્નોપલક્ષિતા ।
મત્પ્રસાદાદ્વહ્નિજાતા તસ્ય પુત્રી ભવિષ્યસિ ॥ ૫૨॥

યસ્તે વરો વાઞ્છનીયઃ સ્વામી મનસિ કશ્ચન ।
તં નિધાય નિજસ્વાન્તે ત્યજ વહ્નૌ વપુઃ સ્વકમ્ ॥ ૫૩॥

યદા ત્વં દારુણં સન્ધ્યે તપશ્ચરસિ પર્વતે ।
યાવચ્ચતુર્યુગં તસ્ય વ્યતીતે તુ કૃતે યુગે ॥ ૫૪॥

ત્રેતાયાઃ પ્રથમે ભાગે જાતા દક્ષસ્ય કન્યકાઃ ।
યાસ્તાઃ શીલસમાપન્ના યથાયોગ્યં વિવાહિતાઃ ॥ ૫૫॥

તન્મધ્યે સ દદૌ કન્યા વિધવે સપ્તવિંશતિઃ ।
ચન્દ્રોઽન્યાઃસમ્પરિત્યજ્ય રોહિણ્યાં પ્રીતિમાનભૂત્ ॥ ૫૬॥

તદ્ધેતોર્હિ યદા ચન્દ્રઃ શપ્તો દક્ષેણ કોપિના ।
તદા ભવત્યા નિકટે સર્વે દેવાઃ સમાગતાઃ । ૫૭॥

ન દૃષ્ટાશ્ચ ત્વયા સન્ધ્યે તે દેવા બ્રહ્મણા સહ ।
મયિ વિન્યસ્તમનસા ખં ચ દૃષ્ટ્વા લભેત્પુનઃ ॥ ૫૮॥

ચન્દ્રસ્ય શાપમોક્ષાર્થં જાતા ચન્દ્રનદી તદા ।
સૃષ્ટા ધાત્રા તદૈવાત્ર મેધાતિથિરુપસ્થિતઃ ॥ ૫૯॥

તપસા તત્સમો નાસ્તિ ન ભૂતો ન ભવિષ્યતિ ।
યેન યજ્ઞઃ સમારબ્ધો જ્યોતિષ્ટોમો મહાવિધિઃ ॥ ૬૦॥

તત્ર પ્રજ્વલિતો વહ્નિસ્તસ્મિન્ત્યજ વપુઃ સ્વકમ્ ।
ઇદાનીં સુપવિત્રા ત્વં સમ્પૂર્ણોઽસ્તુ પણસ્તવ ॥ ૬૧॥

એતન્મયા સ્થાપિતં સ્વાકાર્યાર્થં ભો તપસ્વિનિ ।
તત્કુરુષ્વ મહાભાગે યાહિ યજ્ઞે મહામુનેઃ ।
કૃત્વા હિતં ચ દેવેશસ્તત્રૈવાન્તરધીયત ॥ ૬૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે સન્ધ્યાચરિત્રવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૨.૨.૬॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૭. સપ્તમોઽધ્યાયઃ । સન્ધ્યાયા અરુન્ધતીનામપ્રાપ્તીર્વસિષ્ઠેન સહ વિવાહશ્ચ ।

બ્રહ્મોવાચ ।
વરં દત્ત્વા મુને તસ્મિન્ શમ્ભાવન્તર્હિતે તદા ।
સન્ધ્યાપ્યગચ્છત્તત્રૈવ યત્ર મેધાતિથિર્મુનિઃ ॥ ૧॥

તત્ર શમ્ભોઃ પ્રસાદેન ન કેનાપ્યુપલક્ષિતા ।
સસ્માર વર્ણિનં તં વૈ સ્વોપદેશકરં તપઃ ॥ ૨॥

વસિષ્ઠેન પુરા સા તુ વર્ણીભૂત્વા મહામુને ।
ઉપદિષ્ટા તપશ્ચર્તું વચનાત્પરમેષ્ઠિનઃ ॥ ૩॥

તમેવ કૃત્વા મનસા તપશ્ચર્યોપદેશકમ્ ।
પતિત્વેન તદા સન્ધ્યા બ્રાહ્મણં બ્રહ્મચારિણમ્ ॥ ૪॥

સમિદ્ધેઽગ્નૌ મહાયજ્ઞે મુનિભિર્નોપલક્ષિતા ।
હૃષ્ટા શમ્ભુપ્રસાદેન સા વિવેશ વિધેઃ સુતા ॥ ૫॥

તસ્યાઃ પુરોડાશમયં શરીરં તત્ક્ષણાત્તતઃ ।
દગ્ધં હવ્યમયં ગન્ધં તસ્તાર યદલક્ષિતમ્ ॥ ૬॥

વહ્નિસ્તસ્યાઃ શરીરં તુ દગ્ધ્વા સૂર્યસ્ય મણ્ડલમ્ ।
શુદ્ધં પ્રવેશયામાસ શમ્ભોરેવાજ્ઞયા પુનઃ ॥ ૭॥

સૂર્યો દ્વ્યર્ધં વિભજ્યાથ તચ્છરીરં તદા રથે ।
સ્વકે સંસ્થાપયામાસ પ્રીતયે પિતૃદેવયોઃ ॥ ૮॥

તદૂર્ધ્વભાગસ્તસ્યાસ્તુ શરીરસ્ય મુનીશ્વર ।
પ્રાતઃસન્ધ્યાભવત્સા તુ અહોરાત્રાદિમધ્યગા ॥ ૯॥

તચ્છેષભાગસ્તસ્યાસ્તુ અહોરાત્રાન્તમધ્યગા ॥

સા સાયમભવત્સન્ધ્યા પિતૃપ્રીતિપ્રદા સદા ॥ ૧૦॥

સૂર્યોદયાત્તુ પ્રથમં યદા સ્યાદરુણોદયઃ ।
પ્રાતઃસન્ધ્યા તદોદેતિ દેવાનાં પ્રીતિકારિણી ॥ ૧૧॥

અસ્તં ગતે તતઃ સૂર્યે શોણપદ્મનિભે સદા ।
ઉદેતિ સાયંસન્ધ્યાપિ પિતૃણાં મોદકારિણી ॥ ૧૨॥

તસ્યાઃ પ્રાણાસ્તુ મનસા શમ્ભુનાથ દયાલુના ।
દિવ્યેન તુ શરીરેણ ચક્રિરે હિ શરીરિણઃ ॥ ૧૩॥

મુનેર્યજ્ઞાવસાને તુ સમ્પ્રાપ્તે મુનિના તુ સા ।
પ્રાપ્તા પુત્રી વહ્નિમધ્યે તપ્તકાઞ્ચનસુપ્રભા ॥ ૧૪॥

તાં જગ્રાહ તદા પુત્રીં મુનિરામોદસંયુતઃ ।
યજ્ઞાર્થં તાં તુ સંસ્નાપ્ય નિજક્રોડે દધૌ મુને ॥ ૧૫॥

અરુન્ધતીતિ તસ્યાસ્તુ નામ ચક્રે મહામુનિઃ ।
શિષ્યૈઃ પરિવૃતસ્તત્ર મહામોદમવાપ હ ॥ ૧૬॥

ન રુણદ્ધિ યતો ધર્મં સા કસ્માદપિ કારણાત્ ।
અતસ્ત્રિલોકે વિદિતં નામ સમ્પ્રાપ તત્સ્વયમ્ ॥ ૧૭॥

યજ્ઞં સમાપ્ય સ મુનિઃ કૃતકૃત્યભાવ-
માસાદ્ય સમ્મદયુતસ્તનયાપ્રલમ્ભાત્ ।
તસ્મિન્નિજાશ્રમપદે સહ શિષ્યવર્ગૈ-
સ્તામેવ સન્તતમસૌ દયતે સુરર્ષે ॥ ૧૮॥

અથ સા વવૃધે દેવી તસ્મિન્મુનિવરાશ્રમે ।
ચન્દ્રભાગાનદીતીરે તાપસારણ્યસંજ્ઞકે ॥ ૧૯॥

સમ્પ્રાપ્તે પઞ્ચમે વર્ષે ચન્દ્રભાગાં તદા ગુણૈઃ ।
તાપસારણ્યમપિ સા પવિત્રમકરોત્સતી ॥ ૨૦॥

વિવાહં કારયામાસુસ્તસ્યા બ્રહ્મસુતેન વૈ ।
વસિષ્ઠેન હ્યરુન્ધત્યા બ્રહ્મવિષ્ણુમહેશ્વરાઃ ॥ ૨૧॥

તદ્વિવાહે મહોત્સાહો બભૂવ સુખવર્ધનઃ ।
સર્વે સુરાશ્ચ મુનયઃ સુખમાપુઃ પરં મુને ॥ ૨૨॥

બ્રહ્મવિષ્ણુમહેશાનાં કરનિસ્સૃતતોયતઃ ।
સપ્તનદ્યઃ સમુત્પન્નાઃ શિપ્રાદ્યાઃ સુપવિત્રકાઃ ॥ ૨૩॥

અરુન્ધતી મહાસાધ્વી સાધ્વીનાં પ્રવરોત્તમા ।
વસિષ્ઠં પ્રાપ્ય સંરેજે મેધાતિથિસુતા મુને ॥ ૨૪॥

યસ્યાઃ પુત્રાઃ સમુત્પન્નાઃ શ્રેષ્ઠાઃ શક્ત્યાદયઃ શુભાઃ ।
વસિષ્ઠં પ્રાપ્ય તં કાન્તં સંરેજે મુનિસત્તમ ॥ ૨૫॥

એવં સન્ધ્યાચરિત્રં તે કથિતં મુનિસત્તમ ।
પવિત્રં પરમં દિવ્યં સર્વકામફલપ્રદમ્ ॥ ૨૬॥

ય ઇદં શૃણુયાન્નારી પુરુષો વા શુભવ્રતઃ ।
સર્વાન્કામાનવાપ્નોતિ નાત્ર કાર્યા વિચારણા ॥ ૨૭॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે અરુન્ધતીવસિષ્ઠવિવાહવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૨.૨.૭॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૮. અષ્ટમોઽધ્યાયઃ । વસન્તસ્વરૂપવર્ણનમ્ ।

સૂત ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય બ્રહ્મણો હિ પ્રજાપતેઃ ।
પ્રસન્નમાનસો ભૂત્વા તં પ્રોવાચ સ નારદઃ ॥ ૧॥

નારદ ઉવાચ ।
બ્રહ્મન્ વિધે મહાભાગ વિષ્ણુશિષ્ય મહામતે ।
ધન્યસ્ત્વં શિવભક્તો હિ પરતત્ત્વપ્રદર્શકઃ ॥ ૨॥

શ્રાવિતા સુકથા દિવ્યા શિવભક્તિવિવર્ધિની ।
અરુન્ધત્યાસ્તથા તસ્યાઃ સ્વરૂપાયાઃ પરે ભવે ॥ ૩॥

ઇદાનીં બ્રૂહિ ધર્મજ્ઞ પવિત્રં ચરિતં પરમ્ ।
શિવસ્ય પરપાપઘ્નં મઙ્ગલપ્રદમુત્તમમ્ ॥ ૪॥

ગૃહીતદારે કામે ચ હૃષ્ટે તેષુ ગતેષુ ચ ।
સન્ધ્યાયાં કિં તપસ્તપ્તું ગતાયામભવત્તતઃ ॥ ૫॥

સૂત ઉવાચ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય ઋષેર્વૈ ભાવિતાત્મનઃ ।
સુપ્રસન્નતરો ભૂત્વા બ્રહ્મા વચનમબ્રવીત્ ॥ ૬॥

બ્રહ્મોવાચ ।
શ‍ૃણુ નારદ વિપ્રેન્દ્ર તદેવ ચરિતં શુભમ્ ।
શિવલીલાન્વિતં ભક્ત્યા ધન્યસ્ત્વં શિવસેવકઃ ॥ ૭॥

અહં વિમોહિતસ્તાત યદૈવાન્તર્હિતઃ પુરા ।
અચિન્તયં સદાહં તચ્છમ્ભુવાક્યવિષાર્દિતઃ ॥ ૮॥

ચિન્તયિત્વા ચિરં ચિત્તે શિવમાયાવિમોહિતઃ ।
શિવે ચેર્ષ્યામકાર્ષં હિ તચ્છૃણુષ્વ વદામિ તે ॥ ૯॥

અથાહમગમં તત્ર યત્ર દક્ષાદયઃ સ્થિતાઃ ।
સરતિં મદનં દૃષ્ટ્વા સમદોઽહં હિ કિઞ્ચન ॥ ૧૦॥

દક્ષમાભાષ્ય સુપ્રીત્યા પરાન્પુત્રાંશ્ચ નારદ ।
અવોચં વચનં સોઽહં શિવમાયાવિમોહિતઃ ॥ ૧૧॥

બ્રહ્મોવાચ ।
હે દક્ષ હે મરીચ્યાદ્યાઃ સુતાઃ શ‍ૃણુત મદ્વચઃ ।
શ્રુત્વોપાયં વિધેયં હિ મમ કષ્ટાપનુત્તયે ॥ ૧૨॥

કાન્તાભિલાષમાત્રં મે દૃષ્ટ્વા શમ્ભુરગર્હયત્ ।
માં ચ યુષ્માન્મહાયોગી ધિક્કારં કૃતવાન્બહુ ॥ ૧૩॥

તેન દુઃખાભિતપ્તોઽહં લભેઽહં શર્મ ન ક્વચિત્ ।
યથા ગૃહ્ણાતુ કાન્તાં સ સ યત્નઃ કાર્ય એવ હિ ॥ ૧૪॥

યથા ગૃહ્ણાતુ કાન્તાં સ સુખી સ્યાં દુઃખવર્જિતઃ ।
દુર્લભઃ સ તુ કામો મે પરં મન્યે વિચારતઃ ॥ ૧૫॥

કાન્તાભિલાષમાત્રં મે દૃષ્ટ્વા શમ્ભુરગર્હયત્ ।
મુનીનાં પુરતઃ કસ્માત્સ કાન્તાં સઙ્ગ્રહીષ્યતિ ॥ ૧૬॥

કા વા નારી ત્રિલોકેઽસ્મિન્ યા ભવેત્તન્મનઃસ્થિતા ।
યોગમાર્ગમવજ્ઞાપ્ય તસ્ય મોહં કરિષ્યતિ ॥ ૧૭॥

મન્મથોઽપિ સમર્થો નો ભવિષ્યત્યસ્ય મોહને ।

નિતાન્તયોગી રામાણાં નામાપિ સહતે ન સઃ ॥ ૧૮॥

પરિગ્રહં વિના ચૈવ હરેણ કથયાદિના ।
મધ્યમા ચ ભવેત્સૃષ્ટિસ્તદ્વાચ્યા નાન્યવારિતા ॥ ૧૯॥

ભુવિ કેચિદ્ભવિષ્યન્તિ મમ વધ્યા મહાસુરાઃ ।
વધ્યાઃ કેચિદ્ધરેર્નૂનં કેચિચ્છમ્ભોરુપાયતઃ ॥ ૨૦॥

સંસારવિમુખે શમ્ભૌ તથૈકાન્તવિરાગિણિ ।
અસ્માદૃતે ન કર્માન્યત્ કરિષ્યતિ ન સંશયઃ ॥ ૨૧॥

ઇત્યુક્ત્વા તનયાંશ્ચાહં દક્ષાદીન્ સુનિરીક્ષ્ય ચ ।
સરતિં મદનં તત્ર સાનન્દમગદં તતઃ ॥ ૨૨॥

બ્રહ્મોવાચ ।
મત્પુત્રવર કામ ત્વં સર્વથા સુખદાયકઃ ।
મદ્વચઃ શૃણુ સુપ્રીત્યા સ્વપત્ન્યા પિતૃવત્સલ ॥ ૨૩॥

અનયા સહચારિણ્યા રાજસે ત્વં મનોભવ ।
એષા ચ ભવતા પત્યા યુક્તા સંશોભતે ભૃશમ્ ॥ ૨૪॥

યથા સ્ત્રિયા હૃષીકેશો હરિણા સા યથા રમા ।
ક્ષણદા વિધુના યુક્તા તયા યુક્તો યથા વિધુઃ ॥ ૨૫॥

તથૈવ યુવયોઃ શોભા દામ્પત્યં ચ પુરસ્કૃતમ્ ।
અતસ્ત્વં જગતઃ કેતુર્વિશ્વકેતુર્ભવિષ્યસિ ॥ ૨૬॥

જગદ્ધિતાય વત્સ ત્વં મોહયસ્વ પિનાકિનામ્ ।
યથાશુ સુમનઃ શમ્ભુઃ કુર્યાદ્દારપ્રતિગ્રહમ્ ॥ ૨૭॥

વિજને સ્નિગ્ધદેશે તુ પર્વતેષુ સરઃસુ ચ ।
યત્ર યત્ર પ્રયાતીશસ્તત્ર તત્રાનયા સહ ॥ ૨૮॥

મોહય ત્વં યતાત્માનં વનિતાવિમુખં હરમ્ ।
ત્વદૃતે વિદ્યતે નાન્યઃ કશ્ચિદસ્ય વિમોહકઃ ॥ ૨૯॥

ભૂતે હરે સાનુરાગે ભવતોઽપિ મનોભવ ।
શાપોપશાન્તિર્ભવિતા તસ્માદાત્મહિતં કુરુ ॥ ૩૦॥

સાનુરાગો વરારોહાં યદીચ્છતિ મહેશ્વરઃ ।
તદા ભવોઽપિ યોગ્યાર્થસ્ત્વાં ચ સન્તારયિષ્યતિ ॥ ૩૧॥

તસ્માજ્જાયાદ્વિતીયસ્ત્વં યતસ્વ હરમોહને ।
વિશ્વસ્ય ભવ કેતુસ્ત્વં મોહયિત્વા મહેશ્વરમ્ ॥ ૩૨॥

બ્રહ્મોવાચ ।
ઇતિ શ્રુત્વા વચો મે હિ જનકસ્ય જગત્પ્રભોઃ ।
ઉવાચ મન્મથસ્તથ્યં તદા માં જગતાં પતિમ્ ॥ ૩૩॥

મન્મથ ઉવાચ ।
કરિષ્યેઽહં તવ વિભો વચનાચ્છમ્ભુમોહનમ્ ।
કિં તુ યોષિન્મમાસ્ત્રં મે તત્કાન્તાં ભગવન્ સૃજ ॥ ૩૪॥

મયા સમ્મોહિતે શમ્ભૌ યયા તસ્યાનુમોહનમ્ ।
કર્તવ્યમધુના ધાતસ્તત્રોપાયં પરં કુરુ ॥ ૩૫॥

બ્રહ્મોવાચ ।
એવંવાદિનિ કન્દર્પે ધાતાહં સ પ્રજાપતિઃ ।
કયા સમ્મોહનીયોસાવિતિ ચિન્તામયામહમ્ ॥ ૩૬॥

ચિન્તાવિષ્ટસ્ય મે તસ્ય નિઃશ્વાસો યો વિનિઃસૃતઃ ।
તસ્માદ્વસન્તઃ સઞ્જાતઃ પુષ્પવ્રાતવિભૂષિતઃ ॥ ૩૭॥

શોણરાજીવસઙ્કાશઃ ફુલ્લતામરસેક્ષણઃ ।
સન્ધ્યોદિતાખણ્ડશશિપ્રતિમાસ્યઃ સુનાસિકઃ ॥ ૩૮॥

શાર્ઙ્ગવચ્ચરણાવર્તઃ શ્યામકુઞ્ચિતમૂર્ધજઃ ।
સન્ધ્યાંશુમાલિસદૃશઃ કુણ્ડલદ્વયમણ્ડિતઃ ॥ ૩૯॥

પ્રમત્તેભગતિઃ પીનાયતદોરુન્નતાંસકઃ ।
કમ્બુગ્રીવઃ સુવિસ્તીર્ણહૃદયઃ પીનસન્મુખઃ ॥ ૪૦॥

સર્વાઙ્ગસુન્દરઃ શ્યામઃ સમ્પૂર્ણઃ સર્વલક્ષણૈઃ ।
દર્શનીયતમઃ સર્વમોહનઃ કામવર્ધનઃ ॥ ૪૧॥

એતાદૃશે સમુત્પન્ને વસન્તે કુસુમાકરે ।
વવૌ વાયુઃ સુસુરભિઃ પાદપા અપિ પુષ્પિતાઃ ॥ ૪૨॥

પિકા વિનેદુઃ શતશઃ પઞ્ચમં મધુરસ્વનાઃ ।
પ્રફુલ્લપદ્મા અભવન્સરસ્યઃ સ્વચ્છપુષ્કરાઃ ॥ ૪૩॥

તમુત્પન્નમહં વીક્ષ્ય તદા તાદૃશમુત્તમમ્ ।
હિરણ્યગર્ભો મદનમગદં મધુરં વચઃ ॥ ૪૪॥

બ્રહ્મોવાચ ।
એવં સ મન્મથનિભઃ સદા સહચરોઽભવત્ ।
આનુકૂલ્યં તવ કૃતે સર્વં દેવઃ કરિષ્યતિ ॥ ૪૫॥

યથાગ્નેઃ પવનો મિત્રં સર્વત્રોપકરિષ્યતિ ।
તથાયં ભવતો મિત્રં સદા ત્વામનુયાસ્યતિ ॥ ૪૬॥

વસતેરન્તહેતુત્વાદ્વસન્તાખ્યો ભવત્વયમ્ ।
તવાનુગમનં કર્મ તથા લોકાનુરઞ્જનમ્ ॥ ૪૭॥

અસૌ વસન્તશૃઙ્ગારો વાસન્તો મલયાનિલઃ ।
ભવેત્તુ સુહૃદો ભાવઃ સદા ત્વદ્વશવર્તિનઃ ॥ ૪૮॥

વિવ્વોકાદ્યાસ્તથા હાવાશ્ચતુષ્ષષ્ટિકલાસ્તથા ।
રત્યાઃ કુર્વન્તુ સૌહૃદ્યં સુહૃદસ્તે યથા તવ ॥ ૪૯॥

એભિઃ સહચરૈઃ કામ વસન્તપ્રમુખૈર્ભવાન્ ।
મોહયસ્વ મહાદેવં રત્યા સહ મહોદ્યમઃ ॥ ૫૦॥

અહં તાં કામિનીં તાત ભાવયિષ્યામિ યત્નતઃ ।
મનસા સુવિચાર્યૈવ યા હરં મોહયિષ્યતિ ॥ ૫૧॥

બ્રહ્મોવાચ ।
એવમુક્તો મયા કામઃ સુરજ્યેષ્ઠેન હર્ષિતઃ ।
નનામ ચરણૌ મેઽપિ સ પત્નીસહિતસ્તદા ॥ ૫૨॥

દક્ષં પ્રણમ્ય તાન્ સર્વાન્માનસાનભિવાદ્ય ચ ।
યત્રાત્મા ગતવાન્ શમ્ભુસ્તત્સ્થાનં મન્મથો યયૌ ॥ ૫૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં સતીચરિત્રે દ્વિતીયે સતીખણ્ડે વસન્તસ્વરૂપવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૨.૨.૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૯. નવમોઽધ્યાયઃ । કામપ્રભાવ મારગણોત્પત્તિશ્ચ ।

બ્રહ્મોવાચ ।
તસ્મિન્ ગતે સાનુચરે શિવસ્થાનં ચ મન્મથે ।
ચરિત્રમભવચ્ચિત્રં તચ્છૃણુષ્વ મુનીશ્વર ॥ ૧॥

ગત્વા તત્ર મહાવીરો મન્મથો મોહકારકઃ ।
સ્વપ્રભાવં તતાનાશુ મોહયામાસ પ્રાણિનઃ ॥ ૨॥

વસન્તોઽપિ પ્રભાવં સ્વં ચકાર હરમોહનમ્ ।
સર્વે વૃક્ષા એકદૈવ પ્રફુલ્લા અભવન્મુને ॥ ૩॥

વિવિધાન્કૃતવાન્યત્નાન્ રત્યા સહ મનોભવઃ ।
જીવાઃ સર્વે વશં યાતાઃ સગણેશઃ શિવો ન હિ ॥ ૪॥

સમધોર્મદનસ્યાસન્પ્રયાસા નિષ્ફલા મુને ।
જગામ સ નિજસ્થાનં નિવૃત્ય વિમદસ્તદા ॥ ૫॥

કૃત્વા પ્રણામં વિધયે મહ્યં ગદ્ગદયા ગિરા ।
ઉવાચ મદનો માં ચોદાસીનો વિમદો મુને ॥ ૬॥

કામ ઉવાચ ।
બ્રહ્મન્ શમ્ભુર્મોહનીયો ન વૈ યોગપરાયણઃ ।
ન શક્તિર્મમ નાન્યસ્ય તસ્ય શમ્ભોર્હિ મોહને ॥ ૭॥

સમિત્રેણ મયા બ્રહ્મન્નુપાયા વિવિધાઃ કૃતાઃ ।
રત્યા સહાખિલાસ્તે ચ નિષ્ફલા અભવન્ શિવે ॥ ૮॥

શ ૃણુ બ્રહ્મન્યથાસ્માભિઃ કૃતા હિ હરમોહને ।
પ્રયાસાન્ વિવિધાઁસ્તાત ગદતસ્તાન્મુને મમ ॥ ૯॥

યદા સમાધિમાશ્રિત્ય સ્થિતઃ શમ્ભુર્નિયન્ત્રિતઃ ।
તદા સુગન્ધિવાતેન શીતલેનાતિવેગિના ॥ ૧૦॥

ઉદ્વેજયામિ રુદ્રં સ્મ નિત્યં મોહનકારિણા ।
પ્રયત્નતો મહાદેવં સમાધિસ્થં ત્રિલોચનમ્ ॥ ૧૧॥

સ્વસાયકાંસ્તથા પઞ્ચ સમાદાય શરાસનમ્ ।
તસ્યાભિતો ભ્રમતસ્તુ મોહયંસ્તદ્ગણાનહમ્ ॥ ૧૨॥

મમ પ્રવેશમાત્રેણ સુવશ્યાઃ સર્વજન્તવઃ ।
અભવદ્વિકૃતો નૈવ શઙ્કરઃ સગણઃ પ્રભુઃ ॥ ૧૩॥

યદા હિમવતઃ પ્રસ્થં સ ગતઃ પ્રમથાધિપઃ ।
તત્રાગતસ્તદૈવાહં સરતિઃ સમધુર્વિધે ॥ ૧૪॥

યદા મેરું ગતો રુદ્રો યદા વા નાગકેશરમ્ ।
કૈલાસં વા યદા યાતસ્તત્રાહં ગતવાંસ્તદા ॥ ૧૫॥

યદા ત્યક્તસમાધિસ્તુ હરસ્તસ્થૌ કદાચન ।
તદા તસ્ય પુરશ્ચક્રયુગં રચિતવાનહમ્ ॥ ૧૬॥

તચ્ચ ભ્રૂયુગલં બ્રહ્મન્ હાવભાવયુતં મુહુઃ ।
નાનાભાવાનકાર્ષીચ્ચ દામ્પત્યક્રમમુત્તમમ્ ॥ ૧૭॥

નીલકણ્ઠં મહાદેવં સગણં તત્પુરઃસ્થિતાઃ ।
અકાર્ષુર્મોહિતં ભાવં મૃગાશ્ચ પક્ષિણસ્તથા ॥ ૧૮॥

મયૂરમિથુનં તત્રાકાર્ષીદ્ભાવં રસોત્સુકમ્ ।
વિવિધાં ગતિમાશ્રિત્ય પાર્શ્વે તસ્ય પુરસ્તથા ॥ ૧૯॥

નાલભદ્ વિવરં તસ્મિન્ કદાચિદપિ મચ્છરઃ ।
સત્યં બ્રવીમિ લોકેશ મમ શક્તિર્ન મોહને ॥ ૨૦॥

મધુરપ્યકરોત્કર્મ યુક્તં યત્તસ્ય મોહને ।
તચ્છૃણુષ્વ મહાભાગ સત્યં સત્યં વદામ્યહમ્ ॥ ૨૧॥

ચમ્પકાન્કેશરાન્બાલાન્કારણાન્પાટલાંસ્તથા ।
નાગકેશરપુન્નાગાન્કિંશુકાન્કેતકાન્ વરાન્ ॥ ૨૨॥

માલતીમલ્લિકાપર્ણભારાન્કુરબકાંસ્તથા ।
ઉત્ફુલ્લયતિ તત્ર સ્મ યત્ર તિષ્ઠતિ વૈ હરઃ ॥ ૨૩॥

સરાંસ્યુત્ફુલ્લપદ્માનિ વીજયન્ મલયાનિલૈઃ ।
યત્નાત્સુગન્ધીન્યકરોદતીવ ગિરિશાશ્રમે ॥ ૨૪॥

લતાઃ સર્વાઃ સુમનસો ધત્તૂરાઙ્કુરસઞ્ચયાઃ ।
વૃક્ષાઙ્કં ચિરભાવેન વેષ્ટયન્તિ સ્મ તત્ર ચ ॥ ૨૫॥

તાન્વૃક્ષાંશ્ચ સુપુષ્પૌઘાન્ તૈઃ સુગન્ધિસમીરણૈઃ ।
દૃષ્ટ્વા કામવશં યાતા મુનયોઽપિ પરે કિમુ ॥ ૨૬॥

એવં સત્યપિ શમ્ભોર્ન દૃષ્ટં મોહસ્ય કારણમ્ ।
ભાવમાત્રમકાર્ષીન્નો કોપો મય્યપિ શઙ્કરઃ ॥ ૨૭॥

ઇતિ સર્વમહં દૃષ્ટ્વા જ્ઞાત્વા તસ્ય ચ ભાવનામ્ ।
વિમુખોઽહં શમ્ભુમોહાન્નિયતં તે વદામ્યહમ્ ॥ ૨૮॥

તસ્ય ત્યક્તસમાધેસ્તુ ક્ષણં નો દૃષ્ટિગોચરે ।
શક્નુયામો વયં સ્થાતું તં રુદ્રં કો વિમોહયેત્ ॥ ૨૯॥

જ્વલદગ્નિપ્રકાશાક્ષં જટારાશિકરાલિનમ્ ।
શ‍ૃઙ્ગિણં વીક્ષ્ય કઃ સ્થાતું બ્રહ્મન્ શક્નોતિ તત્પુરઃ ॥ ૩૦॥

બ્રહ્મોવાચ ।
મનોભવવચશ્ચેત્થં શ્રુત્વાહં ચતુરાનનઃ ।
વિવક્ષુરપિ નાવોચં ચિન્તાવિષ્ટોઽભવં તદા ॥ ૩૧॥

મોહનેઽહં સમર્થો ન હરસ્યેતિ મનોભવઃ ।
વચઃ શ્રુત્વા મહાદુઃખાન્નિરશ્વસમહં મુને ॥ ૩૨॥

નિશ્વાસમારુતા મે હિ નાનારૂપા મહાબલાઃ ।
જાતા ગણા લોલજિહ્વા લોલાશ્ચાતિભયઙ્કરાઃ ॥ ૩૩॥

અવાદયન્ત તે સર્વે નાનાવાદ્યાનસઙ્ખ્યકાન્ ।
પટહાદિગણાસ્તાંસ્તાન્ વિકરાલાન્મહારવાન્ ॥ ૩૪॥

અથ તે મમ નિઃશ્વાસસમ્ભવાશ્ચ મહાગણાઃ ।
મારયચ્છેદયેત્યૂચુર્બ્રહ્મણો મે પુરઃ સ્થિતાઃ ॥ ૩૫॥

તેષાં તુ વદતાં તત્ર મારયચ્છેદયેતિ મામ્ ।
વચઃ શ્રુત્વા વિધિં કામઃ પ્રવક્તુમુપચક્રમે ॥ ૩૬॥

મુનેઽથ માં સમાભાષ્ય તાન્ દૃષ્ટ્વા મદનો ગણાન્ ।
ઉવાચ વારયન્ બ્રહ્મન્ગણાનામગ્રતઃ સ્મરઃ ॥ ૩૭॥

કામ ઉવાચ ।
હે બ્રહ્મન્ હે પ્રજાનાથ સર્વસૃષ્ટિપ્રવર્તક ।
ઉત્પન્નાઃ ક ઇમે વીરા વિકરાલા ભયઙ્કરાઃ ॥ ૩૮॥

કિં કર્મૈતે કરિષ્યન્તિ કુત્ર સ્થાસ્યન્તિ વા વિધે ।

કિન્નામધેયા એતે તદ્વદ તત્ર નિયોજય ॥ ૩૯॥

નિયોજ્ય તાન્નિજે કૃત્યે સ્થાનં દત્ત્વા ચ નામ ચ ।
મામાજ્ઞાપય દેવેશ કૃપાં કૃત્વા યથોચિતામ્ ॥ ૪૦॥

બ્રહ્મોવાચ ।
ઇતિ તદ્વાક્યમાકર્ણ્ય મુનેઽહં લોકકારકઃ ।
તમવોચં હ મદનં તેષાં કર્માદિકં દિશન્ ॥ ૪૧॥

એત ઉત્પન્નમાત્રા હિ મારયેત્યવદન્ વચઃ ।
મુહુર્મુહુરતોઽમીષાં નામ મારેતિ જાયતામ્ ॥ ૪૨॥

સદૈવ વિઘ્નં જન્તૂનાં કરિષ્યન્તિ ગણા ઇમે ।
વિના નિજાર્ચનં કામ નાનાકામરતાત્મનામ્ ॥ ૪૩॥

તવાનુગમનં કર્મ મુખ્યમેષાં મનોભવ ।
સહાયિનો ભવિષ્યન્તિ સદા તવ ન સંશયઃ ॥ ૪૪॥

યત્ર યત્ર ભવાન્ યાતા સ્વકર્માર્થં યદા યદા ।
ગન્તારસ્તત્ર તત્રૈતે સહાયાર્થં તદા તદા ॥ ૪૫॥

ચિત્તભ્રાન્તિં કરિષ્યન્તિ ત્વદસ્ત્રવશવર્તિનામ્ ।
જ્ઞાનિનાં જ્ઞાનમાર્ગં ચ વિઘ્નયિષ્યન્તિ સર્વથા ॥ ૪૬॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચો મે હિ સરતિઃ સ મનોભવઃ ।
કિઞ્ચિત્પ્રસન્નવદનો બભૂવ મુનિસત્તમ ॥ ૪૭॥

શ્રુત્વા તેઽપિ ગણાઃ સર્વે મદનં માં ચ સર્વતઃ ।
પરિવાર્ય યથાકામં તસ્થુસ્તત્ર નિજાકૃતિમ્ ॥ ૪૮॥

અથ બ્રહ્મા સ્મરં પ્રીત્યાગદં મે કુરુ શાસનમ્ ।
એભિઃ સહૈવ ગચ્છ ત્વં પુનશ્ચ હરમોહને ॥ ૪૯॥

મન આધાય યત્નાનિ કુરુ મારગણૈઃ સહ ।
મોહો ભવેદ્યથા શમ્ભોર્દારગ્રહણહેતવે ॥ ૫૦॥

ઇત્યાકર્ણ્ય વચઃ કામઃ પ્રોવાચ વચનં પુનઃ ।
દેવર્ષે ગૌરવં મત્વા પ્રણમ્ય વિનયેન મામ્ ॥ ૫૧॥

કામ ઉવાચ ।

મયા સમ્યક્ કૃતં કર્મ મોહને તસ્ય યત્નતઃ ।
તન્મોહો નાભવત્તાત ન ભવિષ્યતિ નાધુના ॥ ૫૨॥

તવ વાગ્ગૌરવં મત્વા દૃષ્ટ્વા મારગણાનપિ ।
ગમિષ્યામિ પુનસ્તત્ર સદારોઽહં ત્વદાજ્ઞયા ॥ ૫૩॥

મનો નિશ્ચિતમેતદ્ધિ તન્મોહો ન ભવિષ્યતિ ।
ભસ્મ કુર્યાન્ન મે દેહમિતિ શઙ્કાસ્તિ મે વિધે ॥ ૫૪॥

ઇત્યુક્ત્વા સમધુઃ કામઃ સરતિઃ સભયસ્તદા ।
યયૌ મારગણૈઃ સાર્ધં શિવસ્થાનં મુનીશ્વર ॥ ૫૫॥

પૂર્વવત્ સ્વપ્રભાવં ચ ચક્રે મનસિજસ્તદા ।
બહૂપાયં સ હિ મધુર્વિવિધાં બુદ્ધિમાવહન્ ॥ ૫૬॥

ઉપાયં સ ચકારાતિ તત્ર મારગણોઽપિ ચ ।
મોહોઽભવન્ન વૈ શમ્ભોરપિ કશ્ચિત્પરાત્મનઃ ॥ ૫૭॥

નિવૃત્ય પુનરાયાતો મમ સ્થાનં સ્મરસ્તદા ।
આસીન્મારગણોઽગર્વોઽહર્ષો મેઽપિ પુરસ્થિતઃ ॥ ૫૮॥

કામઃ પ્રોવાચ માં તાત પ્રણમ્ય ચ નિરુત્સવઃ ।
સ્થિત્વા મમ પુરોઽગર્વો મારૈશ્ચ મધુના તદા ॥ ૫૯॥

કૃતં પૂર્વાદધિકતઃ કર્મ તન્મોહને વિધે ।
નાભવત્તસ્ય મોહોઽપિ કશ્ચિદ્ધ્યાનરતાત્મનઃ ॥ ૬૦॥

ન દગ્ધા મે તનુશ્ચૈવ તત્ર તેન દયાલુના ।
કારણં પૂર્વપુણ્યં ચ નિર્વિકારઃ સ વૈ પ્રભુઃ ॥ ૬૧॥

ચેદ્વરસ્તે હરો ભાર્યાં ગૃહ્ણીયાદિતિ પદ્મજ ।
પરોપાયં કુરુ તદા વિગર્વ ઇતિ મે મતિઃ ॥ ૬૨॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા સપરીવારો યયૌ કામઃ સ્વમાશ્રમમ્ ।
પ્રણમ્ય માં સ્મરન્ શમ્ભું ગર્વદં દીનવત્સલમ્ ॥ ૬૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં સતીખણ્ડે સત્યુપાખ્યાને કામપ્રભાવમારગણોત્પત્તિવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૨.૨.૯॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૧૦. દશમોઽધ્યાયઃ । બ્રહ્મવિષ્ણુસંવાદઃ ।

નારદ ઉવાચ ।
બ્રહ્મન્ વિધે મહાભાગ ધન્યસ્ત્વં શિવસક્તધીઃ ।
કથિતં સુચરિત્રં તે શઙ્કરસ્ય પરાત્મનઃ ॥ ૧॥

નિજાશ્રમે ગતે કામે સગણે સરતૌ તતઃ ।
કિમાસીત્કિમકાર્ષીસ્ત્વં તચ્ચરિત્રં વદાધુના ॥ ૨॥

બ્રહ્મોવાચ ।
શૃણુ નારદ સુપ્રીત્યા ચરિત્રં શશિમૌલિનઃ ।
યસ્ય શ્રવણમાત્રેણ નિર્વિકારો ભવેન્નરઃ ॥ ૩॥

નિજાશ્રમં ગતે કામે પરિવારસમન્વિતે ।
યદ્ બભૂવ તદા જાતં તચ્ચરિત્રં નિબોધ મે ॥ ૪॥

નષ્ટોઽભૂન્નારદ મદો વિસ્મયોઽભૂચ્ચ મે હૃદિ ।
નિરાનન્દસ્ય ચ મુનેઽપૂર્ણે નિજમનોરથે ॥ ૫॥

અશોચં બહુધા ચિત્તે ગૃહ્ણીયાત્સ કથં સ્ત્રિયમ્ ।
નિર્વિકારો જિતાત્મા સ શઙ્કરો યોગતત્પરઃ ॥ ૬॥

ઇત્થં વિચાર્ય બહુધા તદાહં વિમદો મુને ।
હરિં તં સોઽસ્મરં ભક્ત્યા શિવાત્માનં સ્વદેહદમ્ ॥ ૭॥

અસ્તવં ચ શુભસ્તોત્રૈર્દીનવાક્યસમન્વિતૈઃ ।
તચ્છ્રુત્વા ભગવાનાશુ બભૂવાવિર્હિ મે પુરા ॥ ૮॥

ચતુર્ભુજોઽરવિન્દાક્ષઃ શઙ્ખપદ્મગદાધરઃ ।
લસત્પીતપટઃ શ્યામતનુર્ભક્તપ્રિયો હરિઃ ॥ ૯॥

તં દૃષ્ટ્વા તાદૃશમહં સુશરણ્યં મુહુર્મુહુઃ ।
અસ્તવં ચ પુનઃ પ્રેમ્ણા બાષ્પગદ્ગદયા ગિરા ॥ ૧૦॥

હરિરાકર્ણ્ય તત્સ્તોત્રં સુપ્રસન્ન ઉવાચ મામ્ ।

દુઃખહા નિજભક્તાનાં બ્રહ્માણં શરણં ગતમ્ ॥ ૧૧॥

હરિરુવાચ ।
વિધે બ્રહ્મન્ મહાપ્રાજ્ઞ ધન્યસ્ત્વં લોકકારક ।
કિમર્થં સ્મરણં મેઽદ્ય કૃતં ચ ક્રિયતે નુતિઃ ॥ ૧૨॥

કિં જાતં તે મહદ્દુઃખં મદગ્રે તદ્વદાધુના ।
શમયિષ્યામિ તત્સર્વં નાત્ર કાર્યા વિચારણા ॥ ૧૩॥

બ્રહ્મોવાચ ।
ઇતિ વિષ્ણોર્વચઃ શ્રુત્વા કિઞ્ચિદુચ્છ્વસિતાનનઃ ।
અવોચં વચનં વિષ્ણું પ્રણમ્ય સુકૃતાઞ્જલિઃ ॥ ૧૪॥

દેવદેવ રમાનાથ મદ્વાર્તાં શ‍ૃણુ માનદ ।
શ્રુત્વા ચ કરુણાં કૃત્વા હર દુઃખં કમાવહ ॥ ૧૫॥

રુદ્રસમ્મોહનાર્થં હિ કામં પ્રેષિતવાનહમ્ ।
પરિવારયુતં વિષ્ણો સમારમધુબાન્ધવમ્ ॥ ૧૬॥

ચક્રુસ્તે વિવિધોપાયાન્ નિષ્ફલા અભવંશ્ચ તે ।
નાભવત્તસ્ય સમ્મોહો યોગિનઃ સમદર્શિનઃ ॥ ૧૭॥

ઇત્યાકર્ણ્ય વચો મે સ હરિર્માં પ્રાહ વિસ્મિતઃ ।
વિજ્ઞાતાખિલદો જ્ઞાની શિવતત્ત્વવિશારદઃ ॥ ૧૮॥

વિષ્ણુરુવાચ ।
કસ્માદ્ધેતોરિતિ મતિસ્તવ જાતા પિતામહ ।
સર્વં વિચાર્ય સુધિયા બ્રહ્મન્ સત્યં હિ તદ્વદ ॥ ૧૯॥

બ્રહ્મોવાચ ।
શ‍ૃણુ તાત ચરિત્રં તત્ તવ માયા વિમોહિની ।
તદધીનં જગત્સર્વં સુખદુઃખાદિતત્પરમ્ ॥ ૨૦॥

યયૈવ પ્રેષિતશ્ચાહં પાપં કર્તું સમુદ્યતઃ ।
આસં તચ્છૃણુ દેવેશ વદામિ તવ શાસનાત્ ॥ ૨૧॥

સૃષ્ટિપ્રારમ્ભસમયે દશ પુત્રા હિ જજ્ઞિરે ।
દક્ષાદ્યાસ્તનયા ચૈકા વાગ્ભવાપ્યતિસુન્દરી ॥ ૨૨॥

ધર્મો વક્ષઃસ્થલાત્કામો મનસોઽન્યોઽપિ દેહતઃ ।

જાતાસ્તત્ર સુતાં દૃષ્ટ્વા મમ મોહોઽભવદ્ધરે ॥ ૨૩॥

કુદૃષ્ટ્યા તાં સમદ્રાક્ષં તવ માયાવિમોહિતઃ ।
તત્ક્ષણાદ્ધર આગત્ય મામનિન્દત્સુતાનપિ ॥ ૨૪॥

ધિક્કારં કૃતવાન્ સર્વાન્ નિજં મત્વા પરં પ્રભુમ્ ।
જ્ઞાનિનં યોગિનં નાથં ભોગિનં વિજિતેન્દ્રિયમ્ ॥ ૨૫॥

પુત્રો ભૂત્વા મમ હરેઽનિન્દન્માં ચ સમક્ષતઃ ।
ઇતિ દુઃખં મહન્મે હિ તદુક્તં તવ સન્નિધૌ ॥ ૨૬॥

ગૃહ્ણીયાદ્યદિ પત્નીં સ સ્યાં સુખી નષ્ટદુઃખધીઃ ।
એતદર્થં સમાયાતઃ શરણં તવ કેશવ ॥ ૨૭॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચો મે હિ બ્રહ્મણો મધુસૂદનઃ ।
વિહસ્ય માં દ્રુતં પ્રાહ હર્ષયન્ભવકારકમ્ ॥ ૨૮॥

વિષ્ણુરુવાચ ।
વિધે શૃણુ હિ મદ્વાક્યં સર્વં ભ્રમનિવારણમ્ ।
સર્વં વેદાગમાદીનાં સમ્મતં પરમાર્થતઃ ॥ ૨૯॥

મહામૂઢમતિશ્ચાદ્ય સઞ્જાતોઽસિ કથં વિધે ।
વેદવક્તાપિ નિખિલલોકકર્તા હિ દુર્મતિઃ ॥ ૩૦॥

જડતાં ત્યજ મન્દાત્મન્ કુરુ ત્વં નેદૃશીં મતિમ્ ।
કિં બ્રુવન્ત્યખિલા વેદાઃ સ્તુત્યા તત્સ્મર સદ્ધિયા ॥ ૩૧॥

રુદ્રં જાનાસિ દુર્બુદ્ધે સ્વસુતં પરમેશ્વરમ્ ।
વેદવક્તાપિ વિજ્ઞાનં વિસ્મૃતં તેઽખિલં વિધે ॥ ૩૨॥

શઙ્કરં સુરસામાન્યં મત્વા દ્રોહં કરોષિ હિ ।
સુબુદ્ધિર્વિગતા તેઽદ્યાવિર્ભૂતા કુમતિસ્તથા ॥ ૩૩॥

તત્ત્વસિદ્ધાન્તમાખ્યાતં શૃણુ સદ્બુદ્ધિમાવહ ।
યથાર્થં નિગમાખ્યાતં નિર્ણીય ભવકારકમ્ ॥ ૩૪॥

શિવઃ સર્વસ્વકર્તા હિ ભર્તા હર્તા પરાત્પરઃ ।
પરબ્રહ્મ પરેશશ્ચ નિર્ગુણો નિત્ય એવ ચ ॥ ૩૫॥

અનિર્દેશ્યો નિર્વિકારઃ પરમાત્માદ્વયોઽચ્યુતઃ ।

અનન્તોઽન્તકરઃ સ્વામી વ્યાપકઃ પરમેશ્વરઃ ॥ ૩૬॥

સૃષ્ટિસ્થિતિવિનાશાનાં કર્તા ત્રિગુણભાગ્વિભુઃ ।
બ્રહ્મવિષ્ણુમહેશાખ્યો રજઃ સત્ત્વતમઃ પરઃ ॥ ૩૭॥

માયાભિન્નો નિરીહશ્ચ માયો માયાવિશારદઃ ।
સગુણોઽપિ સ્વતન્ત્રશ્ચ નિજાનન્દોઽવિકલ્પકઃ ॥ ૩૮॥

આત્મારામો હિ નિર્દ્વન્દ્વો ભક્તાધીનઃસુવિગ્રહઃ ।
યોગી યોગરતો નિત્યં યોગમાર્ગપ્રદર્શકઃ ॥ ૩૯॥

ગર્વાપહારી લોકેશઃ સર્વદા દીનવત્સલઃ ।
એતાદૃશો હિ યઃ સ્વામી સ્વપુત્રં મન્યસે હિ તમ્ ॥ ૪૦॥

ઈદૃશં ત્યજ કુજ્ઞાનં શરણં વ્રજ તસ્ય વૈ ।
ભજ સર્વાત્મના શમ્ભું સન્તુષ્ટઃ શં વિધાસ્યતિ ॥ ૪૧॥

ગૃહ્ણીયાચ્છઙ્કરઃ પત્નીં વિચારો હૃદિ ચેત્તવ ।
શિવામુદ્દિશ્ય સુતપઃ કુરુ બ્રહ્મન્ શિવં સ્મરન્ ॥ ૪૨॥

કુરુ ધ્યાનં શિવાયાત્સ્વં કામમુદ્દિશ્ય તં હૃદિ ।
સા ચેત્પ્રસન્ના દેવેશી સર્વં કાર્યં વિધાસ્યતિ ॥ ૪૩॥

કૃત્વાવતારં સગુણા યદિ સ્યાન્માનુષી શિવા ।
કસ્યચિત્તનયા લોકે સા તત્પત્ની ભવેદ્ ધ્રુવમ્ ॥ ૪૪॥

દક્ષમાજ્ઞાપય બ્રહ્મન્ તપઃ કુર્ય્યાત્પ્રયત્નતઃ ।
તામુત્પાદયિતું પત્નીં શિવાર્થં ભક્તિતઃ સ્વતઃ ॥ ૪૫॥

ભક્તાધીનૌ ચ તૌ તાત સુવિજ્ઞેયૌ શિવાશિવૌ ।
સ્વેચ્છયા સગુણૌ જાતૌ પરબ્રહ્મસ્વરૂપિણૌ ॥ ૪૬॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા તત્ક્ષણં મેશઃ શિવં સસ્માર સ્વપ્રભુમ્ ।
કૃપયા તસ્ય સમ્પ્રાપ્ય જ્ઞાનમૂચે ચ માં તતઃ ॥ ૪૭॥

વિષ્ણુરુવાચ ।
વિધે સ્મર પુરોક્તં યદ્વચનં શઙ્કરેણ ચ ।
પ્રાર્થિતેન યદાવાભ્યામુત્પન્નાભ્યાં તદિચ્છયા ॥ ૪૮॥

વિસ્મૃતં તવ તત્સર્વં ધન્યા યા શામ્ભવી પરા ।

તયા સમ્મોહિતં સર્વં દુર્વિજ્ઞેયા શિવં વિના ॥ ૪૯॥

યદા હિ સગુણો જાતઃ સ્વેચ્છયા નિર્ગુણઃ શિવઃ ।
મામુત્પાદ્ય તતસ્ત્વાં ચ સ્વશક્ત્યા સુવિહારકૃત્ ॥ ૫૦॥

ઉપાદિદેશ ત્વાં શમ્ભુઃ સૃષ્ટિકાર્યં તદા પ્રભુઃ ।
તત્પાલનં ચ માં બ્રહ્મન્ સોમઃ સૂતિકરોઽવ્યયઃ ॥ ૫૧॥

તદા વાં વેશ્મ સમ્પ્રાપ્તૌ સાઞ્જલી નતમસ્તકૌ ।
ભવ ત્વમસિ સર્વેશોઽવતારી ગુણરૂપધૃક્ ॥ ૫૨॥

ઇત્યુક્તઃ પ્રાહ સ સ્વામી વિહસ્ય કરુણાન્વિતઃ ।
દિવમુદ્વીક્ષ્ય સુપ્રીત્યા નાનાલીલાવિશારદઃ ॥ ૫૩॥

મદ્રૂપં પરમં વિષ્ણો ઈદૃશં હ્યઙ્ગતો વિધેઃ ।
પ્રકટીભવિતા લોકે નામ્ના રુદ્રઃ પ્રકીર્તિતઃ ॥ ૫૪॥

પૂર્ણરૂપઃ સ મે પૂજ્યઃ સદા વાં સર્વકામકૃત્ ।
લયકર્તા ગુણાધ્યક્ષો નિર્વિશેષઃ સુયોગકૃત્ ॥ ૫૫॥

ત્રિદેવા અપિ મે રૂપં હરઃ પૂર્ણો વિશેષતઃ ।
ઉમાયા અપિ રૂપાણિ ભવિષ્યન્તિ ત્રિધા સુતૌ ॥ ૫૬॥

લક્ષ્મીર્નામ હરેઃ પત્ની બ્રહ્મપત્ની સરસ્વતી ।
પૂર્ણરૂપા સતી નામ રુદ્રપત્ની ભવિષ્યતિ ॥ ૫૭॥

વિષ્ણુરુવાચ ।
ઇત્યુક્ત્વાન્તર્હિતો જાતઃ કૃપાં કૃત્વા મહેશ્વરઃ ।
અભૂતાં સુખિનાવાવાં સ્વસ્વકાર્યપરાયણૌ ॥ ૫૮॥

સમયં પ્રાપ્ય સસ્ત્રીકાવાવાં બ્રહ્મન્ન શઙ્કરઃ ।
અવતીર્ણઃ સ્વયં રુદ્રનામા કૈલાસસંશ્રયઃ ॥ ૫૯॥

અવતીર્ણા શિવાભૂત્સા સતી નામ પ્રજેશ્વર ।
તદુત્પાદનહેતોર્હિ યત્નોઽતઃ કાર્ય એવ વૈ ॥ ૬૦॥

ઇત્યુક્ત્વાન્તર્દધે વિષ્ણુઃ કૃત્વા સ કરુણાં પરામ્ ।
પ્રાપ્નુવં પ્રમુદં ચાથ હ્યધિકં ગતમત્સરઃ ॥ ૬૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસહિતાયાં દ્વિતીયે સતીખણ્ડે બ્રહ્મવિષ્ણુસંવાદો નામ દશમોઽધ્યાયઃ ॥ ૨.૨.૧૦॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૧૧. એકાદશોઽધ્યાયઃ । દુર્ગાસ્તુતિર્બ્રહ્મવરપ્રાપ્તિશ્ચ ।

નારદ ઉવાચ ।
બ્રહ્મન્ તાત મહાપ્રાજ્ઞ વદ નો વદતાં વર ।
ગતે વિષ્ણૌ કિમભવદકાર્ષીત્કિં વિધે ભવાન્ ॥ ૧॥

બ્રહ્મોવાચ ।
વિપ્રનન્દનવર્ય ત્વં સાવધાનતયા શ‌ૃણુ ।
વિષ્ણૌ ગતે ભગવતિ યદકાર્ષમહં ખલુ ॥ ૨॥

વિદ્યાવિદ્યાત્મિકાં શુદ્ધાં પરબ્રહ્મસ્વરૂપિણીમ્ ।
સ્તૌમિ દેવીં જગદ્ધાત્રીં દુર્ગાં શમ્ભુપ્રિયાં સદા ॥ ૩॥

સર્વત્ર વ્યાપિનીં નિત્યાં નિરાલમ્બાં નિરાકુલામ્ ।
ત્રિદેવજનનીં વન્દે સ્થૂલસ્થૂલામરૂપિણીમ્ ॥ ૪॥

ત્વં ચિતિઃ પરમાનન્દા પરમાત્મસ્વરૂપિણી ।
પ્રસન્ના ભવ દેવેશિ મત્કાર્યં કુરુ તે નમઃ ॥ ૫॥

એવં સંસ્તૂયમાના સા યોગનિદ્રા મયા મુને ।
આવિર્બભૂવ પ્રત્યક્ષં દેવર્ષે ચણ્ડિકા મમ ॥ ૬॥

સ્નિગ્ધાઞ્જનદ્યુતિશ્ચારુરૂપા દિવ્યચતુર્ભુજા ।
સિંહસ્થા વરહસ્તા ચ મુક્તામણિકચોત્કટા ॥ ૭॥

શરદિન્દ્વાનના શુભ્રચન્દ્રભાલા ત્રિલોચના ।
સર્વાવયવરમ્યા ચ કમલાઙ્ઘ્રિનખદ્યુતિઃ ॥ ૮॥

સમક્ષં તામુમાં વીક્ષ્ય મુને શક્તિં શિવસ્ય હિ ।
ભક્ત્યા વિનતતુઙ્ગાંશઃ પ્રાસ્તવં સુપ્રણમ્ય વૈ ॥ ૯॥

બ્રહ્મોવાચ ।

નમો નમસ્તે જગતઃપ્રવૃત્તિ-
નિવૃત્તિરૂપે સ્થિતિસર્ગરૂપે ।
ચરાચરાણાં ભવતી સુશક્તિઃ
સનાતની સર્વવિમોહનીતિ ॥ ૧૦॥

યા શ્રીઃ સદા કેશવમૂર્તિમાલા
વિશ્વમ્ભરા યા સકલં બિભર્તિ ।
યા ત્વં પુરા સૃષ્ટિકરી મહેશી
હર્ત્રી ત્રિલોકસ્ય પરા ગુણેભ્યઃ ॥ ૧૧॥

યા યોગિનાં વૈ મહિતા મનોજ્ઞા
સા ત્વં નમસ્તે પરમાણુસારે ।
યમાદિપૂતે હૃદિ યોગિનાં યા
યા યોગિનાં ધ્યાનપથે પ્રતીતા ॥ ૧૨॥

પ્રકાશશુદ્ધ્યાદિયુતા વિરાગા
સા ત્વં હિ વિદ્યા વિવિધાવલમ્બા ।
કૂટસ્થમવ્યક્તમનન્તરૂપં
ત્વં બિભ્રતી કાલમયી જગન્તિ ॥ ૧૩॥

વિકારબીજં પ્રકરોષિ નિત્યં
ગુણાન્વિતા સર્વજનેષુ નૂનમ્ ।
ત્વં વૈ ગુણાનાં ચ શિવે ત્રયાણાં
નિદાનભૂતા ચ તતઃ પરાસિ ॥ ૧૪॥

સત્વં રજસ્તામસ ઇત્યમીષાં
વિકારહીના સભુવસ્તુરીયા ।
સા ત્વં ગુણાનાં જગદેકહેતું
બ્રહ્માન્તરારમ્ભસિ ચાત્સિ પાસિ ॥ ૧૫॥

અશેષજગતાં બીજે જ્ઞેયજ્ઞાનસ્વરૂપિણિ ।
જગદ્ધિતાય સતતં શિવપત્નિ નમોઽસ્તુ તે ॥ ૧૬॥

ઇત્યાકર્ણ્ય વચઃ સા મે કાલી લોકવિભાવિની ।
પ્રીત્યા માં જગતામૂચે સ્રષ્ટારં જનશબ્દવત્ ॥ ૧૭॥

દેવ્યુવાચ ।

બ્રહ્મન્ કિમર્થં ભવતા સ્તુતાહમવધારય ।
ઉચ્યતાં યદિ ધૃષ્યોઽસિ તચ્છીઘ્રં પુરતો મમ ॥ ૧૮॥

પ્રત્યક્ષમપિ જાતાયાં સિદ્ધિઃ કાર્યસ્ય નિશ્ચિતા ।
તસ્માત્ત્વં વાઞ્છિતં બ્રૂહિ યા કરિષ્યામિ ભાવિતા ॥ ૧૯॥

બ્રહ્મોવાચ ।
શ‍ૃણુ દેવિ મહેશાનિ કૃપાં કૃત્વા મમોપરિ ।
મનોરથસ્થં સર્વજ્ઞે પ્રવદામિ ત્વદાજ્ઞયા ॥ ૨૦॥

યઃ પતિસ્તવ દેવેશિ લલાટાન્મેઽભવત્પુરા ।
શિવો રુદ્રાખ્યયા યોગી સ વૈ કૈલાસમાસ્થિતઃ ॥ ૨૧॥

તપશ્ચરતિ ભૂતેશ એક એવાવિકલ્પકઃ ।
અપત્નીકો નિર્વિકારો ન દ્વિતીયાં સમીહતે ॥ ૨૨॥

તં મોહય યથા ચાન્યાં દ્વિતીયાં સતિ વીક્ષતે ।
ત્વદૃતે તસ્ય નો કાચિદ્ભવિષ્યતિ મનોહરા ॥ ૨૩॥

તસ્માત્ત્વમેવ રૂપેણ ભવસ્વ હરમોહિની ।
સુતા ભૂત્વા ચ દક્ષસ્ય રુદ્રપત્ની શિવે ભવ ॥ ૨૪॥

યથા ધૃતશરીરા ત્વં લક્ષ્મીરૂપેણ કેશવમ્ ।
આમોદયસિ વિશ્વસ્ય હિતાયૈતં તથા કુરુ ॥ ૨૫॥

કાન્તાભિલાષમાત્રં મે દૃષ્ટ્વાનિન્દદ્ વૃષધ્વજઃ ।
સ કથં વનિતાં દેવી સ્વેચ્છયા સઙ્ગ્રહીષ્યતિ ॥ ૨૬॥

હરે ગૃહીતકાન્તે તુ કથં સૃષ્ટિઃ શુભાવહા ।
આદ્યન્તમધ્યે ચૈતસ્ય હેતૌ તસ્મિન્વિરાગિણિ ॥ ૨૭॥

ઇતિ ચિન્તાપરો નાહં ત્વદન્યં શરણં હિતમ્ ।
કૃચ્છ્રવાંસ્તેન વિશ્વસ્ય હિતાયૈતત્કુરુષ્વ મે ॥ ૨૮॥

ન વિષ્ણુસ્તસ્ય મોહાય ન લક્ષ્મીર્ન મનોભવઃ ।
ન ચાપ્યહં જગન્માતર્નાન્યસ્ત્વાં કોઽપિ વૈ વિના ॥ ૨૯॥

તસ્માત્ત્વં દક્ષજા ભૂત્વા દિવ્યરૂપા મહેશ્વરી ।
તત્પત્ની ભવ મદ્ભક્ત્યા યોગિનં મોહયેશ્વરમ્ ॥ ૩૦॥

દક્ષસ્તપતિ દેવેશિ ક્ષીરોદોત્તરતીરગઃ ।

ત્વામુદ્દિશ્ય સમાધાય મનસ્ત્વયિ દૃઢવ્રતઃ ॥ ૩૧॥

બ્રહ્મોવાચ
ઇત્યાકર્ણ્ય વચઃ સા ચિન્તામાપ શિવા તદા ।
ઉવાચ ચ સ્વમનસિ વિસ્મિતા જગદમ્બિકા ॥ ૩૨॥

દેવ્યુવાચ ।
અહો સુમહદાશ્ચર્યં વેદવક્તાઽપિ વિશ્વકૃત્ ।
મહાજ્ઞાનપરો ભૂત્વા વિધાતા કિં વદત્યયમ્ ॥ ૩૩॥

વિધેશ્ચેતસિ સઞ્જાતો મહામોહોઽસુખાવહઃ ।
યદ્વરં નિર્વિકારં તં સમ્મોહયિતુમિચ્છતિ ॥ ૩૪॥

હરમોહવરં મત્તઃ સમિચ્છતિ વિધિસ્ત્વયમ્ ।
કો લાભોઽસ્યાત્ર સ વિભુર્નિર્મોહો નિર્વિકલ્પકઃ ॥ ૩૫॥

પરબ્રહ્માખ્યો યઃ શમ્ભુર્નિર્ગુણો નિર્વિકારવાન્ ।
તસ્યાહં સર્વદા દાસી તદાજ્ઞાવશગા સદા ॥ ૩૬॥

સ એવ પૂર્ણરૂપેણ રુદ્રનામાભવચ્છિવઃ ।
ભક્તોદ્ધારણહેતોર્હિ સ્વતન્ત્રઃ પરમેશ્વરઃ ॥ ૩૭॥

હરેર્વિધેશ્ચ સ સ્વામી શિવાયૂનો ન કર્હિચિત્ ।
યોગાદરો હ્યમાયસ્થો માયેશઃ પરતઃ પરઃ ॥ ૩૮॥

મત્વા તમાત્મજં બ્રહ્મા સામાન્યસુરસન્નિભમ્ ।
ઇચ્છત્યયં મોહયિતુમતોઽજ્ઞાનવિમોહિતઃ ॥ ૩૯॥

ન દદ્યાચ્ચેદ્વરં વેદનીતિર્ભ્રષ્ટા ભવેદિતિ ।
કિં કુર્યાં યેન ન વિભુઃ ક્રુદ્ધઃ સ્યાન્મે મહેશ્વરઃ ॥ ૪૦॥

બ્રહ્મોવાચ ।
વિચાર્યેત્થં મહેશં તં સસ્માર મનસા શિવા ।
પ્રાપ્યાનુજ્ઞાં શિવસ્યાથોવાચ દુર્ગા ચ માં તદા ॥ ૪૧॥

દુર્ગોવાચ ।
યદુક્તં ભવતા બ્રહ્મન્ સમસ્તં સત્યમેવ તત્ ।
મદૃતે મોહયિત્રીહ શઙ્કરસ્ય ન વિદ્યતે ॥ ૪૨॥

હરેઽગૃહીતદારે તુ સૃષ્ટિર્નૈષા સનાતની ।

ભવિષ્યતીતિ તત્સત્યં ભવતા પ્રતિપાદિતમ્ ॥ ૪૩॥

મમાપિ મોહને યન્નો વિધતેઽસ્ય મહાપ્રભોઃ ।
ત્વદ્વાક્યાદ્ દ્વિગુણો મેઽદ્ય પ્રયત્નોઽભૂત્સ નિર્ભરઃ ॥ ૪૪॥

અહં તથા યતિષ્યામિ યથા દારપરિગ્રહમ્ ।
હરઃ કરિષ્યતિ વિધે સ્વયમેવ વિમોહિતઃ ॥ ૪૫॥

સતીમૂર્તિમહં ધૃત્વા તસ્યૈવ વશવર્તિની ।
ભવિષ્યામિ મહાભાગા લક્ષ્મીર્વિષ્ણોર્યથા પ્રિયા ॥ ૪૬॥

યથા સોઽપિ મયૈવેહ વશવર્તી સદા ભવેત્ ।
તથા યત્નં કરિષ્યામિ તસ્યૈવ કૃપયા વિધે ॥ ૪૭॥

ઉત્પન્ના દક્ષજાયાયાં સતીરૂપેણ શઙ્કરમ્ ।
અહં સભાજયિષ્યામિ લીલયા તં પિતામહ ॥ ૪૮॥

યથાન્યજન્તુરવનૌ વર્તતે વનિતાવશે ।
મદ્ભક્ત્યા સ હરો વામાવશવર્તી ભવિષ્યતિ ॥ ૪૯॥

બ્રહ્મોવાચ ।
મહ્યમિત્થં સમાભાષ્ય શિવા સા જગદમ્બિકા ।
વીક્ષ્યમાણા મયા તાત તત્રૈવાન્તર્દધે તતઃ ॥ ૫૦॥

તસ્યામન્તર્હિતાયાં તુ સોઽહં લોકપિતામહઃ ।
અગમં યત્ર સ્વસુતાસ્તેભ્યઃ સર્વમવર્ણયમ્ ॥ ૫૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે દુર્ગાસ્તુતિબ્રહ્મવરપ્રાપ્તિવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૨.૨.૧૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૧૨. દ્વાદશોઽધ્યાયઃ । દક્ષવરપ્રાપ્તિઃ ।

નારદ ઉવાચ ।
બ્રહ્મન્ શમ્ભુવર પ્રાજ્ઞ સમ્યગુક્તં ત્વયાનઘ ।

શિવાશિવચરિત્રં ચ પાવિતં જન્મ મે હિતમ્ ॥ ૧॥

ઇદાનીં વદ દક્ષસ્તુ તપઃ કૃત્વા દૃઢવ્રતઃ ।
કં વરં પ્રાપ દેવ્યાસ્તુ કથં સા દક્ષજાભવત્ ॥ ૨॥

બ્રહ્મોવાચ ।
શ઼ૃણુ નારદ ધન્યસ્ત્વં મુનિભિર્ભક્તિતોઽખિલૈઃ ।
યથા તેપે તપો દક્ષો વરં પ્રાપ ચ સુવ્રતઃ ॥ ૩॥

મદાજ્ઞપ્તઃ સુધીર્દક્ષઃ સમાધાય મહાધિપઃ ।
અયાધષ્ટું ચ તાં દેવીં તત્કામો જગદમ્બિકામ્ ॥ ૪॥

ક્ષીરોદોત્તરતીરસ્થાં તાં કૃત્વા હૃદયસ્થિતામ્ ।
તપસ્તમું સમારેભે દ્રષ્ટું પ્રત્યક્ષતોઽમ્બિકામ્ ॥ ૫॥

દિવ્યવર્ષેણ દક્ષસ્તુ સહસ્રાણાં ત્રયં સમાઃ ।
તપશ્ચચાર નિયતઃ સંયતાત્મા દૃઢવ્રતઃ ॥ ૬॥

મારુતાશી નિરાહારો જલાહારી ચ પર્ણભુક્ ।
એવં નિનાય તં કાલં ચિન્તયન્તાં જગન્મયીમ્ ॥ ૭॥

દુર્ગાધ્યાનસમાસક્તશ્ચિરં કાલં તપોરતઃ ।
નિયમૈર્બહુભિર્દેવીમારાધયતિ સુવ્રતઃ ॥ ૮॥

તતો યમાદિયુક્તસ્ય દક્ષસ્ય મુનિસત્તમ ।
જગદમ્બાં પૂજયતઃ પ્રત્યક્ષમભવચ્છિવા ॥ ૯॥

તતઃ પ્રત્યક્ષતો દૃષ્ટ્વા જગદમ્બાં જગન્મયીમ્ ।
કૃતકૃત્યમથાત્માનં મેને દક્ષઃ પ્રજાપતિઃ ॥ ૧૦॥

સિંહસ્થાં કાલિકાં કૃષ્ણાં ચારુવક્ત્રાં ચતુર્ભુજામ્ ।
વરદાભયનીલાબ્જખડ્ગહસ્તાં મનોહરામ્ ॥ ૧૧॥

આરક્તનયનાં ચારુમુક્તકેશીં જગત્પ્રસૂમ્ ।
તુષ્ટાવ વાગ્ભિશ્ચિત્રાભિઃ સુપ્રણમ્યાથ સુપ્રભામ્ । ૧૨॥

દક્ષ ઉવાચ ।
જગદબં મહામાયે જગદીશે મહેશ્વરિ ।
કૃપાં કૃત્વા નમસ્તેઽસ્તુ દર્શિતં સ્વવપુર્મમ ॥ ૧૩॥

પ્રસીદ ભગવત્યાદ્યે પ્રસીદ શિવરૂપિણિ ।

પ્રસીદ ભક્તવરદે જગન્માયે નમોઽસ્તુ તે ॥ ૧૪॥

બ્રહ્મોવાચ ।
ઇતિ સ્તુતા મહેશાની દક્ષેણ પ્રયતાત્મના ।
ઉવાચ દક્ષં જ્ઞાત્વાપિ સ્વયં તસ્યેપ્સિતં મુને ॥ ૧૫॥

દેવ્યુવાચ ।
તુષ્ટાહં દક્ષ ભવતઃ સદ્ભક્ત્યા હ્યનયા ભૃશમ્ ।
વરં વૃષણીષ્વ સ્વાભીષ્ટં નાદેયં વિદ્યતે તવ ॥ ૧૬॥

બ્રહ્મોવાચ ।
જગદમ્બાવચઃ શ્રુત્વા તતો દક્ષઃ પ્રજાપતિઃ ।
સુપ્રહૃષ્ટતરઃ પ્રાહ નામં નામં ચ તાં શિવામ્ ॥ ૧૭॥

દક્ષ ઉવાચ ।
જગદમ્બ મહામાયે યદિ ત્વં વરદા મમ ।
મદ્વચઃ શ ૃ ણુ સુપ્રીત્યા મમ કામં પ્રપૂરય ॥ ૧૮॥

મમ સ્વામી શિવો યો હિ સ જાતો બ્રહ્મણઃ સુતઃ ।
રુદ્રનામા પૂર્ણરૂપાવતારઃ પરમાત્મનઃ ॥ ૧૯॥

તવાવતારો નો જાતઃ કા તત્પત્ની ભવેદતઃ ।
તં મોહય મહેશાનમવતીર્ય ક્ષિતૌ શિવે ॥ ૨૦॥

ત્વદૃતે તસ્ય મોહાય ન શક્તાન્યા કદાચન ।
તસ્માન્મમ સુતા ભૂત્વા હરજાયા ભવાધુના ॥ ૨૧॥

ઇત્થં કૃત્વા સુલીલાં ચ ભવ ત્વં હરમોહિની ।
મમૈવૈષ વરો દેવિ સત્યમુક્તં તવાગ્રતઃ ॥ ૨૨॥

સ્વાર્થં ન કેવલં મેઽસ્તિ સર્વેષાં જગતામપિ ।
બ્રહ્મવિષ્ણુશિવાનાં ચ બ્રહ્મણા પ્રેરિતો હ્યહમ્ ॥ ૨૩॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય પ્રજેશસ્ય વચનં જગદમ્બિકા ।
પ્રત્યુવાચ વિહસ્યેતિ સ્મૃત્વા તં મનસા શિવમ્ ॥ ૨૪॥

દેવ્યુવાચ ।
તાત પ્રજાપતે દક્ષ શ ૃણુ મે પરમં વચઃ ।

સત્યં બ્રવીમિ ત્વદ્ભક્ત્યા સુપ્રસન્નાખિલપ્રદા ॥ ૨૫॥

અહં તવ સુતા દક્ષ ત્વજ્જાયાયાં મહેશ્વરી ।
ભવિષ્યામિ ન સન્દેહસ્ત્વદ્ભક્તિવશવર્તિની ॥ ૨૬॥

તથા યત્નં કરિષ્યામિ તપઃ કૃત્વા સુદુઃસહમ્ ।
હરજાયા ભવિષ્યામિ તદ્વરં પ્રાપ્ય ચાનઘ ॥ ૨૭॥

નાન્યથા કાર્યસિદ્ધિર્હિ નિર્વિકારી ચ સ પ્રભુઃ ।
વિધેર્વિષ્ણોશ્ચ સંસેવ્યઃ પૂર્ણ એવ સદાશિવઃ ॥ ૨૮॥

અહં તસ્ય સદા દાસી પ્રિયા જન્મનિ જન્મનિ ।
મમ સ્વામી સ વૈ શમ્ભુર્નાનારૂપધરોઽપિ હ ॥ ૨૯॥

વરપ્રભાવાદ્ ભ્રુકુટેરવતીર્ણો વિધેઃ સ ચ ।
અહં તદ્વરતોઽપીહાવતરિષ્યે તદાજ્ઞયા ॥ ૩૦॥

ગચ્છ સ્વભવનં તાત મયા જ્ઞાતા તુ દૂતિકા ।
હરજાયા ભવિષ્યામિ ભૂત્વા તે તનયાચિરાત્ ॥ ૩૧॥

ઇત્યુક્ત્વા સદ્વચો દક્ષં શિવાજ્ઞાં પ્રાપ્ય ચેતસિ ।
પુનઃ પ્રોવાચ સા દેવી સ્મૃત્વા શિવપદામ્બુજમ્ ॥ ૩૨॥

પરન્તુ પ્રણ આધેયો મનસા તે પ્રજાપતે ।
શ્રાવયિષ્યામિ તે તં વૈ સત્યં જાનીહિ નો મૃષા ॥ ૩૩॥

યદા ભવાન્ મયિ પુનર્ભવેન્મન્દાદરસ્તદા ।
દેહં ત્યક્ષ્યે નિજં સત્યં સ્વાત્મન્યસ્મ્યથ વેતરમ્ ॥ ૩૪॥

એષ દત્તસ્તવ વરઃ પ્રતિસર્ગં પ્રજાપતે ।
અહં તવ સુતા ભૂત્વા ભવિષ્યામિ હરપ્રિયા ॥ ૩૫॥

બ્રહ્મોવાચ ।
એવમુક્ત્વા મહેશાની દક્ષં મુખ્યપ્રજાપતિમ્ ॥

અન્તર્દધે દ્રુતં તત્ર સમ્યગ્ દક્ષસ્ય પશ્યતઃ । ૩૬॥

અન્તર્હિતાયાં દુર્ગાયાં સ દક્ષોઽપિ નિજાશ્રમમ્ ।
જગામ ચ મુદં લેભે ભવિષ્યતિ સુતેતિ સા ॥ ૩૭॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે દક્ષવરપ્રાપ્તિવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૨.૨.૧૨॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૧૩. ત્રયોદશોઽધ્યાયઃ । દક્ષસૃષ્ટૌ નારદશાપઃ ।

નારદ ઉવાચ ।
બ્રહ્મન્ વિધે મહાપ્રાજ્ઞ વદ નો વદતાં વર ।
દક્ષે ગૃહં ગતે પ્રીત્યા કિમભૂત્તદનન્તરમ્ ॥ ૧॥

બ્રહ્મોવાચ ।
દક્ષઃ પ્રજાપતિર્ગત્વા સ્વાશ્રમં હૃષ્ટમાનસઃ ।
સર્ગં ચકાર બહુધા માનસં મમ ચાજ્ઞયા ॥ ૨॥

તમબૃંહિતમાલોક્ય પ્રજાસર્ગં પ્રજાપતિઃ ।
દક્ષો નિવેદયામાસ બ્રહ્મણે જનકાય મે ॥ ૩॥

દક્ષ ઉવાચ ।
બ્રહ્મંસ્તાત પ્રજાનાથ વર્ધન્તે ન પ્રજાઃ પ્રભો
મયા વિરચિતાઃ સર્વાસ્તાવત્યો હિ સ્થિતાઃ ખલુ ॥ ૪॥

કિં કરોમિ પ્રજાનાથ વર્ધેયુઃ કથમાત્મના ।
તદુપાયં સમાચક્ષ્વ પ્રજાઃ કુર્યાં ન સંશયઃ ॥ ૫॥

બ્રહ્મોવાચ ।
દક્ષ પ્રજાપતે તાત શ‍ૃણુ મે પરમં વચઃ ।
તત્કુરુષ્વ સુરશ્રેષ્ઠ શિવસ્તે શં કરિષ્યતિ ॥ ૬॥

યા ચ પઞ્ચજનસ્યાઙ્ગસુતા રમ્યા પ્રજાપતેઃ ।
અસિક્ની નામ પત્નીત્વે પ્રજેશ પ્રતિગૃહ્યતામ્ ॥ ૭॥

વામવ્યવાયધર્મસ્ત્વં પ્રજાસર્ગમિમં પુનઃ ।
તદ્વિધાયાં ચ કામિન્યાં ભૂરિશો ભાવયિષ્યસિ ॥ ૮॥

બ્રહ્મોવાચ

તતઃસમુત્પાદયિતું પ્રજા મૈથુનધર્મતઃ ।
ઉપયેમે વીરણસ્ય નિદેશાન્મે સુતાં તતઃ ॥ ૯॥

અથ તસ્યાં સ્વપત્ન્યાં ચ વીરિણ્યાં સ પ્રજાપતિઃ ।
હર્યશ્વસંજ્ઞાનયુતં દક્ષઃ પુત્રાનજીજનત્ ॥ ૧૦॥

અપૃથગ્ધર્મશીલાસ્તે સર્વ આસન્ સુતા મુને ।
પિતૃભક્તિરતા નિત્યં વેદમાર્ગપરાયણાઃ ॥ ૧૧॥

પિતૃપ્રોક્તાઃ પ્રજાસર્ગકરણાર્થં યયુર્દિશમ્ ।
પ્રતીચીં તપસે તાત સર્વે દાક્ષાયણાઃ સુતાઃ ॥ ૧૨॥

તત્ર નારાયણસરસ્તીર્થં પરમપાવનમ્ ।
સઙ્ગમો યત્ર સઞ્જાતો દિવ્યસિન્ધુસમુદ્રયોઃ ॥ ૧૩॥

તદુપસ્પર્શનાદેવ પ્રોત્પન્નમતયોઽભવન્ ।
ધર્મે પારમહંસે ચ વિનિર્ધૂતમલાશયાઃ ॥ ૧૪॥

પ્રજાવિવૃદ્ધયે તે વૈ તેપિરે તત્ર સત્તમાઃ ।
દાક્ષાયણા દૃઢાત્માનઃ પિત્રાદેશેસુયન્ત્રિતા ॥ ૧૫॥

ત્વં ચ તાન્ નારદ જ્ઞાત્વા તપતઃ સૃષ્ટિહેતવે ।
અગમસ્તત્ર ભૂરીણિ હાર્દમાજ્ઞાય માપતેઃ ॥ ૧૬॥

અદૃષ્ટ્વા તં ભુવઃ સૃષ્ટિં કથં કર્તું સમુદ્યતાઃ ।
હર્યશ્વા દક્ષતનયા ઇત્યવોચંસ્તમાદરત્ ॥ ૧૭॥

બ્રહ્મોવાચ

તં નિશમ્યાથ હર્યશ્વાસ્તે ત્વદુક્તમતન્દ્રિતાઃ ।
ઔત્પત્તિકધિયઃ સર્વે સ્વયં વિમમૃશુર્ભૃશમ્ ॥ ૧૮॥

સુશાસ્ત્રજનકાદેશં યો ન વેદ નિવર્તકમ્ ।
સ કથં ગુણવિશ્રમ્ભી કર્તું સર્ગમુપક્રમેત્ ॥ ૧૯॥

ઇતિ નિશ્ચિત્ય તે પુત્રાઃ સુધિયશ્ચૈકચેતસઃ ।
પ્રણમ્ય તં પરિક્રમ્યાયુર્માર્ગમનિવર્તકમ્ ॥ ૨૦॥

નારદ ત્વં મનઃ શમ્ભોર્લોકાનન્યચરો મુને ।
નિર્વિકારો મહેશાનમનોવૃત્તિકરસ્તદા ॥ ૨૧॥

કાલે ગતે બહુતરે મમ પુત્રઃ પ્રજાપતિઃ ।
નાશં નિશમ્ય પુત્રાણાં નારદાદન્વતપ્યત ॥ ૨૨॥

મુહુર્મુહુરુવાચેતિ સુપ્રજત્વં શુચાં પદમ્ ।
શુશોચ બહુશો દક્ષઃ શિવમાયાવિમોહિતઃ ॥ ૨૩॥

અહમાગત્ય સુપ્રીત્યા સાન્ત્વયં દક્ષમાત્મજમ્ ।
શાન્તિભાવં પ્રદર્શ્યૈવ દૈવં પ્રબલમિત્યુત ॥ ૨૪॥

અથ દક્ષઃ પઞ્ચજન્યાં મયા સ પરિસાન્ત્વિતઃ ।
સબલાશ્વાભિધાન્ પુત્રાન્ સહસ્રં ચાપ્યજીજનત્ ॥ ૨૫॥

તેઽપિ જગ્મુસ્તત્ર સુતાઃ પિત્રાદિષ્ટા દૃઢવ્રતાઃ ।
પ્રજાસર્ગે યત્ર સિદ્ધાઃ સ્વપૂર્વભ્રાતરો યયુઃ ॥ ૨૬॥

તદુપસ્પર્શનાદેવ નષ્ટાઘા વિમલાશયાઃ ।
તેપુર્મહત્તપસ્તત્ર જપન્તો બ્રહ્મ સુવ્રતાઃ ॥ ૨૭॥

પ્રજાસર્ગોદ્યતાંસ્તાન્ વૈ જ્ઞાત્વા ગત્વેતિ નારદ ।
પૂર્વવચ્ચાગદો વાક્યં સંસ્મરન્નૈશ્વરીં ગતિમ્ ॥ ૨૮॥

ભ્રાતૃપન્થાનમાદિશ્ય ત્વં મુનેઽમોઘદર્શન ।
અયાશ્ચોર્ધ્વગતિં તેઽપિ ભ્રાતૃમાર્ગં યયુઃ સુતાઃ ॥ ૨૯॥

ઉત્પાતાન્ બહુશોઽપશ્યત્તદૈવ સ પ્રજાપતિઃ ।
વિસ્મિતોઽભૂત્સ મે પુત્રો દક્ષો મનસિ દુઃખિતઃ ॥ ૩૦॥

પૂર્વવત્ ત્વત્કૃતં દક્ષઃ શુશ્રાવ ચકિતો ભૃશમ્ ।
પુત્રનાશં શુશોચાતિ પુત્રશોકવિમૂર્ચ્છિતઃ ॥ ૩૧॥

ચુક્રોધ તુભ્યં દક્ષોઽસૌ દુષ્ટોઽયમિતિ ચાબ્રવીત્ ।
આગતસ્તત્ર દૈવાત્ ત્વમનુગ્રહકરસ્તદા ॥ ૩૨॥

શોકાવિષ્ટઃ સ દક્ષો હિ રોષવિસ્ફુરિતાધરઃ ।
ઉપલભ્ય તમાહત્ય ધિગ્ધિક્ પ્રોચ્ય વિગર્હયન્ ॥ ૩૩॥

દક્ષ ઉવાચ ।
કિં કૃતં તેઽધમશ્રેષ્ઠ સાધૂનાં સાધુલિઙ્ગતઃ ।
ભિક્ષોમાર્ગોઽર્ભકાનાં વૈ દર્શિતોઽસાધુકારિ નઃ ॥ ૩૪॥

ઋણૈસ્ત્રિભિરમુક્તાનાં લોકયોરુભયોઃ કૃતઃ ।

વિઘાતઃ શ્રેયસોઽમીષાં નિર્દયેન શઠેન તે ॥ ૩૫॥

ઋણાનિ ત્રીણ્યપાકૃત્ય યો ગૃહાત્પ્રવ્રજેત્પુમાન્ ।
માતરં પિતરં ત્યક્ત્વા મોક્ષમિચ્છન્ વ્રજત્યધઃ ॥ ૩૬॥

નિર્દયસ્ત્વં સુનિર્લજ્જઃ શિશુધીભિદ્યશોઽપહા ।
હરેઃ પાર્ષદમધ્યે હિ વૃથા ચરસિ મૂઢધીઃ ॥ ૩૭॥

મુહુર્મુહુરભદ્રં ત્વમચરો મેઽધમાધમ ।
વિભવેદ્ ભ્રમતસ્તેઽતઃ પદં લોકેષુ ન સ્થિરમ્ ॥ ૩૮॥

શશાપેતિ શુચા દક્ષસ્ત્વાં તદા સાધુસમ્મતમ્ ।
બુબોધ નેશ્વરેચ્છાં સ શિવમાયાવિમોહિતઃ ॥ ૩૯॥

શાપં પ્રત્યગ્રહીચ્ચ ત્વં સ મુને નિર્વિકારધીઃ ।
એષ એવ બ્રહ્મસાધો સહતે સોઽપિ ચ સ્વયમ્ ॥ ૪૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે દક્ષસૃષ્ટૌ નારદશાપો નામ ત્રયોદશોઽધ્યાયઃ ॥ ૨.૨.૧૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૧૪. ચતુર્દશોઽધ્યાયઃ । સતીજન્મ તસ્યા બાલલીલા ચ ।

બ્રહ્મોવાચ ।
એતસ્મિન્નન્તરે દેવમુને લોકપિતામહઃ ।
તત્રાગમમહં પ્રીત્યા જ્ઞાત્વા તચ્ચરિતં દ્રુતમ્ ॥ ૧॥

અસાન્ત્વયમહં દક્ષં પૂર્વવત્સુવિચક્ષણઃ ।
અકાર્ષં તેન સુસ્નેહં તવ સુપ્રીતિમાવહન્ ॥ ૨॥

સ્વાત્મજં મુનિવર્યં ત્વાં સુપ્રીત્યા દેવવલ્લભમ્ ।
સમાશ્વાસ્ય સમાદાય પ્રત્યપદ્યે સ્વધામ હ ॥ ૩॥

તતઃ પ્રજાપતિર્દક્ષોઽનુનીતો મે નિજસ્ત્રિયામ્ ।
જનયામાસ દુહિતૄઃ સુભગાઃ ષષ્ટિસમ્મિતાઃ ॥ ૪॥

તાસાં વિવાહં કૃતવાન્ ધર્માદિભિરતન્દ્રિતઃ ।
તદેવ શ઼ૃણુ સુપ્રીત્યા પ્રવદામિ મુનીશ્વર ॥ ૫॥

દદૌ દશ સુતા દક્ષો ધર્માય વિધિવન્મુને ।
ત્રયોદશ કશ્યપાય મુનયે ત્રિનવેન્દવે ॥ ૬॥

ભૂતાઙ્ગિરઃ કૃશાશ્વાભ્યાં દ્વે દ્વે પુત્ર્યૌ પ્રદત્તવાન્ ।
તાર્ક્ષ્યાય ચાપરાઃ કન્યાઃ પ્રસૂતિપ્રસવૈર્યતઃ ॥ ૭॥

ત્રિલોકાઃ પૂરિતાસ્તન્નો વર્ણ્યતે વ્યાસતો ભયાત્ । ૮॥

કેચિદ્વદન્તિ તાં જ્યેષ્ઠાં મધ્યમાં ચાપરે શિવામ્ ।
સર્વાનન્તરજાં કેચિત્કલ્પભેદાત્ ત્રયં ચ સત્ ॥ ૯॥

અનન્તરં સુતોત્પત્તેઃ સપત્નીકઃ પ્રજાપતિઃ ।
દક્ષો દધૌ સુપ્રીત્યા તાં મનસા જગદમ્બિકામ્ ॥ ૧૦॥

અતઃ પ્રેમ્ણા ચ તુષ્ટાવ ગિરા ગદ્ગદયા હિ સઃ ।
ભૂયો ભૂયો નમસ્કૃત્ય સાઞ્જલિર્વિનયાન્વિતઃ ॥ ૧૧॥

સન્તુષ્ટા સા તદા દેવી વિચારં મનસીતિ ચ ।
ચક્રેઽવતારં વીરિણ્યાં કુર્યાં પણવિપૂર્તયે ॥ ૧૨॥

અથ સોવાસ મનસિ દક્ષસ્ય જગદમ્બિકા ।
વિલલાસ તદાતીવ સ દક્ષો મુનિસત્તમ ॥ ૧૩॥

સુમુહૂર્તેન દક્ષોઽપિ સ્વપત્ન્યાં નિદધે મુદા ।
દક્ષપત્ન્યાસ્તદા ચિત્તે શિવોવાસ દયાન્વિતા ॥ ૧૪॥

આવિર્બભૂવ ચિહ્નાનિ દોહદસ્યાખિલાનિ વૈ । ૧૫॥

વિરેજે વીરિણી તાત હૃષ્ટચિત્તાધિકં ચ સા ।
શિવાવાસપ્રભાવાત્તુ મહામઙ્ગલરૂપિણી ॥ ૧૬॥

કુલસ્ય સમ્પ્રદાયૈશ્ચ શ્રુતેશ્ચિત્તસમુન્નતેઃ ।
વ્યધત્ત સુક્રિયા દક્ષઃ પ્રીત્યા પુંસવનાદિકાઃ ॥ ૧૭॥

ઉત્સવોઽતીવ સઞ્જાતસ્તદા તેષુ ચ કર્મસુ ।
વિત્તં દદૌ દ્વિજાતિભ્યો યથાકામં પ્રજાપતિઃ ॥ ૧૮॥

અથ તસ્મિન્નવસરે સર્વે હર્યાદયઃ સુરાઃ ।

જ્ઞાત્વા ગર્ભગતાં દેવીં વીરિણ્યાં તે મુદં યયુઃ ॥ ૧૯॥

તત્રાગત્ય ચ સર્વે તે તુષ્ટુવુર્જગદમ્બિકામ્ ।
લોકોપકારકરિણીં પ્રણમ્ય ચ મુહુર્મુહુઃ ॥ ૨૦॥

કૃત્વા તતસ્તે બહુધા પ્રશંસાં હૃષ્ટમાનસાઃ ।
દક્ષપ્રજાપતેશ્ચૈવ વીરિણ્યાઃ સ્વગૃહં યયુઃ ॥ ૨૧॥

ગતેષુ નવમાસેષુ કારયિત્વા ચ લૌકિકીમ્ ।
ગતિં શિવા ચ પૂર્ણે સા દશમે માસિ નારદ ॥ ૨૨॥

આવિર્બભૂવ પુરતો માતુઃ સદ્યસ્તદા મુને ।
મુહૂર્તે સુખદે ચન્દ્રગ્રહતારાનુકૂલકે ॥ ૨૩॥

તસ્યાં તુ જાતમાત્રાયાં સુપ્રીતોઽસૌ પ્રજાપતિઃ ।
શૈવદેવીતિ તાં મેને દૃષ્ટ્વા તાં તેજસોલ્બણામ્ ॥ ૨૪॥

તદાભૂત્પુષ્પસદ્વૃષ્ટિર્મેઘાશ્ચ વવૃષુર્જલમ્ ।
દિશઃ શાન્તા દ્રુતં તસ્યાં જાતાયાં ચ મુનીશ્વર ॥ ૨૫॥

અવાદયન્ત ત્રિદશાઃ શુભવાદ્યાનિ ખે ગતાઃ ।
જજ્જ્વલુશ્ચાગ્નયઃ શાન્તાઃ સર્વમાસીત્સુમઙ્ગલમ્ ॥ ૨૬॥

વીરિણીસમ્ભવાં દૃષ્ટ્વા દક્ષસ્તાં જગદમ્બિકામ્ ।
નમસ્કૃત્ય કરૌ બદ્ધ્વા બહુ તુષ્ટાવ ભક્તિતઃ ॥ ૨૭॥

દક્ષ ઉવાચ ।
મહેશાનિ નમસ્તુભ્યં જગદમ્બે સનાતનિ ।
કૃપાં કુરુ મહાદેવિ સત્યે સત્યસ્વરૂપિણિ ॥ ૨૮॥

શિવા શાન્તા મહામાયા યોગનિદ્રા જગન્મયી ।
યા પ્રોચ્યતે વેદવિદ્ભિર્નમામિ ત્વાં હિતાવહામ્ ॥ ૨૯॥

યયા ધાતા જગત્સૃષ્ટૌ નિયુક્તસ્તાં પુરાકરોત્ ।
તાં ત્વાં નમામિ પરમાં જગદ્ધાત્રીં મહેશ્વરીમ્ ॥ ૩૦॥

યયા વિષ્ણુર્જગત્સ્થિત્યૈ નિયુક્તસ્તાં સદાકરોત્ ।
તાં ત્વાં નમામિ પરમાં જગદ્ધાત્રીં મહેશ્વરીમ્ ॥ ૩૧॥

યયા રુદ્રો જગન્નાશે નિયુક્તસ્તાં સદાકરોત્ ।
તાં ત્વાં નમામિ પરમાં જગદ્ધાત્રીં મહેશ્વરીમ્ ॥ ૩૨॥

રજઃસત્ત્વતમોરૂપાં સર્વકાર્યકરીં સદા ।
ત્રિદેવજનનીં દેવીં ત્વાં નમામિ ચ તાં શિવામ્ ॥ ૩૩॥

યસ્ત્વાં વિચિન્તયેદ્ દેવિ વિદ્યાવિદ્યાત્મિકાં પરામ્ ।
તસ્ય ભુક્તિશ્ચ મુક્તિશ્ચ સદા કરતલે સ્થિતા ॥ ૩૪॥

યસ્ત્વાં પ્રત્યક્ષતો દેવિ શિવાં પશ્યતિ પાવનીમ્ ।
તસ્યાવશ્યં ભવેન્મુક્તિર્વિદ્યાવિદ્યાપ્રકાશિકા ॥ ૩૫॥

યે સ્તુવન્તિ જગન્માતર્ભવાનીમમ્બિકેતિ ચ ।
જગન્મયીતિ દુર્ગેતિ સર્વં તેષાં ભવિષ્યતિ ॥ ૩૬॥

બ્રહ્મોવાચ ।
ઇતિ સ્તુતા જગન્માતા શિવા દક્ષેણ ધીમતા ।
તથોવાચ તદા દક્ષં યથા માતા શૃણોતિ ન ॥ ૩૭॥

સર્વં સમ્મોહ્ય તથ્યં ચ તથા દક્ષઃ શૃણોતુ તત્ ।
નાન્યસ્તથા શિવા પ્રાહ નાનોતિઃ પરમેશ્વરી ॥ ૩૮॥

દેવ્યુવાચ ।
અહમારાધિતા પૂર્વં સુતાર્થં તે પ્રજાપતે ।
ઈપ્સિતં તવ સિદ્ધં તુ તપો ધારય સમ્પ્રતિ ॥ ૩૯॥

બ્રહ્મોવાચ ।
એવમુક્ત્વા તદા દેવી દક્ષં ચ નિજમાયયા ।
આસ્થાય શૈશવં ભાવં જનન્યન્તે રુરોદ સા ॥ ૪૦॥

અથ તદ્ રોદનં શ્રુત્વા સ્ત્રિયો વાક્યં સસમ્ભ્રમાઃ ।
આગતાસ્તત્ર સુપ્રીત્યા દાસ્યોઽપિ ચ સસમ્ભ્રમાઃ ॥ ૪૧॥

દૃષ્ટ્વાસિક્નીસુતારૂપં નનન્દુઃ સર્વયોષિતઃ ।
સર્વે પૌરજનાશ્ચાપિ ચક્રુર્જયરવં તદા ॥ ૪૨॥

ઉત્સવશ્ચ મહાનાસીદ્ ગાનવાદ્યપુરઃસરમ્ ।
દક્ષોઽસિક્ની મુદં લેભે શુભં દૃષ્ટ્વા સુતાનનમ્ ॥ ૪૩॥

દક્ષઃ શ્રુતિકુલાચારં ચક્રે ચ વિધિવત્તદા ।
દાનં દદૌ દ્વિજાતિભ્યોઽન્યેભ્યશ્ચ દ્રવિણં તથા ॥ ૪૪॥

બભૂવ સર્વતો ગાનં નર્તનં ચ યથોચિતમ્ ।
નેદુર્વાદ્યાનિ બહુશઃ સુમઙ્ગલપુરઃસરમ્ ॥ ૪૫॥

અથ હર્યાદયો દેવાઃ સર્વે સાનુચરાસ્તદા ।
મુનિવૃન્દૈઃ સમાગત્યોત્સવં ચક્રુર્યથાવિધિ ॥ ૪૬॥

દૃષ્ટ્વા દક્ષસુતામમ્બાં જગતઃ પરમેશ્વરીમ્ ।
નેમુઃ સવિનયાઃ સર્વે તુષ્ટુવુશ્ચ શુભૈઃ સ્તવૈઃ ॥ ૪૭॥

ઊચુઃ સર્વે પ્રમુદિતા ગિરં જયજયાત્મિકામ્ ।
પ્રશશંસુર્મુદા દક્ષં વીરિણીં ચ વિશેષતઃ ॥ ૪૮॥

તદોમેતિ નામ ચક્રે તસ્યા દક્ષસ્તદાજ્ઞયા ।
પ્રશસ્તાયાઃ સર્વગુણૈઃ સત્ત્વાદપિ મુદાન્વિતઃ ॥ ૪૯॥

નામાન્યન્યાનિ તસ્યાસ્તુ પશ્ચાજ્જાતાનિ લોકતઃ ।
મહામઙ્ગલદાન્યેવ દુઃખઘ્નાનિ વિશેષતઃ ॥ ૫૦॥

દક્ષસ્તદા હરિં નત્વા માં સર્વાનમરાનપિ ।
મુનીનપિ કરૌ બદ્ધ્વા સ્તુત્વા ચાનર્ચ ભક્તિતઃ ॥ ૫૧॥

અથ વિષ્ણ્વાદયઃ સર્વે સુપ્રશસ્યાજનન્દનમ્ ।
પ્રીત્યા યયુઃ સ્વધામાનિ સંસ્મરન્ સશિવં શિવમ્ ॥ ૫૨॥

અતસ્તાં ચ સુતાં માતા સુસંસ્કૃત્ય યથોચિતમ્ ।
શિશુપાનેન વિધિના તસ્યૈ સ્તન્યાદિકં દદૌ ॥ ૫૩॥

પાલિતા સાથ વીરિણ્યા દક્ષેણ ચ મહાત્મના ।
વવૃધે શુક્લપક્ષસ્ય યથા શશિકલાન્વહમ્ ॥ ૫૪॥

તસ્યાં તુ સદ્ગુણાઃ સર્વે વિવિશુર્દ્વિજસત્તમ ।
શૈશવેઽપિ યથા ચન્દ્રે કલાઃ સર્વા મનોહરાઃ ॥ ૫૫॥

આચરન્નિજભાવેન સખીમધ્યગતા યદા ।
તદા લિલેખ ભર્ગસ્ય પ્રતિમામન્વહં મુહુઃ ॥ ૫૬॥

યદા જગૌ સુગીતાનિ શિવા બાલ્યોચિતાનિ સા ।
તદા સ્થાણું હરં રુદ્રં સસ્માર સ્મરશાસનમ્ ॥ ૫૭॥

વવૃધેઽતીવ દમ્પત્યોઃ પ્રત્યહં કરુણાતુલા ।
તસ્યા બાલ્યેઽપિ ભક્તાયાસ્તયોર્નિત્યં મુહુર્મુહુઃ ॥ ૫૮॥

સર્વબાલગુણાક્રાન્તાં સદા સ્વાલયકારિણીમ્ ।
તોષયામાસ પિતરૌ નિત્યં નિત્યં મુહુર્મુહુઃ ॥ ૫૯॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં સતીખણ્ડે સતીજન્મબાલલીલાવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૨.૨.૧૪॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૧૫. પઞ્ચદશોઽધ્યાયઃ । નન્દાવ્રતવિધાનં શિવસ્તુતિકથનઞ્ચ ।

બ્રહ્મોવાચ ।
અથૈકદા પિતુઃ પાર્શ્વે તિષ્ઠન્તીં તાં સતીમહમ્ ।
ત્વયા સહ મુનેઽદ્રાક્ષં સારભૂતાં ત્રિલોકકે ॥ ૧॥

પિત્રા નમસ્કૃતં વીક્ષ્ય સત્કૃતં ત્વાં ચ માં સતી ।
પ્રણનામ મુદા ભક્ત્યા લોકલીલાનુસારિણી ॥ ૨॥

પ્રણામાન્તે સતીં વીક્ષ્ય દક્ષદત્તશુભાસને ।
સ્થિતોઽહં નારદ ત્વં ચ વિનતામહમાગદમ્ ॥ ૩॥

ત્વામેવ યઃ કામયતે યં તુ કામયસે સતિ ।
તમાપ્નુહિ પતિં દેવં સર્વજ્ઞં જગદીશ્વરમ્ ॥ ૪॥

યો નાન્યાં જગૃહે નાપિ ગૃહ્ણાતિ ન ગ્રહીષ્યતિ ।
જાયાં સ તે પતિર્ભૂયાદનન્યસદૃશઃ શુભે ॥ ૫॥

ઇત્યુક્ત્વા સુચિરં તાં વૈ સ્થિત્વા દક્ષાલયે પુનઃ ।
વિસૃષ્ટૌ તેન સંયાતૌ સ્વસ્થાનં તૌ ચ નારદ ॥ ૬॥

દક્ષોઽભવચ્ચ સુપ્રીતસ્તદાકર્ણ્ય ગતજ્વરઃ ।
આદદે તનયાં સ્વાં તાં મત્વા હિ પરમેશ્વરીમ્ ॥ ૭॥

ઇત્થં વિહારૈ રુચિરૈઃ કૌમારૈર્ભક્તવત્સલા ।
જહાવવસ્થાં કૌમારીં સ્વેચ્છાધૃતનરાકૃતિઃ ॥ ૮॥

બાલ્યં વ્યતીત્ય સા પ્રાપ કિઞ્ચિદ્યૌવનતાં સતી ।
અતીવ તપસાઙ્ગેન સર્વાઙ્ગેષુ મનોહરા ॥ ૯॥

દક્ષસ્તાં વીક્ષ્ય લોકેશઃ પ્રોદ્ભિન્નાન્તર્વયઃસ્થિતામ્ ।
ચિન્તયામાસ ભર્ગાય કથં દાસ્ય ઇમાં સુતામ્ ॥ ૧૦॥

અથ સાપિ સ્વયં ભર્ગં પ્રાપ્તુમૈચ્છત્તદાન્વહમ્ ।
પિતુર્મનોગતિં જ્ઞાત્વા માતુર્નિકટમાગતા ॥ ૧૧॥

પપ્રચ્છાજ્ઞાં તપોહેતોઃ શઙ્કરસ્ય વિશાલધીઃ ।
માતુઃ શિવાથ વીરિણ્યાઃ સા સતી પરમેશ્વરી ॥ ૧૨॥

તતઃ સતી મહેશાનં પતિં પ્રાપ્તું દૃઢવ્રતા ।
સા તમારાધયામાસ ગૃહે માતુરનુજ્ઞયા ॥ ૧૩॥

આશ્વિને માસિ નન્દાયાં તિથાવાનર્ચ ભક્તિતઃ ।
ગુડૌદનૈઃ સલવણૈર્હરં નત્વા નિનાય તમ્ ॥ ૧૪॥

કાર્તિકસ્ય ચતુર્દશ્યામપૂપૈઃ પાયસૈરપિ ।
સમાકીર્ણૈઃ સમારાધ્ય સસ્માર પરમેશ્વરમ્ ॥ ૧૫॥

માર્ગશીર્ષેઽસિતાષ્ટમ્યાં સતિલૈઃ સયવૌદનૈઃ ।
પૂજયિત્વા હરં કીલૈર્નિનાય દિવસાન્ સતી ॥ ૧૬॥

પૌષે તુ શુક્લસપ્તમ્યાં કૃત્વા જાગરણં નિશિ ।
અપૂજયચ્છિવં પ્રાતઃ કૃશરાન્નેન સા સતી ॥ ૧૭॥

માઘે તુ પૌર્ણમાસ્યાં સા કૃત્વા જાગરણં નિશિ ।
આર્દ્રવસ્ત્રા નદીતીરેઽકરોચ્છઙ્કરપૂજનમ્ ॥ ૧૮॥

તપસ્યાસિતભૂતાયાં કૃત્વા જાગરણં નિશિ ।
વિશેષતઃ સમાનર્ચ શૈલૂષૈઃ સર્વયામસુ ॥ ૧૯॥

ચૈત્રે શુક્લચતુર્દશ્યાં પલાશૈર્દમનૈઃ શિવમ્ ।
અપૂજયદ્દિવારાત્રૌ સંસ્મરન્ સા નિનાય તમ્ ॥ ૨૦॥

માઘશુક્લતૃતીયાયાં તિલાહારયવૌદનૈઃ ।
પૂજયિત્વા સતી રુદ્રં ગવ્યૈર્માસં નિનાય તમ્ ॥ ૨૧॥

જ્યેષ્ઠસ્ય પૂર્ણિમાયાં વૈ રાત્રૌ સમ્પૂજ્ય શઙ્કરમ્ ।
વસનૈર્બૃહતીપુષ્પૈર્નિરાહારા નિનાય તમ્ ॥ ૨૨॥

આષાઢસ્ય ચતુર્દશ્યાં શુક્લાયાં કૃષ્ણવાસસા ।
બૃહતીકુસુમૈઃ પૂજા રુદ્રસ્યાકારિ વૈ તથા ॥ ૨૩॥

શ્રાવણસ્ય સિતાષ્ટમ્યાં ચતુર્દશ્યાં ચ સા શિવમ્ ।
યજ્ઞોપવીતૈર્વાસોભિઃ પવિત્રૈરપ્યપૂજયત્ ॥ ૨૪॥

ભાદ્રે કૃષ્ણત્રયોદશ્યાં પુષ્પૈર્નાનાવિધૈઃ ફલૈઃ ।
સમ્પૂજ્ય ચ ચતુર્દશ્યાં ચકાર જલભોજનમ્ ॥ ૨૫॥

નાનાવિધૈઃ ફલૈઃ પુષ્પૈઃ સસ્યૈસ્તત્કાલસમ્ભવૈઃ ।
ચક્રે સુનિયતાહારા જપન્માસે શિવાર્ચનમ્ ॥ ૨૬॥

સર્વમાસે સર્વદિને શિવાર્ચનરતા સતી ।
દૃઢવ્રતાભવદ્દેવી સ્વેચ્છાધૃતનરાકૃતિઃ ॥ ૨૭॥

ઇત્થં નન્દાવ્રતં કૃત્સ્નં સમાપ્ય સુસમાહિતા ।
દધ્યૌ શિવં સતી પ્રેમ્ણા નિશ્ચલાભૂદનન્યધીઃ ॥ ૨૮॥

એતસ્મિન્નન્તરે દેવા મુનયશ્ચાખિલા મુને ।
વિષ્ણું માં ચ પુરસ્કૃત્ય યયુર્દ્રષ્ટું સતીતપઃ ॥ ૨૯॥

દૃષ્ટાગત્ય સતી દેવૈર્મૂર્તા સિદ્ધિરિવાપરા ।
શિવધ્યાનમહામગ્ના સિદ્ધાવસ્થાં ગતા તદા ॥ ૩૦॥

ચક્રુઃ સર્વે સુરાઃ સત્યૈ મુદા સાઞ્જલયો નતિમ્ ।
મુનયશ્ચ નતસ્કન્ધા વિષ્ણ્વાદ્યાઃ પ્રીતમાનસાઃ ॥ ૩૧॥

અથ સર્વે સુપ્રસન્નાઃ વિષ્ણ્વાદ્યાશ્ચ સુરર્ષયઃ ।
પ્રશશંસુસ્તપસ્તસ્યાઃ સત્યાસ્તસ્માત્સવિસ્મયાઃ ॥ ૩૨॥

તતઃ પ્રણમ્ય તાં દેવીં પુનસ્તે મુનયઃ સુરાઃ ।
જગ્મુર્ગિરિવરં સદ્યઃ કૈલાસં શિવવલ્લભમ્ ॥ ૩૩॥

સાવિત્રીસહિતશ્ચાહં સહ લક્ષ્મ્યા મુદાન્વિતઃ ।
વાસુદેવોઽપિ ભગવાઞ્જગામાથ હરાન્તિકમ્ ॥ ૩૪॥

ગત્વા તત્ર પ્રભું દૃષ્ટ્વા સુપ્રણમ્ય સસમ્ભ્રમાઃ ।
તુષ્ટુવુર્વિવિધૈઃ સ્તોત્રૈઃ કરૌ બદ્ધ્વા વિનમ્રકાઃ ॥ ૩૫॥

દેવા ઊચુઃ ।

નમો ભગવતે તુભ્યં યત એતચ્ચરાચરમ્ ।
પુરુષાય મહેશાય પરેશાય મહાત્મને ॥ ૩૬॥

આદિબીજાય સર્વેષાં ચિદ્રૂપાય પરાય ચ ।
બ્રહ્મણે નિર્વિકારાય પ્રકૃતેઃ પુરુષસ્ય ચ ॥ ૩૭॥

ય ઇદં પ્રતિપચ્યેદં યેનેદં વિચકાસ્તિ હિ ।
યસ્માદિદં યતશ્ચેદં યસ્યેદં ત્વં ચ યત્રતઃ ॥ ૩૮॥

યોઽસ્માત્પરસ્માચ્ચ પરો નિર્વિકારી મહાપ્રભુઃ ।
ઈક્ષતે યઃ સ્વાત્મનીદં તં નતાઃ સ્મ સ્વયમ્ભુવમ્ ॥ ૩૯॥

અવિદ્ધદૃક્ પરઃ સાક્ષી સર્વાત્માનેકરૂપધૃક્ ।
આત્મભૂતઃ પરબ્રહ્મ તપન્તં શરણં ગતાઃ ॥ ૪૦॥

ન યસ્ય દેવા ઋષયઃ સિદ્ધાશ્ચ ન વિદુઃ પદમ્ ।
કઃ પુનર્જન્તુરપરો જ્ઞાતુમર્હતિ વેદિતુમ્ ॥ ૪૧॥

દિદૃક્ષવો યસ્ય પદં મુક્તસઙ્ગાઃ સુસાધવઃ ।
ચરિતં સુગતિર્નસ્ત્વં સલોકવ્રતમવ્રણમ્ ॥ ૪૨॥

ત્વજ્જન્માદિવિકારા નો વિદ્યન્તે કેઽપિ દુઃખદાઃ ।
તથાપિ માયયા ત્વં હિ ગૃહ્ણાસિ કૃપયા ચ તાન્ ॥ ૪૩॥

તસ્મૈ નમઃ પરેશાય તુભ્યમાશ્ચર્યકર્મણે ।
નમો ગિરાં વિદૂરાય બ્રહ્મણે પરમાત્મને ॥ ૪૪॥

અરૂપાયોરુરૂપાય પરાયાનન્તશક્તયે ।
ત્રિલોકપતયે સર્વસાક્ષિણે સર્વગાય ચ ॥ ૪૫॥

નમ આત્મપ્રદીપાય નિર્વાણસુખસમ્પદે ।
જ્ઞાનાત્મને નમસ્તેઽસ્તુ વ્યાપકાયેશ્વરાય ચ ॥ ૪૬॥

નૈષ્કર્મ્યેણ સુલભ્યાય કૈવલ્યપતયે નમઃ ।
પુરુષાય પરેશાય નમસ્તે સર્વદાય ચ ॥ ૪૭॥

ક્ષેત્રજ્ઞાયાત્મરૂપાય સર્વપ્રત્યયહેતવે ॥ ૪૮॥

સર્વાધ્યક્ષાય મહતે મૂલપ્રકૃતયે નમઃ ।
પુરુષાય પરેશાય નમસ્તે સર્વદાય ચ ॥ ૪૯॥

ત્રિનેત્રાયેષુવક્ત્રાય સદાભાસાય તે નમઃ ।
સર્વેન્દ્રિયગુણદ્રષ્ટ્રે નિષ્કારણ નમોઽસ્તુ તે ॥ ૫૦॥

ત્રિલોકકારણાયાથાપવર્ગાય નમો નમઃ ।
અપવર્ગપ્રદાયાશુ શરણાગતતારિણે ॥ ૫૧॥

સર્વામ્નાયાગમાનાં ચોદધયે પરમેષ્ઠિને ।
પરાયણાય ભક્તાનાં ગુણાનાં ચ નમોઽસ્તુ તે ॥ ૫૨॥

નમો ગુણારણિચ્છન્નચિદૂષ્માય મહેશ્વર ।
મૂઢદુષ્પ્રાપ્તરૂપાય જ્ઞાનિહૃદ્વાસિને સદા ॥ ૫૩॥

પશુપાશવિમોક્ષાય ભક્તસન્મુક્તિદાય ચ ।
સ્વપ્રકાશાય નિત્યાયાવ્યયાયાજસ્રસંવિદે ॥ ૫૪॥

પ્રત્યગ્દ્રષ્ટેઽવિકારાય પરમૈશ્વર્યધારિણે ।
યં ભજન્તિ ચતુર્વર્ગે કામયન્તીષ્ટસદ્ગતિમ્ ॥

સોઽભૂદકરુણસ્ત્વં નઃ પ્રસન્નો ભવ તે નમઃ ॥ ૫૫॥

એકાન્તિનઃ કઞ્ચનાર્થં ભક્તા વાઞ્છન્તિ યસ્ય ન ।
કેવલં ચરિતં તે તે ગાયન્તિ પરમઙ્ગલમ્ ॥ ૫૬॥

અક્ષરં પરમં બ્રહ્મ તમવ્યક્તાકૃતિં વિભુમ્ ।
અધ્યાત્મયોગગમ્યં ત્વાં પરિપૂર્ણં સ્તુમો વયમ્ ॥ ૫૭॥

અતીન્દ્રિયમનાધારં સર્વાધારમહેતુકમ્ ।
અનન્તમાદ્યં સૂક્ષ્મં ત્વાં પ્રણમામોઽખિલેશ્વરમ્ ॥ ૫૮॥

હર્યાદયોઽખિલા દેવાસ્તથા લોકાશ્ચરાચરાઃ ।
નામરૂપવિભેદેન ફલ્ગ્વ્યા ચ કલયા કૃતાઃ ॥ ૫૯॥

યથાર્ચિષોઽગ્નેઃ સવિતુર્યાન્તિ નિર્યાન્તિ વાસકૃત્ ।
ગભસ્તયસ્તથાયં વૈ પ્રવાહો ગૌણ ઉચ્યતે ॥ ૬૦॥

ન ત્વં દેવોઽસુરો મર્ત્યો ન તિર્યઙ્ ન દ્વિજઃ પ્રભો ।
ન સ્ત્રી ન ષણ્ઢો ન પુમાન્સદસન્ન ચ કિઞ્ચન ॥ ૬૧॥

નિષેધશેષઃ સર્વં ત્વં વિશ્વકૃદ્વિશ્વપાલકઃ ।
વિશ્વલયકૃદ્વિશ્વાત્મા પ્રણતાઃ સ્મઃ તમીશ્વરમ્ ॥ ૬૨॥

યોગરન્ધિતકર્માણો યં પ્રપશ્યન્તિ યોગિનઃ ।
યોગસમ્ભાવિતે ચિત્તે યોગેશં ત્વાં નતા વયમ્ ॥ ૬૩॥

નમોઽસ્તુ તેઽસહ્યવેગ શક્તિત્રય ત્રયીમય ।
નમઃ પ્રસન્નપાલાય નમસ્તે ભૂરિશક્તયે ॥ ૬૪॥

કદિન્દ્રિયાણાં દુર્ગેશાનવાપ્ય પરવર્ત્મને ।
ભક્તોદ્ધારરતાયાથ નમસ્તે ગૂઢવર્ચસે ॥ ૬૫॥

યચ્છક્ત્યાહન્ધિયાત્માનં હન્ત વેદ ન મૂઢધીઃ ।
તં દુરત્યયમાહાત્મ્યં ત્વાં નતાઃ સ્મો મહાપ્રભુમ્ ॥ ૬૬॥

બ્રહ્મોવાચ ।
ઇતિ સ્તુત્વા મહાદેવં સર્વે વિષ્ણ્વાદિકાઃ સુરાઃ ।
તૂષ્ણીમાસન્પ્રભોરગ્રે સદ્ભક્તિનતકન્ધરાઃ ॥ ૬૭॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે નન્દાવ્રતવિધાનશિવસ્તુતિવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૨.૨.૧૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૧૬. ષોડશોઽધ્યાયઃ । બ્રહ્મવિષ્ણુકૃતા શિવપ્રાર્થના ।

બ્રહ્મોવાચ ।
ઇતિ સ્તુતિં ચ હર્યાદિકૃતામાકર્ણ્ય શઙ્કરઃ ।
બભૂવાતિપ્રસન્નો હિ વિજહાસ ચ સૂતિકૃત્ ॥ ૧॥

બ્રહ્મવિષ્ણૂ તુ દૃષ્ટ્વા તૌ સસ્ત્રીકૌ સઙ્ગતૌ હરઃ ।
યથોચિતં સમાભાષ્ય પપ્રચ્છાગમનં તયોઃ ॥ ૨॥

રુદ્ર ઉવાચ ।
હે હરે હે વિધે દેવા મુનયશ્ચાદ્ય નિર્ભયાઃ ।
નિજાગમનહેતું હિ કથયધ્વં સુતત્ત્વતઃ ॥ ૩॥

કિમર્થમાગતા યૂયં કિં કાર્યં ચેહ વિદ્યતે ।

તત્સર્વં શ્રોતુમિચ્છામિ ભવત્સ્તુત્યા પ્રસન્નધીઃ ॥ ૪॥

બ્રહ્મોવાચ ।
ઇતિ પૃષ્ટે હરેણાહં સર્વલોકપિતામહઃ ।
મુનેઽવોચં મહાદેવં વિષ્ણુના પરિચોદિતઃ ॥ ૫॥

દેવદેવ મહાદેવ કરુણાસાગર પ્રભો ।
યદર્થમાગતાવાવાં તચ્છૃણુ ત્વં સુરર્ષિભિઃ ॥ ૬॥

વિશેષતસ્તવૈવાર્થમાગતા વૃષભધ્વજ ।
સહાર્થિનઃ સદા યોગ્યમન્યથા ન જગદ્ભવેત્ ॥ ૭॥

કેચિદ્ભવિષ્યન્ત્યસુરા મમ વધ્યા મહેશ્વર ।
હરેર્વધ્યાસ્તથા કેચિદ્ભવન્તશ્ચાપિ કેચન ॥ ૮॥

કેચિત્ત્વદ્વીર્યજાતસ્ય તનયસ્ય મહાપ્રભો ।
માયાવધ્યાઃ પ્રભો કેચિદ્ભવિષ્યન્ત્યસુરાઃ સદા ॥ ૯॥

તવૈવ કૃપયા શમ્ભોઃ સુરાણાં સુખમુત્તમમ્ ।
નાશયિત્વાસુરાન્ ઘોરાઞ્જગત્સ્વાસ્થ્યં સદાભયમ્ ॥ ૧૦॥

યોગયુક્તે ત્વયિ સદા રાગદ્વેષવિવર્જિતે ।
દયામાત્રૈકનિરતે ન વધ્યા હ્યથવા તવ ॥ ૧૧॥

આરાધિતેષુ તેષ્વીશ કથં સૃષ્ટિસ્તથા સ્થિતિઃ ।
અતશ્ચ ભવિતા યુક્તં નિત્યં નિત્યં વૃષધ્વજ ॥ ૧૨॥

સૃષ્ટિસ્થિત્યન્તકર્માણિ ન કાર્યાણિ યદા તદા ।
શરીરભેદમસ્માકં માયાયાશ્ચ ન યુજ્યતે ॥ ૧૩॥

એકસ્વરૂપા હિ વયં ભિન્નાઃ કાર્યસ્ય ભેદતઃ ।
કાર્યભેદો ન સિદ્ધશ્ચેદ્રૂપભેદોઽપ્રયોજનઃ ॥ ૧૪॥

એક એવ ત્રિધા ભિન્નઃ પરમાત્મા મહેશ્વરઃ ।
માયાયાઃ કારણાદેવ સ્વતન્ત્રો લીલયા પ્રભુઃ ॥ ૧૫॥

વામાઙ્ગજો હરિસ્તસ્ય દક્ષિણાઙ્ગભવો હ્યહમ્ ।
શિવસ્ય હૃદયાજ્જાતસ્ત્વં હિ પૂર્ણતનુઃ શિવઃ ॥ ૧૬॥

ઇત્થં વયં ત્રિધા ભૂતાઃ પ્રભો ભિન્નસ્વરૂપિણઃ ।
શિવાશિવસુતાસ્તત્ત્વં હૃદા વિદ્ધિ સનાતન ॥ ૧૭॥

અહં વિષ્ણુશ્ચ સસ્ત્રીકૌ સઞ્જાતૌ કાર્યહેતુતઃ ।
લોકકાર્યકરૌ પ્રીત્યા તવ શાસનતઃ પ્રભો ॥ ૧૮॥

તસ્માદ્વિશ્વહિતાર્થાય સુરાણાં સુખહેતવે ।
પરિગૃહ્ણીષ્વ ભાર્યાર્થે રામામેકાં સુશોભનામ્ ॥ ૧૯॥

અન્યચ્છૃણુ મહેશાન પૂર્વવૃત્તં સ્મૃતં મયા ।
યન્નો પુરઃ પુરા પ્રોક્તં ત્વયૈવ શિવરૂપિણા ॥ ૨૦॥

મદ્રૂપં પરમં બ્રહ્મન્નીદૃશં ભવદઙ્ગતઃ ।
પ્રકટીભવિતા લોકે નામ્ના રુદ્રઃ પ્રકીર્તિતઃ ॥ ૨૧॥

સૃષ્ટિકર્તાભવદ્ બ્રહ્મા હરિઃ પાલનકારકઃ ।
લયકારી ભવિષ્યામિ રુદ્રરૂપો ગુણાકૃતિઃ ॥ ૨૨॥

સ્ત્રિયં વિવાહ્ય લોકસ્ય કરિષ્યે કાર્યમુત્તમમ્ ।
ઇતિ સંસ્મૃત્ય સ્વપ્રોક્તં પૂર્ણં કુરુ નિજં પણમ્ ॥ ૨૩॥

નિદેશસ્તવ ચ સ્વામિન્નહં સૃષ્ટિકરો હરિઃ ।
પાલકો લયહેતુસ્ત્વમાવિર્ભૂતઃ સ્વયં શિવઃ ॥ ૨૪॥

ત્વાં વિના ન સમર્થૌ હિ આવાં ચ સ્વસ્વકર્મણિ ।
લોકકાર્યરતાં તસ્માદેકાં ગૃહ્ણીષ્વ કામિનીમ્ ॥ ૨૫॥

યથા પદ્માલયા વિષ્ણોઃ સાવિત્રી ચ યથા મમ ।
તથા સહચરીં શમ્ભો કાન્તાં ગૃહ્ણીષ્વ સમ્પ્રતિ ॥ ૨૬॥

બ્રહ્મોવાચ ।
ઇતિ શ્રુત્વા વચો મે હિ બ્રહ્મણઃ પુરતો હરેઃ ।
સ માં જગાદ લોકેશઃ સ્મેરાનનમુખો હરઃ ॥ ૨૭॥

ઈશ્વર ઉવાચ ।
હે બ્રહ્મન્ હે હરે મે હિ યુવાં પ્રિયતરૌ સદા ।
દૃષ્ટ્વા વાં ચ મમાનન્દો ભવત્યતિતરાં ખલુ ॥ ૨૮॥

યુવાં સુરવિશિષ્ટૌ હિ ત્રિભુવસ્વામિનૌ કિલ ।
કથનં વાં ગરિષ્ઠેતિ ભવકાર્યરતાત્મનોઃ ॥ ૨૯॥

ઉચિતં ન સુરશ્રેષ્ઠૌ વિવાહકરણં મમ ।

તપોરતવિરક્તસ્ય સદા વિદિતયોગિનઃ ॥ ૩૦॥

યો નિવૃત્તિસુમાર્ગસ્થઃ સ્વાત્મારામો નિરઞ્જનઃ ।
અવધૂતતનુર્જ્ઞાની સ્વદ્રષ્ટા કામવર્જિતઃ ॥ ૩૧॥

અવિકારી હ્યભોગી ચ સદાશુચિરમઙ્ગલઃ ।
તસ્ય પ્રયોજનં લોકે કામિન્યા કિં વદાધુના ॥ ૩૨॥

કેવલં યોગલગ્નસ્ય મમાનન્દઃ સદાસ્તિ વૈ ।
જ્ઞાનહીનસ્તુ પુરુષો મનુતે બહુ કામકમ્ ॥ ૩૩॥

વિવાહકરણં લોકે વિજ્ઞેયં પરબન્ધનમ્ ।
તસ્માત્તસ્ય રુચિર્નો મે સત્યં સત્યં વદામ્યહમ્ ॥ ૩૪॥

ન સ્વાર્થં મે પ્રવૃત્તિર્હિ સમ્યક્ સ્વાર્થવિચિન્તનાત્ ।
તથાપિ તત્કરિષ્યામિ ભવદુક્તં જગદ્ધિતમ્ ॥ ૩૫॥

મત્વા વચો ગરિષ્ઠં વા નિજોક્તિપરિપૂર્તયે ।
કરિષ્યામિ વિવાહં વૈ ભક્તવશ્યઃ સદા હ્યહમ્ ॥ ૩૬॥

પરન્તુ યાદૃશીં કાન્તાં ગ્રહીષ્યામિ યથાપણમ્ ।
તચ્છૃણુષ્વ હરે બ્રહ્મન્ યુક્તમેવ વચો મમ ॥ ૩૭॥

યા મે તેજઃ સમર્થા હિ ગ્રહીતું સ્યાદ્વિભાગશઃ ।
તાં નિદેશય ભાર્યાર્થે યોગિનીં કામરૂપિણીમ્ ॥ ૩૮॥

યોગયુક્તે મયિ તથા યોગિન્યેવ ભવિષ્યતિ ।
કામાસક્તે મયિ તથા કામિન્યેવ ભવિષ્યતિ ॥ ૩૯॥

યમક્ષરં વેદવિદો નિગદન્તિ મનીષિણઃ ।
જ્યોતીરૂપં શિવં તે ચ ચિન્તયિષ્યે સનાતનમ્ ॥ ૪૦॥

તચ્ચિન્તાયાં યદાસક્તો બ્રહ્મન્ ગચ્છામિ ભાવિનીમ્ ।
તત્ર યા વિઘ્નજનની ન ભવિત્રી હતાસ્તુ મે ॥ ૪૧॥

ત્વં વા વિષ્ણુરહં વાપિ શિવસ્ય બ્રહ્મરૂપિણઃ ।
અંશભૂતા મહાભાગા યોગ્યં તદનુચિન્તનમ્ ॥ ૪૨॥

તચ્ચિન્તયા વિનોદ્વાહં સ્થાસ્યામિ કમલાસન ।
તસ્માજ્જાયાં પ્રાદિશ ત્વં મત્કર્માનુગતાં સદા ॥ ૪૩॥

તત્રાપ્યેકં પણં મે ત્વં શ ृણુ બ્રહ્મઁશ્ચ માં પ્રતિ ।
અવિશ્વાસો મદુક્તે ચેન્મયા ત્યક્તા ભવિષ્યતિ ॥ ૪૪॥

બ્રહ્મોવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વાહં સ વિષ્ણુર્હરસ્ય ચ ।
સસ્મિતં મોદિતમનોઽવોચં ચેતિ વિનમ્રકઃ ॥ ૪૫॥

શ ृણુ નાથ મહેશાન માર્ગિતા યાદૃશી ત્વયા ।
નિવેદયામિ સુપ્રીત્યા તાં સ્ત્રિયં તાદૃશીં પ્રભો ॥ ૪૬॥

ઉમા સા ભિન્નરૂપેણ સઞ્જાતા કાર્યસાધિની ।
સરસ્વતી તથા લક્ષ્મીર્દ્વિધારૂપા પુરા પ્રભો ॥ ૪૭॥

પદ્મા કાન્તાભવદ્વિષ્ણોસ્તથા મમ સરસ્વતી ।
તૃતીયરૂપા સા નોઽભૂલ્લોકકાર્યહિતૈષિણી ॥ ૪૮॥

દક્ષસ્ય તનયા યાભૂત્સતી નામ્ના તુ સા વિભો ।
સૈવેદૃશી ભવેદ્ભાર્યા ભવેદ્ધિ હિતકારિણી ॥ ૪૯॥

સા તપસ્યતિ દેવેશ ત્વદર્થં હિ દૃઢવ્રતા ।
ત્વાં પતિં પ્રાપ્તુકામા વૈ મહાતેજોવતી સતી ॥ ૫૦॥

દાતું ગચ્છ વરં તસ્યૈ કૃપાં કુરુ મહેશ્વર ।
તાં વિવાહય સુપ્રીત્યા વરં દત્ત્વા ચ તાદૃશમ્ ॥ ૫૧॥

હરેર્મમ ચ દેવાનામિયં વાઞ્છાસ્તિ શઙ્કર ।
પરિપૂરય સદ્દૃષ્ટ્યા પશ્યામોત્સવમાદરાત્ ॥ ૫૨॥

મઙ્ગલં પરમં ભૂયાત્ ત્રિલોકેષુ સુખાવહમ્ ।
સર્વજ્વરો વિનશ્યેદ્ વૈ સર્વેષાં નાત્ર સંશયઃ ॥ ૫૩॥

અથવાસ્મદ્વચઃશેષેઽવદત્તં મધુસૂદનઃ ।
લીલાજાકૃતિમીશાનં ભક્તવત્સલમચ્યુતઃ ॥ ૫૪॥

વિષ્ણુરુવાચ ।
દેવદેવ મહાદેવ કરુણાકર શઙ્કર ।
યદુક્તં બ્રહ્મણા સર્વં મદુક્તં તન્ન સંશયઃ ॥ ૫૫॥

તત્કુરુષ્વ મહેશાન કૃપાં કૃત્વા મમોપરિ ।
સનાથં કુરુ સદ્દૃષ્ટ્યા ત્રિલોકં સુવિવાહ્ય તામ્ ॥ ૫૬॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા ભગવાન્ વિષ્ણુઃ તૂષ્ણીમાસ મુને સુધીઃ ।
તથાસ્ત્વિતિ વિહસ્યાહ સ પ્રભુર્ભક્તવત્સલઃ ॥ ૫૭॥

તતસ્ત્વાવાં ચ સમ્પ્રાપ્ય ચાજ્ઞાં સ મુનિભિઃ સુરૈઃ ।
અગચ્છાવ સ્વેષ્ટદેશં સસ્ત્રીકૌ પરહર્ષિતૌ ॥ ૫૮॥

ઇતિ શ્રીશિવમહાપુણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે વિષ્ણુબ્રહ્મકૃતશિવપ્રાર્થનાવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૨.૨.૧૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૧૭. સપ્તદશોઽધ્યાયઃ । સતીવરલાભકથનમ્ ।

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા સર્વદેવૈશ્ચ કૃતા શમ્ભોર્નુતિઃ પરા ।
શિવાચ્ચ સા વરં પ્રાપ્તા શ ૃણુ હ્યાદરતો મુને ॥ ૧॥

અથો સતી પુનઃ શુક્લપક્ષેઽષ્ટમ્યામુપોષિતા ।
આશ્વિને માસિ સર્વેશં પૂજયામાસ ભક્તિતઃ ॥ ૨॥

ઇતિ નન્દાવ્રતે પૂર્ણે નવમ્યાં દિનભાગતઃ ।
તસ્યાસ્તુ ધ્યાનમગ્નાયાઃ પ્રત્યક્ષમભવદ્ હરઃ ॥ ૩॥

સર્વાઙ્ગસુન્દરો ગૌરઃ પઞ્ચવક્ત્રસ્ત્રિલોચનઃ ।
ચન્દ્રભાલઃ પ્રસન્નાત્મા શિતિકણ્ઠશ્ચતુર્ભુજઃ ॥ ૪॥

ત્રિશૂલબ્રહ્મકવરાભયધૃગ્ભસ્મભાસ્વરઃ ।
સ્વર્ધુન્યા વિલસચ્છીર્ષઃ સકલાઙ્ગમનોહરઃ ॥ ૫॥

મહાલાવણ્યધામા ચ કોટિચન્દ્રસમાનનઃ ।
કોટિસ્મરસમા કાન્તિઃ સર્વથા સ્ત્રીપ્રિયાકૃતિઃ ॥ ૬॥

પ્રત્યક્ષતો હરં વીક્ષ્ય સતી સેદૃગ્વિધં પ્રભુમ્ ।
વવન્દે ચરણૌ તસ્ય સુલજ્જાવનતાનના ॥ ૭॥

અથ પ્રાહ મહાદેવઃ સતીં તદ્વ્રતધારિણીમ્ ।
તામિચ્છન્નપિ ભાર્યાર્થં તપશ્ચર્યાફલપ્રદઃ ॥ ૮॥

મહાદેવ ઉવાચ ।
દક્ષનન્દિનિ પ્રીતોઽસ્મિ વ્રતેનાનેન સુવ્રતે ।
વરં વરય સન્દાસ્યે યત્તવાભિમતં ભવેત્ ॥ ૯॥

બ્રહ્મોવાચ ।
જાનન્નપીહ તદ્ભાવં મહાદેવો જગત્પતિઃ ।
જગૌ વરં વૃણીષ્વેતિ તદ્વાક્યશ્રવણેચ્છયા ॥ ૧૦॥

સાપિ ત્રપાવશા યુક્તા વક્તું નો હૃદિ યત્સ્થિતમ્ ।
શશાક સા ત્વભીષ્ટં યત્તલ્લજ્જાચ્છાદિતં પુનઃ ॥ ૧૧॥

પ્રેમમગ્નાભવત્સાતિ શ્રુત્વા શિવવચઃ પ્રિયમ્ ।
તજ્જ્ઞાત્વા સુપ્રસન્નોઽભૂચ્છઙ્કરો ભક્તવત્સલઃ ॥ ૧૨॥

વરં બ્રૂહિ વરં બ્રૂહિ પ્રાહેતિ સ પુનર્દ્રુતમ્ ।
સતીભક્તિવશઃ શમ્ભુરન્તર્યામી સતાં ગતિઃ ॥ ૧૩॥

અથ ત્રપાં સ્વાં સન્ધાય યદા પ્રાહ હરં સતી ।
યથેષ્ટં દેહિ વરદ વરમિત્યનિવારકમ્ ॥ ૧૪॥

તદા વાક્યસ્યાવસાનમનવેક્ષ્ય વૃષધ્વજઃ ।
ભવ ત્વં મમ ભાર્યેતિ પ્રાહ તાં ભક્તવત્સલઃ ॥ ૧૫॥

એતચ્છ્રુત્વા વચસ્તસ્ય સાભીષ્ટફલભાવનમ્ ।
તૂષ્ણીં તસ્થૌ પ્રમુદિતા વરં પ્રાપ્ય મનોગતમ્ ॥ ૧૬॥

સકામસ્ય હરસ્યાગ્રે સ્થિતા સા ચારુહાસિની ।
અકરોન્નિજભાવાંશ્ચ હાવાન્કામવિવર્ધનાન્ ॥ ૧૭॥

તતો ભાવાન્સમાદાય શ ृङ्ગારાખ્યો રસસ્તદા ।
તયોશ્ચિત્તે વિવેશાશુ કલા હાવા યથોદિતમ્ ॥ ૧૮॥

તત્પ્રવેશાત્તુ દેવર્ષે લોકલીલાનુસારિણોઃ ।
કાપ્યભિખ્યા તયોરાસીચ્ચિત્રાચન્દ્રમસોર્યથા ॥ ૧૯॥

રેજે સતી હરં પ્રાપ્ય સ્નિગ્ધભિન્નાઞ્જનપ્રભા ।
ચન્દ્રાભ્યાશેઽભ્રલેખેવ સ્ફટિકોજ્જ્વલવર્ષ્મણઃ ॥ ૨૦॥

અથ સા તમુવાચેદં હરં દાક્ષાયણી મુહુઃ ।
સુપ્રસન્ના કરૌ બદ્ધ્વા નતકા ભક્તવત્સલમ્ ॥ ૨૧॥

સત્યુવાચ ।
દેવદેવ મહાદેવ વિવાહવિધિના પ્રભો ।
પિતુર્મે ગોચરીકૃત્ય માં ગૃહાણ જગત્પતે ॥ ૨૨॥

બ્રહ્મોવાચ ।
એવં સતીવચઃ શ્રુત્વા મહેશો ભક્તવત્સલઃ ।
તથાસ્ત્વિતિ વચઃ પ્રાહ નિરીક્ષ્ય પ્રેમતશ્ચ તામ્ ॥ ૨૩॥

દાક્ષાયણ્યપિ તં નત્વા શમ્ભું વિજ્ઞાપ્ય ભક્તિતઃ ।
પ્રાપ્તાજ્ઞા માતુરભ્યાશમગાન્મોહમુદાન્વિતા ॥ ૨૪॥

હરોઽપિ હિમવત્પ્રસ્થં પ્રવિશ્ય ચ નિજાશ્રમમ્ ।
દાક્ષાયણીવિયોગાદ્વૈ કૃચ્છ્રં ધ્યાનપરોઽભવત્ ॥ ૨૫॥

સમાધાય મનઃ શમ્ભુર્લૌકિકીં ગતિમાશ્રિતઃ ।
ચિન્તયામાસ દેવર્ષે મનસા માં વૃષધ્વજઃ ॥ ૨૬॥

તતઃ સચ્ચિન્ત્યમાનોઽહં મહેશેન ત્રિશૂલિના ।
પુરસ્તાત્પ્રાવિશત્તૂર્ણં હરસિદ્ધિપ્રચોદિતઃ ॥ ૨૭॥

યત્રાસૌ હિમવત્પ્રસ્થે તદ્વિયોગી હરઃ સ્થિતઃ ।
સરસ્વતીયુતસ્તાત તત્રૈવ સમુપસ્થિતઃ ॥ ૨૮॥

સરસ્વતીયુતં માં ચ દેવર્ષે વીક્ષ્ય સ પ્રભુઃ ।
ઉત્સુકઃ પ્રેમબદ્ધશ્ચ સત્યા શમ્ભુરુવાચ હ ॥ ૨૯॥

શમ્ભુરુવાચ ।
અહં બ્રહ્મન્સ્વાર્થપરઃ પરિગ્રહકૃતૌ ચ યત્ ।
તદા સ્વત્વમિવ સ્વાર્થે પ્રતિભાતિ મમાધુના ॥ ૩૦॥

અહમારાધિતઃ સત્યા દાક્ષાયણ્યાથ ભક્તિતઃ ।
તસ્યૈ વરો મયા દત્તો નન્દાવ્રતપ્રભાવતઃ ॥ ૩૧॥

ભર્તા ભવેતિ ચ તયા મત્તો બ્રહ્મન્ વરો વૃતઃ ।
મમ ભાર્યા ભવેત્યુક્તં મયા તુષ્ટેન સર્વથા ॥ ૩૨॥

અથાવદત્તદા માં સા સતી દાક્ષાયણી ત્વિતિ ।

પિતુર્મે ગોચરીકૃત્ય માં ગૃહાણ જગત્પતે ॥ ૩૩॥

તદપ્યઙ્ગીકૃતં બ્રહ્મન્મયા તદ્ભક્તિતુષ્ટિતઃ ।
સા ગતા ભવનં માતુરહમત્રાગતો વિધે ॥ ૩૪॥

તસ્માત્ત્વં ગચ્છ ભવનં દક્ષસ્ય મમ શાસનાત્ ।
તાં દક્ષોઽપિ યથા કન્યાં દદ્યાન્મેઽરં તથા વદ ॥ ૩૫॥

સતીવિયોગભઙ્ગઃ સ્યાદ્યથા મે ત્વં તથા કુરુ ।
સમાશ્વાસય તં દક્ષં સર્વવિદ્યાવિશારદઃ ॥ ૩૬॥

બ્રહ્મોવાચ ।
ઇત્યુદીર્ય મહાદેવઃ સકાશે મે પ્રજાપતેઃ ।
સરસ્વતીં વિલોક્યાશુ વિયોગવશગોઽભવત્ ॥ ૩૭॥

તેનાહમપિ ચાજ્ઞપ્તઃ કૃતકૃત્યો મુદાન્વિતઃ ।
પ્રાવોચં ચેતિ જગતાં નાથં તં ભક્તવત્સલમ્ ॥ ૩૮॥

બ્રહ્મોવાચ
યદાત્થ ભગવન્ શમ્ભો તદ્વિચાર્ય સુનિશ્ચિતમ્ ।
મુખ્યઃ સ્વાર્થો હિ દેવાનાં મમાપિ વૃષભધ્વજ ॥ ૩૯॥

દક્ષસ્તુભ્યં સુતાં સ્વાં ચ સ્વયમેવ પ્રદાસ્યતિ ।
અહં ચાપિ વદિષ્યામિ ત્વદ્વાક્યં તત્સમક્ષતઃ ॥ ૪૦॥

બ્રહ્મોવાચ
ઇત્યુદીર્ય મહાદેવમહં સર્વેશ્વરં પ્રભુમ્ ।
અગમં દક્ષનિલયં સ્યન્દનેનાતિવેગિના ॥ ૪૧॥

નારદ ઉવાચ ।
વિધે પ્રાજ્ઞ મહાભાગ વદ નો વદતાં વર ।
સત્યૈ ગૃહાગતાયૈ સ દક્ષઃ કિમકરોત્તતઃ ॥ ૪૨॥

બ્રહ્મોવાચ ।
તપસ્તપ્ત્વા વરં પ્રાપ્ય મનોઽભિલષિતં સતી ।
ગૃહં ગત્વા પિતુર્માતુઃ પ્રણામમકરોત્તદા ॥ ૪૩॥

માત્રે પિત્રેઽથ તત્સર્વં સમાચખ્યૌ મહેશ્વરાત્ ।
વરપ્રાપ્તિઃ સ્વસખ્યા વૈ સત્યાસ્તુષ્ટાત્તુ ભક્તિતઃ ॥ ૪૪॥

માતા પિતા ચ વૃત્તાન્તં સર્વં શ્રુત્વા સખીમુખાત્ ।
આનન્દં પરમં લેભે ચક્રે ચ પરમોત્સવમ્ ॥ ૪૫॥

દ્રવ્યં દદૌ દ્વિજાતિભ્યો યથાભીષ્ટમુદારધીઃ ।
અન્યેભ્યશ્ચાન્ધદીનેભ્યો વીરિણી ચ મહામનાઃ ॥ ૪૬॥

વીરિણી તાં સમાલિઙ્ગ્ય સ્વસુતાં પ્રીતિવર્દ્ધિનીમ્ ।
મૂર્ધ્ન્યુપાઘ્રાય મુદિતા પ્રશશંશુર્મુહુર્મુહુઃ ॥ ૪૭॥

અથ દક્ષઃ કિયત્કાલે વ્યતીતે ધર્મવિત્તમઃ ।
ચિન્તયામાસ દેયેયં સ્વસુતા શમ્ભવે કથમ્ ॥ ૪૮॥

આગતોઽપિ મહાદેવઃ પ્રસન્નઃ સ જગામ હ ।
પુનરેવ કથં સોઽપિ સુતાર્થેઽત્રાગમિષ્યતિ ॥ ૪૯॥

પ્રસ્થાપ્યોઽથ મયા કશ્ચિચ્છમ્ભોર્નિકટમઞ્જસા ।
નૈતદ્યોગ્યં ન ગૃહ્ણીયાદ્યદ્યેવં વિફલાર્દના ॥ ૫૦॥

અથવા પૂજયિષ્યામિ તમેવ વૃષભધ્વજમ્ ।
મદીયતનયા ભક્ત્યા સ્વયમેવ યથા ભવેત્ ॥ ૫૧॥

તથૈવ પૂજિતઃ સોઽપિ વાઞ્છત્યાર્યપ્રયત્નતઃ ।
શમ્ભુર્ભવતુ મદ્ભર્તેત્યેવં દત્તવરેણ તત્ ॥ ૫૨॥

ઇતિ ચિન્તયતસ્તસ્ય દક્ષસ્ય પુરતોઽન્વહમ્ ।
ઉપસ્થિતોઽહં સહસા સરસ્વત્યન્વિતસ્તદા ॥ ૫૩॥

માં દૃષ્ટ્વા પિતરં દક્ષઃ પ્રણમ્યાવનતઃ સ્થિતઃ ।
આસનં ચ દદૌ મહ્યં સ્વભવાય યથોચિતમ્ ॥ ૫૪॥

તતો માં સર્વલોકેશં તત્રાગમનકારણમ્ ।
દક્ષઃ પપ્રચ્છ સ ક્ષિપ્રં ચિન્તાવિષ્ટોઽપિ હર્ષિતઃ ॥ ૫૫॥

દક્ષ ઉવાચ ।
તવાત્રાગમને હેતુઃ કઃ પ્રવેશે સ સૃષ્ટિકૃત્ ।
મમોપરિ સુપ્રસાદં કૃત્વાચક્ષ્વ જગદ્ગુરો ॥ ૫૬॥

પુત્રસ્નેહાત્કાર્યવશાદથવા લોકકારક ।
મમાશ્રમં સમાયાતો હૃષ્ટસ્ય તવ દર્શનાત્ ॥ ૫૭॥

બ્રહ્મોવાચ ।

ઇતિ પૃષ્ટઃ સ્વપુત્રેણ દક્ષેણ મુનિસત્તમ ।
વિહસન્નબ્રુવં વાક્યં મોદયંસ્તં પ્રજાપતિમ્ ॥ ૫૮॥

બ્રહ્મોવાચ
શ‍ૃણુ દક્ષ યદર્થં ત્વત્સમીપમહમાગતઃ ।
ત્વત્તો કસ્ય હિતં મેઽપિ ભવતોઽપિ તદીપ્સિતમ્ ॥ ૫૯॥

તવ પુત્રી સમારાધ્ય મહાદેવં જગત્પતિમ્ ।
યો વરઃ પ્રાર્થિતસ્તસ્ય સમયોઽયમુપાગતઃ ॥ ૬૦॥

શમ્ભુના તવ પુત્ર્યર્થં ત્વત્સકાશમહં ધ્રુવમ્ ।
પ્રસ્થાપિતોઽસ્મિ યત્કૃત્યં શ્રેયસ્તદવધારય ॥ ૬૧॥

વરં દત્ત્વા ગતો રુદ્રસ્તાવત્પ્રભૃતિ શઙ્કરઃ ।
ત્વત્સુતાયા વિયોગેન ન શર્મ લભતેઽઞ્જસા ॥ ૬૨॥

અલબ્ધચ્છિદ્રમદનો જિગાય ગિરિશં ન યમ્ ।
સર્વૈઃ પુષ્પમયૈર્બાણૈર્યત્નં કૃત્વાપિ ભૂરિશઃ ॥ ૬૩॥

સ કામબાણવિદ્ધોઽપિ પરિત્યજ્યાત્મચિન્તનમ્ ।
સતીં વિચિન્તયન્નાસ્તે વ્યાકુલઃ પ્રાકૃતો યથા ॥ ૬૪॥

વિસ્મૃત્ય પ્રશ્રુતાં વાણીં ગણાગ્રે વિપ્રયોગતઃ ।
ક્વ સતીત્યેવમભિતો ભાષતે નિકૃતાવપિ ॥ ૬૫॥

મયા યદ્વાઞ્છિતં પૂર્વં ત્વયા ચ મદનેન ચ ।
મરીચ્યાદ્યૈર્મુનિવરૈસ્તત્સિદ્ધમધુના સુત ॥ ૬૬॥

ત્વત્પુત્ર્યારાધિતઃ શમ્ભુઃ સોઽપિ તસ્યા વિચિન્તનાત્ ।
અનુશોધયિતું પ્રેપ્સુર્વર્તતે હિમવદ્ગિરૌ ॥ ૬૭॥

યથા નાનાવિધૈર્ભાવૈઃ સત્ત્વાત્તેન વ્રતેન ચ ।
શમ્ભુરારાધિતસ્તેન તથૈવારાધ્યતે સતી ॥ ૬૮॥

તસ્માત્તુ દક્ષ તનયાં શમ્ભ્વર્થં પરિકલ્પિતામ્ ।
તસ્મૈ દેહ્યવિલમ્બેન કૃતા તે કૃતકૃત્યતા ॥ ૬૯॥

અહં તમાનયિષ્યામિ નારદેન ત્વદાલયમ્ ।
તસ્મૈ ત્વમેનાં સંયચ્છ તદર્થે પરિકલ્પિતામ્ ॥ ૭૦॥

બ્રહ્મોવાચ

શ્રુત્વા મમ વચશ્ચેતિ સ મે પુત્રોऽતિહર્ષિતઃ ।
એવમેવેતિ માં દક્ષ ઉવાચ પરહર્ષિતઃ ॥ ૭૧॥

તતઃ સોऽહં મુને તત્રાગમમત્યન્તહર્ષિતઃ ।
ઉત્સુકો લોકનિરતો ગિરિશો યત્ર સંસ્થિતઃ ॥ ૭૨॥

ગતે નારદ દક્ષોऽપિ સદારતનયો હ્યપિ ।
અભવત્પૂર્ણકામસ્તુ પીયૂષૈરિવ પૂરિતઃ ॥ ૭૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે સતીવરલાભો નામ સપ્તદશોऽધ્યાયઃ ॥ ૨.૨.૧૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૧૮. અષ્ટાદશોऽધ્યાયઃ । શિવસતીવિવાહઃ ।

નારદ ઉવાચ ।
રુદ્રપાર્શ્વે ત્વયિ ગતે કિમભૂચ્ચરિતં તતઃ ।
કા વાર્તા હ્યભવત્તાત કિં ચકાર હરઃ સ્વયમ્ ॥ ૧॥

બ્રહ્મોવાચ ।
અથાહં શિવમાનેતું પ્રસન્નઃ પરમેશ્વરમ્ ।
આસદં હિ મહાદેવં હિમવદ્ગિરિસંસ્થિતમ્ ॥ ૨॥

માં વીક્ષ્ય લોકસ્રષ્ટારમાયાન્તં વૃષભધ્વજઃ ।
મનસા સંશયં ચક્રે સતીપ્રાપ્તૌ મુહુર્મુહુઃ ॥ ૩॥

અથ પ્રીત્યા હરો લોકે ગતિમાશ્રિત્ય લીલયા ।
સત્યા ભક્ત્યા ચ માં ક્ષિપ્રમુવાચ પ્રાકૃતો યથા ॥ ૪॥

ઈશ્વર ઉવાચ ।
કિમકાર્ષીત્સુરજ્યેષ્ઠ સત્યર્થે ત્વત્સુતઃ સ મામ્ ।
કથયસ્વ યથા સ્વાન્તં ન દીર્યેન્મન્મથેન હિ ॥ ૫॥

ધાવમાનો વિપ્રયોગો મામેવ ચ સતીં પ્રતિ ।

અભિહન્તિ સુરજ્યેષ્ઠ ત્યક્ત્વાન્યાં પ્રાણધારિણીમ્ ॥ ૬॥

સતીતિ સતતં બ્રહ્મન્ વદ કાર્યં કરોમ્યહમ્ ।
અભેદાન્મમ સા પ્રાપ્યા તદ્વિધે ક્રિયતાં તથા ॥ ૭॥

બ્રહ્મોવાચ ।
ઇતિ રુદ્રોક્તવચનં લોકાચારસુગર્ભિતમ્ ।
શ્રુત્વાહં નારદમુને સાન્ત્વયન્નગદં શિવમ્ ॥ ૮॥

બ્રહ્મોવાચ
સત્યર્થં યન્મમ સુતો વદતિ સ્મ વૃષધ્વજ ।
તચ્છ્રણુષ્વ નિજાસાધ્યં સિદ્ધમિત્યવધારય ॥ ૯॥

દેયા તસ્મૈ મયા પુત્રી તદર્થં પરિકલ્પિતા ।
મમાભીષ્ટમિદં કાર્યં ત્વદ્વાક્યાદધિકં પુનઃ ॥ ૧૦॥

મત્પુત્ર્યારાધિતઃ શમ્ભુરેતદર્થં સ્વયં પુનઃ ।
સોઽપ્યન્વિષ્યતિ માં યસ્માત્તદા દેયા મયા હરે ॥ ૧૧॥

શુભે લગ્ને સુમુહૂર્તે સમાગચ્છતુ સેઽન્તિકમ્ ।
તદા દાસ્યામિ તનયાં ભિક્ષાર્થં શમ્ભવે વિધે ॥ ૧૨॥

ઇત્યુવાચ સ માં દક્ષસ્તસ્માત્ત્વં વૃષભધ્વજ ।
શુભે મુહૂર્તે તદ્વેશ્મ ગચ્છ તામાનયસ્વ ચ ॥ ૧૩॥

બ્રહ્મોવાચ
ઇતિ શ્રુત્વા મમ વચો લૌકિકીં ગતિમાશ્રિતઃ ।
ઉવાચ વિહસન્ રુદ્રો મુને માં ભક્તવત્સલઃ ॥ ૧૪॥

રુદ્ર ઉવાચ ।
ગમિષ્યે ભવતા સાર્ધં નારદેન ચ તદ્ગૃહમ્ ।
અહમેવ જગત્સ્રષ્ટસ્તસ્માત્ત્વં નારદં સ્મર ॥ ૧૫॥

મરીચ્યાદીન્ સ્વપુત્રાંશ્ચ માનસાનપિ સંસ્મર ।
તૈઃ સાર્ધં દક્ષનિલયં ગમિષ્યે સગણો વિધે ॥ ૧૬॥

બ્રહ્મોવાચ ।
ઇત્યાજ્ઞપ્તોઽહમીશેન લોકાચારપરેણ હ ।
સંસ્મરં નારદં ત્વાં ચ મરીચ્યાદીન્સુતાંસ્તથા ॥ ૧૭॥

તતઃ સમાગતાઃ સર્વે માનસાસ્તનયાસ્ત્વયા ।
મમ સ્મરણમાત્રેણ હૃષ્ટાસ્તે દ્રુતમાદરાત્ ॥ ૧૮॥

વિષ્ણુઃ સમાગતસ્તૂર્ણં સ્મૃતો રુદ્રેણ શૈવરાટ્ ।
સ સ્વસૈન્યૈઃ કમલયા ગરુડારૂઢ એવ ચ ॥ ૧૯॥

અથ ચૈત્રસિતે પક્ષે નક્ષત્રે ભગદૈવતે ।
ત્રયોદશ્યાં દિને ભાનૌ નિર્ગચ્છત્સ મહેશ્વરઃ ॥ ૨૦॥

સર્વૈઃ સુરગણૈઃ સાર્ધં બ્રહ્મવિષ્ણુપુરઃસરૈઃ ।
તથા તૈર્મુનિભિર્ગચ્છન્ સ બભૌ પથિ શઙ્કરઃ ॥ ૨૧॥

માર્ગે સમુત્સવો જાતો દેવાદીનાં ચ ગચ્છતામ્ ।
તથા હરગણાનાં ચ સાનન્દમનસામતિ ॥ ૨૨॥

ગજગોવ્યાઘ્રસર્પાશ્ચ જટા ચન્દ્રકલા તથા ।
જગ્મુઃ સર્વે ભૂષણત્વં યથાયોગ્યં શિવેચ્છયા ॥ ૨૩॥

તતઃ ક્ષણેન બલિના બલીવર્દેન વેગિના ।
સવિષ્ણુપ્રમુખઃ પ્રીત્યા પ્રાપ દક્ષાલયં હરઃ ॥ ૨૪॥

તતો દક્ષો વિનીતાત્મા સમ્પ્રહૃષ્ટતનૂરુહઃ ।
પ્રયયૌ સમ્મુખં તસ્ય સંયુક્તઃ સકલૈર્નિજૈઃ ॥ ૨૫॥

સર્વે સુરગણાસ્તત્ર સ્વયં દક્ષેણ સત્કૃતાઃ ।
પાર્શ્વે શ્રેષ્ઠં ચ મુનિભિરુપવિષ્ટા યથાક્રમમ્ ॥ ૨૬॥

પરિવાર્યાખિલાન્દેવાન્ગણાંશ્ચ મુનિભિર્યથા ।
દક્ષઃ સમાનયામાસ ગૃહાભ્યન્તરતઃ શિવમ્ ॥ ૨૭॥

અથ દક્ષઃ પ્રસન્નાત્મા સ્વયં સર્વેશ્વરં હરમ્ ।
સમાનર્ચ વિધાનેન દત્ત્વાસનમનુત્તમમ્ ॥ ૨૮॥

તતો વિષ્ણું ચ માં વિપ્રાન્સુરાન્સર્વાન્ગણાંસ્તથા ।
પૂજયામાસ સદ્ભક્ત્યા યથોચિતવિધાનતઃ ॥ ૨૯॥

કૃત્વા યથોચિતાં પૂજાં તેષાં પૂજ્યાદિભિસ્તથા ।
ચકાર સંવિદં દક્ષો મુનિભિર્માનસૈઃ પુનઃ ॥ ૩૦॥

તતો માં પિતરં પ્રાહ દક્ષઃ પ્રીત્યા હિ મત્સુતઃ ।
પ્રણિપત્ય ત્વયા કર્મ કાર્યં વૈવાહિકં વિભો ॥ ૩૧॥

વાઢમિત્યહમપ્યુક્ત્વા પ્રહૃષ્ટેનાન્તરાત્મના ।
સમુત્થાય તતોઽકાર્ષં તત્કાર્યમખિલં તથા ॥ ૩૨॥

તતઃ શુભે મુહૂર્તે હિ લગ્ને ગ્રહબલાન્વિતે ।
સતીં નિજસુતાં દક્ષો દદૌ હર્ષેણ શમ્ભવે ॥ ૩૩॥

ઉદ્વાહવિધિના સોઽપિ પાણિં જગ્રાહ હર્ષિતઃ ।
દાક્ષાયણ્યા વરતનોસ્તદાનીં વૃષભધ્વજઃ ॥ ૩૪॥

અહં હરિસ્ત્વદાદ્યા વૈ મુનયશ્ચ સુરા ગણાઃ ।
નેમુઃ સર્વે સંસ્તુતિભિઃ તોષયામાસુરીશ્વરમ્ ॥ ૩૫॥

સમુત્સવો મહાનાસીન્નૃત્યગાનપુરઃસરઃ ।
આનન્દં પરમં જગ્મુઃ સર્વે મુનિગણાઃ સુરાઃ ॥ ૩૬॥

કન્યાં દત્ત્વા કૃતાર્થોઽભૂત્તદા દક્ષો હિ મત્સુતઃ ।
શિવાશિવૌ પ્રસન્નૌ ચ નિખિલં મઙ્ગલાલયમ્ ॥ ૩૭॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે કન્યાદાનવર્ણનં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૨.૨.૧૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૧૯. એકોનવિંશોઽધ્યાયઃ । શિવલીલાવર્ણનમ્ ।

બ્રહ્મોવાચ ।
કૃત્વા દક્ષઃ સુતાદાનં યૌતકં વિવિધં દદૌ ।
હરાય સુપ્રસન્નશ્ચ દ્વિજેભ્યો વિવિધં ધનમ્ ॥ ૧॥

અથ શમ્ભુમુપાગત્ય સમુત્થાય કૃતાઞ્જલિઃ ।
સાર્ધં કમલયા ચેદમુવાચ ગરુડધ્વજઃ ॥ ૨॥

વિષ્ણુરુવાચ ।
દેવદેવ મહાદેવ કરુણાસાગર પ્રભો ।

ત્વં પિતા જગતાં તાત સતી માતાખિલસ્ય ચ ॥ ૩॥

યુવાં લીલાવતારૌ વૈ સતાં ક્ષેમાય સર્વદા ।
ખલાનાં નિગ્રહાર્થાય શ્રુતિરેષા સનાતની ॥ ૪॥

સ્નિગ્ધનીલાઞ્જનશ્યામશોભયા શોભસે હર ।
દાક્ષાયણ્યા યથા ચાહં પ્રતિલોમેન પદ્મયા ॥ ૫॥

દેવાનાં વા નૃણાં રક્ષાં કુરુ સત્યાનયા સતામ્ ।
સંસારસારિણાં શમ્ભો મઙ્ગલં સર્વદા તથા ॥ ૬॥

ય એનાં સાભિલાષો વૈ દૃષ્ટ્વા શ્રુત્વાથવા ભવેત્ ।
તં હન્યાઃ સર્વભૂતેશ વિજ્ઞપ્તિરિતિ મે પ્રભો ॥ ૭॥

બ્રહ્મોવાચ ।
ઇતિ શ્રુત્વા વચો વિષ્ણોર્વિહસ્ય પરમેશ્વરઃ ।
એવમસ્ત્વિતિ સર્વજ્ઞઃ પ્રોવાચ મધુસૂદનમ્ ॥ ૮॥

સ્વસ્થાનં હરિરાગત્ય સ્થિત આસીન્મુનીશ્વર ।
ઉત્સવં કારયામાસ જુગોપ ચરિતં ચ તત્ ॥ ૯॥

અહં દેવીં સમાગત્ય ગૃહ્યોક્તવિધિનાખિલમ્ ।
અગ્નિકાર્યં યથોદ્દિષ્ટમકાર્ષં ચ સુવિસ્તરમ્ ॥ ૧૦॥

તતઃ શિવા શિવશ્ચૈવ યથાવિધિ પ્રહૃષ્ટવત્ ।
અગ્નેઃ પ્રદક્ષિણં ચક્રે મદાચાર્યદ્વિજાજ્ઞયા ॥ ૧૧॥

તદા મહોત્સવસ્તત્રાદ્ભુતોઽભૂદ્ દ્વિજસત્તમ ।
સર્વેષાં સુખદં વાદ્યં ગીતનૃત્યપુરઃસરમ્ ॥ ૧૨॥

તદાનીમદ્ભુતં તત્ર ચરિતં સમભૂદતિ ।
સુવિસ્મયકરં તાત તચ્છૃણુ ત્વં વદામિ તે ॥ ૧૩॥

દુર્જ્ઞેયા શામ્ભવી માયા તયા સમ્મોહિતં જગત્ ।
સચરાચરમત્યન્તં સદેવાસુરમાનુષમ્ ॥ ૧૪॥

યોઽહં શમ્ભું મોહયિતું પુરૈચ્છં કપટેન હ ।
માં ચ તં શઙ્કરસ્તાત મોહયામાસ લીલયા ॥ ૧૫॥

ઇચ્છેત્પરાપકારં યઃ સ તસ્યૈવ ભવેદ્ ધ્રુવમ્ ।
ઇતિ મત્વાપકારં નો કુર્યાદન્યસ્ય પૂરુષઃ ॥ ૧૬॥

પ્રદક્ષિણાં પ્રકુર્વન્ત્યા વહ્નેઃ સત્યાઃ પદદ્વયમ્ ।
આવિર્બભૂવ વસનાત્તદદ્રાક્ષમહં મુને ॥ ૧૭॥

મદનાવિષ્ટચેતાશ્ચ ભૂત્વાઙ્ગાનિ વ્યલોકયમ્ ।
અહં સત્યા દ્વિજશ્રેષ્ઠ શિવમાયાવિમોહિતઃ ॥ ૧૮॥

યથા યથાહં રમ્યાણિ વ્યૈક્ષમઙ્ગાનિ કૌતુકાત્ ।
સત્યા બભૂવ સંહૃષ્ટઃ કામાર્તો હિ તથા તથા ॥ ૧૯॥

અહમેવં તથા દૃષ્ટ્વા દક્ષજાં ચ પતિવ્રતામ્ ।
સ્મરાવિષ્ટમના વક્ત્રં દ્રષ્ટુકામોઽભવં મુને ॥ ૨૦॥

ન શમ્ભોર્લજ્જયા વક્ત્રં પ્રત્યક્ષં ચ વિલોકિતમ્ ।
ન ચ સા લજ્જયાવિષ્ટા કરોતિ પ્રકટં મુખમ્ ॥ ૨૧॥

તતસ્તદ્દર્શનાર્થાય સદુપાયં વિચારયન્ ।
ધૂમ્રઘોરેણ કામાર્તોઽકાર્ષં તચ્ચ તતઃ પરમ્ ॥ ૨૨॥

આર્દ્રેન્ધનાનિ ભૂરીણિ ક્ષિપ્ત્વા તત્ર વિભાવસૌ ।
સ્વલ્પાજ્યાહુતિવિન્યાસાદાર્દ્રદ્રવ્યોદ્ભવસ્તથા ॥ ૨૩॥

પ્રાદુર્ભૂતસ્તતો ધૂમો ભૂયાંસ્તત્ર સમન્તતઃ ।
તાદૃગ્ યેન તમોભૂતં વેદીભૂમિવિનિર્મિતમ્ ॥ ૨૪॥

તતો ધૂમાકુલે નેત્રે મહેશઃ પરમેશ્વરઃ ।
હસ્તાભ્યાં છાદયામાસ બહુલીલાકરઃ પ્રભુઃ ॥ ૨૫॥

તતો વસ્ત્રં સમુત્ક્ષિપ્ય સતીવક્ત્રમહં મુને ।
અવેક્ષં કિલ કામાર્તઃ પ્રહૃષ્ટેનાન્તરાત્મના ॥ ૨૬॥

મુહુર્મુહુરહં તાત પશ્યામિ સ્મ સતીમુખમ્ ।
અથેન્દ્રિયવિકારં ચ પ્રાપ્તવાનસ્મિ સોઽવશઃ ॥ ૨૭॥

મમ રેતઃ પ્રચસ્કન્દ તતસ્તદ્વીક્ષણાદ્ દ્રુતમ્ ।
ચતુર્બિન્દુમિતં ભૂમૌ તુષારચયસન્નિભમ્ ॥ ૨૮॥

તતોઽહં શઙ્કિતો મૌની તત્ક્ષણં વિસ્મિતો મુને ।
આચ્છાદયે સ્મ તદ્રેતો યથા કશ્ચિદ્ બુબોધ ન ॥ ૨૯॥

અથ તદ્ભગવાન્ શમ્ભુર્જ્ઞાત્વા દિવ્યેન ચક્ષુષા ।

રેતોઽવસ્કન્દનાત્તસ્ય કોપાદેતદુવાચ હ ॥ ૩૦॥

રુદ્ર ઉવાચ ।
કિમેતદ્વિહિતં પાપ ત્વયા કર્મ વિગર્હિતમ્ ।
વિવાહે મમ કાન્તાયા વક્ત્રં દૃષ્ટં ન રાગતઃ ॥ ૩૧॥

ત્વં વેત્સિ શઙ્કરેણૈતત્કર્મ જ્ઞાતં ન કિઞ્ચન ।
ત્રૈલોક્યેઽપિ ન મેઽજ્ઞાતં ગૂઢં તસ્માત્કથં વિધે ॥ ૩૨॥

યત્કિઞ્ચિત્ ત્રિષુ લોકેષુ જઙ્ગમં સ્થાવરં તથા ।
તસ્યાહં મધ્યગો મૂઢ તૈલં યદ્વત્તિલાન્તિગમ્ ॥ ૩૩॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા પ્રિયવિષ્ણુર્માં તદા વિષ્ણુવચઃ સ્મરન્ ।
ઇયેષ હન્તું બ્રહ્માણં શૂલમુદ્યમ્ય શઙ્કરઃ ॥ ૩૪॥

શમ્ભુનોદ્યમિતે શૂલે માં ચ હન્તું દ્વિજોત્તમ ।
મરીચિપ્રમુખાસ્તે વૈ હાહાકારં ચ ચક્રિરે ॥ ૩૫॥

તતો દેવગણાઃ સર્વે મુનયશ્ચાખિલાસ્તથા ।
તુષ્ટુવુઃ શઙ્કરં તત્ર પ્રજ્વલન્તં ભયાતુરાઃ ॥ ૩૬॥

દેવા ઊચુઃ ।
દેવદેવ મહાદેવ શરણાગતવત્સલ ।
બ્રહ્માણં રક્ષ રક્ષેશ કૃપાં કુરુ મહેશ્વર ॥ ૩૭॥

જગત્પિતા મહેશ ત્વં જગન્માતા સતી મતા ।
હરિબ્રહ્માદયઃ સર્વે તવ દાસાઃ સુરપ્રભો ॥ ૩૮॥

અદ્ભુતાકૃતિલીલસ્ત્વં તવ માયાદ્ભુતા પ્રભો ।
તયા વિમોહિતં સર્વં વિના ત્વદ્ભક્તિમીશ્વર ॥ ૩૯॥

બ્રહ્મોવાચ ।
ઇત્થં બહુતરં દીના નિર્જરા મુનયશ્ચ તે ।
તુષ્ટુવુર્દેવદેવેશં ક્રોધાવિષ્ટં મહેશ્વરમ્ ॥ ૪૦॥

દક્ષો મૈવં મૈવમિતિ પાણિમુદ્યમ્ય શઙ્કિતઃ ।
વારયામાસ ભૂતેશં ક્ષિપ્રમેત્ય પુરોગતઃ ॥ ૪૧॥

અથાગ્રે સઙ્ગતં વીક્ષ્ય તદા દક્ષં મહેશ્વરઃ ।

પ્રત્યુવાચાપ્રિયમિદં સંસ્મરન્પ્રાર્થનાં હરેઃ ॥ ૪૨॥

મહેશ્વર ઉવાચ ।
વિષ્ણુના મેઽતિભક્તેન યદિદાનીમુદીરિતમ્ ।
મયાપ્યઙ્ગીકૃતં કર્તું તદિહૈવ પ્રજાપતે ॥ ૪૩॥

સતીં યઃ સાભિલાષઃ સન્ વીક્ષેત વધ તં પ્રભો ।
ઇતિ વિષ્ણુવચઃ સત્યં વિધિં હત્વા કરોમ્યહમ્ ॥ ૪૪॥

સાભિલાષઃ કથં બ્રહ્મા સતીં સમવલોકયત્ ।
અભવત્ ત્યક્તરેતાસ્તુ તતો હન્મિ કૃતાગસમ્ ॥ ૪૫॥

બ્રહ્મોવાચ ।
ઇત્યુક્તવતિ દેવેશ મહેશે ક્રોધસઙ્કુલે ।
ચકમ્પિરે જનાઃ સર્વે સદેવમુનિમાનુષાઃ ॥ ૪૬॥

હાહાકારો મહાનાસીદૌદાસીન્યં ચ સર્વશઃ ।
અભૂવં વિકલોઽતીવ તદાહં તદ્વિમોહિતઃ ॥ ૪૭॥

અથ વિષ્ણુર્મહેશાતિપ્રિયઃ કાર્યવિચક્ષણઃ ।
તમેવંવાદિનં રુદ્રં તુષ્ટાવ પ્રણતઃ સુધીઃ ॥ ૪૮॥

સ્તુત્વા ચ વિવિધૈઃ સ્તોત્રૈઃ શઙ્કરં ભક્તવત્સલમ્ ।
ઇદમૂચે વારયંસ્તં ક્ષિપ્રં ભૂત્વા પુરઃ સરઃ ॥ ૪૯॥

વિષ્ણુરુવાચ ।
વિધિં ન જહિ ભૂતેશ સ્રષ્ટારં જગતાં પ્રભુમ્ ।
અયં શરણગસ્તેઽદ્ય શરણાગતવત્સલઃ ॥ ૫૦॥

અહં તેઽતિપ્રિયો ભક્તો ભક્તરાજ ઇતીરિતઃ ।
વિજ્ઞપ્તિં હૃદિ મે મત્વા કૃપાં કુરુ મમોપરિ ॥ ૫૧॥

અન્યચ્ચ શ‌ૃણુ મે નાથ વચનં હેતુગર્ભિતમ્ ।
તન્મનુષ્વ મહેશાન કૃપાં કૃત્વા મમોપરિ ॥ ૫૨॥

પ્રજાઃ સ્રષ્ટુમયં શમ્ભો પ્રાદુર્ભૂતશ્ચતુર્મુખઃ ।
અસ્મિન્ હતે પ્રજાસ્રષ્ટા નાસ્ત્યન્યઃ પ્રાકૃતોઽધુના ॥ ૫૩॥

સૃષ્ટિસ્થિત્યન્તકર્માણિ કરિષ્યામઃ પુનઃ પુનઃ ।
ત્રયો દેવા વયં નાથ શિવરૂપ ત્વદાજ્ઞયા ॥ ૫૪॥

એતસ્મિન્નિહતે શમ્ભો કસ્ત્વત્કર્મ કરિષ્યતિ ।
તસ્માન્ન વધ્યો ભવતા સૃષ્ટિકૃલ્લયકૃદ્વિભો ॥ ૫૫॥

અનેનૈવ સતી કન્યા દક્ષસ્ય ચ શિવા વિભો ।
સદુપાયેન વૈ ભાર્યા ભવદર્થે પ્રકલ્પિતા ॥ ૫૬॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય મહેશસ્તુ વિજ્ઞપ્તિં વિષ્ણુના કૃતામ્ ।
પ્રત્યુવાચાખિલાંસ્તાંશ્ચ શ્રાવયંશ્ચ દૃઢવ્રતઃ ॥ ૫૭॥

મહેશ ઉવાચ ।
દેવદેવ રમેશાન વિષ્ણો મત્પ્રાણવલ્લભ ।
ન નિવારય માં તાત વધાદસ્ય ખલસ્ત્વયમ્ ॥ ૫૮॥

પૂરયિષ્યામિ વિજ્ઞપ્તિં પૂર્વાન્તેઽઙ્ગીકૃતાં મયા ।
મહાપાપકરં દુષ્ટં હન્મ્યેનં ચતુરાનનમ્ ॥ ૫૯॥

અહમેવ પ્રજાઃ સ્રક્ષ્યે સર્વાઃ સ્થિરચરા અપિ ।
અન્યં સ્રક્ષ્યે સૃષ્ટિકરમથવાહં સ્વતેજસા ॥ ૬૦॥

હત્વૈનં વિધિમેવાહં સ્વપણં પૂરયન્ કૃતમ્ ।
સ્રષ્ટારમેકં સ્રક્ષ્યામિ ન નિવારય મેશ મામ્ ॥ ૬૧॥

બ્રહ્મોવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા ગિરીશસ્યાહ ચાચ્યુતઃ ।
સ્મિતપ્રભિન્નહૃદયઃ પુનર્મૈવમિતીરયન્ ॥ ૬૨॥

અચ્યુત ઉવાચ ।
પ્રતિજ્ઞાપૂરણં યોગ્યં પરસ્મિન્પુરુષેઽસ્તિ વૈ ।
વિચારયસ્વ વધ્યેશ ભવત્યાત્મનિ ન પ્રભો ॥ ૬૩॥

ત્રયો દેવા વયં શમ્ભો ત્વદાત્માનઃ પરા નહિ ।
એકરૂપા ન ભિન્નાશ્ચ તત્ત્વતઃ સુવિચારય ॥ ૬૪॥

તતસ્તદ્વચનં શ્રુત્વા વિષ્ણોઃ સ્વાતિપ્રિયસ્ય સઃ ।
શમ્ભુરૂચે પુનસ્તં વૈ ખ્યાપયન્નાત્મનો ગતિમ્ ॥ ૬૫॥

શમ્ભુરુવાચ ।
હે વિષ્ણો સર્વભક્તેશ કથમાત્મા વિધિર્મમ ।

લક્ષ્યતે ભિન્ન એવાયં પ્રત્યક્ષેણાગ્રતઃ સ્થિતઃ ॥ ૬૬॥

બ્રહ્મોવાચ ।
ઇત્યાજ્ઞપ્તો મહેશેન સર્વેષાં પુરતસ્તદા ।
ઇદમૂચે મહાદેવં તોષયન્ ગરુડધ્વજઃ ॥ ૬૭॥

વિષ્ણુરુવાચ ।
ન બ્રહ્મા ભવતો ભિન્નો ન ત્વં તસ્માત્સદાશિવ ।
ન વાહં ભવતો ભિન્નો ન મત્ ત્વં પરમેશ્વર ॥ ૬૮॥

સર્વં જાનાસિ સર્વજ્ઞ પરમેશ સદાશિવ ।
મન્મુખાદખિલાન્સર્વં સંશ્રાવયિતુમિચ્છસિ ॥ ૬૯॥

ત્વદાજ્ઞયા વદામીશ શૃણ્વન્તુ નિખિલાઃ સુરાઃ ।
મુનયશ્ચાપરે શૈવં તત્ત્વં સન્ધાર્ય સ્વં મનઃ ॥ ૭૦॥

પ્રધાનસ્યાપ્રધાનસ્ય ભાગાભાગસ્ય રૂપિણઃ ।
જ્યોતિર્મયસ્ય ભાગાસ્તે વયં દેવાઃ પ્રભોસ્ત્રયઃ ॥ ૭૧॥

કસ્ત્વં કોઽહં ચ કો બ્રહ્મા તવૈવ પરમાત્મનઃ ।
અંશત્રયમિદં ભિન્નં સૃષ્ટિસ્થિત્યન્તકારણમ્ ॥ ૭૨॥

ચિન્તયસ્વાત્મનાત્માનં સ્વલીલાધૃતવિગ્રહઃ ।
એકસ્ત્વં બ્રહ્મ સગુણો હ્યંશભૂતા વયં ત્રયઃ ॥ ૭૩॥

શિરોગ્રીવાદિભેદેન યથૈકસ્યૈવ વર્ષ્મણઃ ।
અઙ્ગાનિ તે તથેશસ્ય તસ્ય ભાગત્રયં હર ॥ ૭૪॥

યજ્જ્યોતિરભ્રં સ્વપુરં પુરાણં
કૂટસ્થમવ્યક્તમનન્તરૂપમ્ ।
નિત્યં ચ દીર્ઘાદિવિશેષણાદ્યૈ-
ર્હીનં શિવસ્ત્વં તત એવ સર્વમ્ ॥ ૭૫॥

બ્રહ્મોવાચ ।
એતચ્છ્રુત્વા વચસ્તસ્ય મહાદેવો મુનીશ્વર ॥

બભૂવ સુપ્રસન્નશ્ચ ન જઘાન સ માં તતઃ ॥ ૭૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે સતીવિવાહશિવલીલાવર્ણનં નામૈકોનવિંશોઽધ્યાયઃ ॥ ૨.૨.૧૯॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૨૦. વિંશોઽધ્યાયઃ । સતીવિવાહોત્સવ ।

નારદ ઉવાચ ।
બ્રહ્મન્ વિધે મહાભાગ શિવભક્ત વરપ્રભો ।
શ્રાવિતં ચરિતં શમ્ભોરદ્ભુતં મઙ્ગલાયનમ્ ॥ ૧॥

તતઃ કિમભવત્તાત કથ્યતાં શશિમૌલિનઃ ।
સત્યાશ્ચ ચરિતં દિવ્યં સર્વાઘૌઘવિનાશનમ્ । ૨॥

બ્રહ્મોવાચ ।
નિવૃત્તે શઙ્કરે ચાસ્મદ્વધાદ્ભક્તાનુકમ્પિનિ ।
અભવન્નિર્ભયાઃ સર્વે સુખિનઃ સુપ્રસન્નકાઃ ॥ ૩॥

નતસ્કન્ધાઃ સાઞ્જલયઃ પ્રણેમુર્નિખિલાશ્ચ તે ।
તુષ્ટુવુઃ શઙ્કરં ભક્ત્યા ચક્રુર્જયરવં મુદા ॥ ૪॥

એતસ્મિન્નેવ કાલેઽહં પ્રસન્નો નિર્ભયો મુને ।
અસ્તવં શઙ્કરં ભક્ત્યા વિવિધૈશ્ચ શુભસ્તવૈઃ ॥ ૫॥

તતસ્તુષ્ટમનાઃ શમ્ભુર્બહુલીલાકરઃ પ્રભુઃ ।
મુને માં સમુવાચેદં સર્વેષાં શ઼ૃણ્વતાં તદા ॥ ૬॥

રુદ્ર ઉવાચ ।
બ્રહ્મન્ તાત પ્રસન્નોઽહં નિર્ભયસ્ત્વં ભવાધુના ।
સ્વશીર્ષં સ્પૃશ હસ્તેન મદાજ્ઞાં કુર્વસંશયમ્ ॥ ૭॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચઃ શમ્ભોર્બહુલીલાકૃતઃ પ્રભોઃ ।
સ્પૃશન્ સ્વં કં તથા ભૂત્વા પ્રાણમં વૃષભધ્વજમ્ ॥ ૮॥

યાવદેવમહં સ્વં કં સ્પૃશામિ નિજપાણિના ।
તાવત્તત્ર સ્થિતં સદ્યસ્તદ્રૂપવૃષવાહનમ્ ॥ ૯॥

તતો લજ્જાપરીતાઙ્ગઃ સ્થિતશ્ચાહમધોમુખઃ ।
ઇન્દ્રાદ્યૈરમરૈઃ સર્વૈઃ સુદૃષ્ટઃ સર્વતઃ સ્થિતૈઃ ॥ ૧૦॥

અથાહં લજ્જયાવિષ્ટઃ પ્રણિપત્ય મહેશ્વરમ્ ।
પ્રાવોચં સંસ્તુતિં કૃત્વા ક્ષમ્યતાં ક્ષમ્યતામિતિ ॥ ૧૧॥

અસ્ય પાપસ્ય શુદ્ધ્યર્થં પ્રાયશ્ચિત્તં વદ પ્રભો ।
નિગ્રહં ચ તથા ન્યાય્યં યેન પાપં પ્રયાતુ મે ॥ ૧૨॥

ઇત્યુક્તસ્તુ મયા શમ્ભુરુવાચ પ્રણતં હિ મામ્ ।
સુપ્રસન્નતરો ભૂત્વા સર્વેશો ભક્તવત્સલઃ ॥ ૧૩॥

શમ્ભુરુવાચ ।
અનેનૈવ સ્વરૂપેણ મદધિષ્ઠિતકેન હિ ।
તપઃ કુરુ પ્રસન્નાત્મા મદારાધનતત્પરઃ ॥ ૧૪॥

ખ્યાતિં યાસ્યસિ સર્વત્ર નામ્ના રુદ્રશિરઃ ક્ષિતૌ ।
સાધકઃ સર્વકૃત્યાનાં તેજોભાજાં દ્વિજન્મનામ્ ॥ ૧૫॥

મનુષ્યાણામિદં કૃત્યં યસ્માદ્વીર્યં ત્વયાધુના ।
તસ્માત્ત્વં માનુષો ભૂત્વા વિચરિષ્યસિ ભૂતલે ॥ ૧૬॥

યસ્ત્વાં ચાનેન રૂપેણ દૃષ્ટ્વા કૌ વિચરિષ્યતિ ।
કિમેતદ્ બ્રહ્મણો મૂર્ધ્નિ વદન્નિતિ પુરાન્તકઃ ॥ ૧૭॥

તતસ્તે ચેષ્ટિતં સર્વં કૌતુકાચ્છ્રોષ્યતીતિ યઃ ।
પરદારકૃતાત્ત્યાગાન્મુક્તિં સદ્યઃ સ યાસ્યતિ ॥ ૧૮॥

યથા યથા જનશ્ચૈતત્કૃત્યં તે કીર્તયિષ્યતિ ।
તથા તથા વિશુદ્ધિસ્તે પાપસ્યાસ્ય ભવિષ્યતિ ॥ ૧૯॥

એતદેવ હિ તે બ્રહ્મન્ પ્રાયશ્ચિત્તં મયેરિતમ્ ।
જનહાસ્યકરં લોકે તવ ગર્હાકરં પરમ્ ॥ ૨૦॥

એતચ્ચ તવ વીર્યં હિ પતિતં વેદિમધ્યગમ્ ।
કામાર્તસ્ય મયા દૃષ્ટં નૈતદ્ધાર્યં ભવિષ્યતિ ॥ ૨૧॥

ચતુર્બિન્દુમિતં રેતઃ પતિતં યત્ક્ષિતૌ તવ ।
તન્મિતાસ્તોયદા વ્યોમ્નિ ભવેયુઃ પ્રલયઙ્કરાઃ ॥ ૨૨॥

એતસ્મિન્નન્તરે તત્ર દેવર્ષીણાં પુરો દ્રુતમ્ ।

તદ્રેતસઃ સમભવંસ્તન્મિતાશ્ચ બલાહકાઃ ॥ ૨૩॥

સંવર્તકસ્તથાવર્તઃ પુષ્કરો દ્રોણ એવ ચ ।
એતે ચતુર્વિધાસ્તાત મહામેઘા લયઙ્કરાઃ ॥ ૨૪॥

ગર્જન્તશ્ચાથ મુઞ્ચન્તસ્તોયાનીષચ્છિવેચ્છયા ।
ફેલુર્વ્યોમ્નિ મુનિશ્રેષ્ઠ તોયદાસ્તે કદારવાઃ ॥ ૨૫॥

તૈસ્તુ સઞ્છાદિતે વ્યોમ્નિ સુગર્જદ્ભિશ્ચ શઙ્કરઃ ।
પ્રશાન્ દાક્ષાયણી દેવી ભૃશં શાન્તોઽભવદ્ દ્રુતમ્ ॥ ૨૬॥

અથ ચાહં વીતભયઃ શઙ્કરસ્યાજ્ઞયા તદા ।
શેષં વૈવાહિકં કર્મ સમાપ્તિમનયં મુને ॥ ૨૭॥

પપાત પુષ્પવૃષ્ટિશ્ચ શિવાશિવશિરસ્કયોઃ ।
સર્વત્ર ચ મુનિશ્રેષ્ઠ મુદા દેવગણોજ્ઝિતા ॥ ૨૮॥

વાદ્યમાનેષુ વાદ્યેષુ ગાયમાનેષુ તેષુ ચ ।
પઠત્સુ વિપ્રવર્ગેષુ વેદાન્ ભક્ત્યાન્વિતેષુ ચ ॥ ૨૯॥

રમ્ભાદિષુ પુરન્ધ્રીષુ નૃત્યમાનાસુ સાદરમ્ ।
મહોત્સવો મહાનાસીદ્દેવપત્નીષુ નારદ ॥ ૩૦॥

અથ કર્મવિતાનેશઃ પ્રસન્નઃ પરમેશ્વરઃ ।
પ્રાહ માં પ્રાઞ્જલિં પ્રીત્યા લૌકિકીં ગતિમાશ્રિતઃ ॥ ૩૧॥

ઈશ્વર ઉવાચ ।
હે બ્રહ્મન્ સુકૃતં કર્મ સર્વં વૈવાહિકં ચ યત્ ।
પ્રસન્નોઽસ્મિ ત્વમાચાર્યો દદ્યાં તે દક્ષિણાં ચ કામ્ ॥ ૩૨॥

યાચસ્વ તાં સુરજ્યેષ્ઠ યદ્યપિ સ્યાત્સુદુર્લભા ।
બ્રૂહિ શીઘ્રં મહાભાગ નાદેયં વિદ્યતે મમ ॥ ૩૩॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચઃ સોઽહં શઙ્કરસ્ય કૃતાઞ્જલિઃ ।
મુનેઽવોચં વિનીતાત્મા પ્રણમ્યેશં મુહુર્મુહુઃ ॥ ૩૪॥

યદિ પ્રસન્નો દેવેશ વરયોગ્યોઽસ્મ્યહં યદિ ।
તત્કુરુ ત્વં મહેશાન સુપ્રીત્યા યદ્વદામ્યહમ્ ॥ ૩૫॥

અનેનૈવ તુ રૂપેણ વેદ્યામસ્યાં મહેશ્વર ।

ત્વયા સ્થેયં સદૈવાત્ર નૃણાં પાપવિશુદ્ધયે ॥ ૩૬॥

યેનાસ્ય સન્નિધૌ કૃત્વા સ્વાશ્રમં શશિશેખર ।
તપઃ કુર્યાં વિનાશાય સ્વપાપસ્યાસ્ય શઙ્કર ॥ ૩૭॥

ચૈત્રશુક્લત્રયોદશ્યાં નક્ષત્રે ભગદૈવતે ।
સૂર્યવારે ચ યો ભક્ત્યા વીક્ષેત ભુવિ માનવઃ ॥ ૩૮॥

તદૈવ તસ્ય પાપાનિ પ્રયાન્તુ હર સઙ્ક્ષયમ્ ।
વર્ધતે વિપુલં પુણ્યં રોગા નશ્યન્તુ સર્વશઃ ॥ ૩૯॥

યા નારી દુર્ભગા વન્ધ્યા કાણા રૂપવિવર્જિતા ।
સાપિ ત્વદ્દર્શનાદેવ નિર્દોષા સમ્ભવેદ્ ધ્રુવમ્ ॥ ૪૦॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચો મે હિ સ્વાત્મસર્વસુખાવહમ્ ।
તથાસ્ત્વિતિ શિવઃ પ્રાહ સુપ્રસન્નેન ચેતસા ॥ ૪૧॥

શિવ ઉવાચ ।
હિતાય સર્વલોકસ્ય વેદ્યાં તસ્યાં વ્યવસ્થિતઃ ।
સ્થાસ્યામિ સહિતઃ પત્ન્યા સત્યા ત્વદ્વચનાદ્વિધે ॥ ૪૨॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા ભગવાંસ્તત્ર સભાર્યો વૃષભધ્વજઃ ।
ઉવાચ વેદિમધ્યસ્થો મૂર્તિં કૃત્વાંશરૂપિણીમ્ ॥ ૪૩॥

તતો દક્ષં સમામન્ત્ર્ય શઙ્કરઃ પરમેશ્વરઃ ।
પત્ન્યા સત્યા ગન્તુમના અભૂત્સ્વજનવત્સલઃ ॥ ૪૪॥

એતસ્મિન્નન્તરે દક્ષો વિનયાવનતઃ સુધીઃ ।
સાઞ્જલિર્નતકઃ પ્રીત્યા તુષ્ટાવ વૃષભધ્વજમ્ ॥ ૪૫॥

વિષ્ણ્વાદયઃ સુરાઃ સર્વે મુનયશ્ચ ગણાસ્તદા ।
નત્વા સંસ્તૂય વિવિધં ચક્રુર્જયરવં મુદા ॥ ૪૬॥

આરોપ્ય વૃષભે શમ્ભુઃ સતીં દક્ષાજ્ઞયા મુદા ।
જગામ હિમવત્પ્રસ્થં વૃષભસ્થઃ સ્વયં પ્રભુઃ ॥ ૪૭॥

અથ સા શઙ્કરાભ્યાશે સુદતી ચારુહાસિની ।
વિરેજે વૃષભસ્થા વૈ ચન્દ્રાન્તે કાલિકા યથા ॥ ૪૮॥

વિષ્ણ્વાદયઃ સુરાઃ સર્વે મરીચ્યાદ્યાસ્તથર્ષયઃ ।
દક્ષોઽપિ મોહિતશ્ચાસીત્તથાન્યે નિશ્ચલા જનાઃ ॥ ૪૯॥

કેચિદ્વાદ્યાન્વાદયન્તો ગાયન્તઃ સુસ્વરં પરે ।
શિવં શિવયશઃ શુદ્ધમનુજગ્મુઃ શિવં મુદા ॥ ૫૦॥

મધ્યમાર્ગાદ્વિસૃષ્ટો હિ દક્ષઃ પ્રીત્યાથ શમ્ભુના ।
સ્વધામ પ્રાપ સગણઃ શમ્ભુઃ પ્રેમસમાકુલઃ ॥ ૫૧॥

વિસૃષ્ટા અપિ વિષ્ણ્વાદ્યાઃ શમ્ભુના પુનરેવ તે ।
અનુજગ્મુઃ શિવં ભક્ત્યા સુરાઃ પરમયા મુદા ॥ ૫૨॥

તૈઃ સર્વૈઃ સગણૈઃ શમ્ભુઃ સત્યા ચ સ્વસ્ત્રિયા યુતઃ ।
પ્રાપ સ્વં ધામ સંહૃષ્ટો હિમવદ્ ગિરિશોભિતમ્ ॥ ૫૩॥

તત્ર ગત્વાખિલાન્દેવાન્મુનીનપિ પરાંસ્તથા ।
મુદા વિસર્જયામાસ બહુ સમ્માન્ય સાદરમ્ ॥ ૫૪॥

શમ્ભુમાભાષ્ય તે સર્વે વિષ્ણ્વાદ્યા મુદિતાનનાઃ ।
સ્વં સ્વં ધામ યયુર્નત્વા સ્તુત્વા ચ મુનયઃ સુરાઃ ॥ ૫૫॥

શિવોઽપિ મુદિતોઽત્યર્થં સ્વપત્ન્યા દક્ષકન્યયા ।
હિમવત્પ્રસ્થસંસ્થો હિ વિજહાર ભવાનુગઃ ॥ ૫૬॥

તતઃ સ શઙ્કરઃ સત્યા સગણઃ સૂતિકૃન્મુને ।
પ્રાપ સ્વં ધામ સંહૃષ્ટઃ કૈલાસં પર્વતોત્તમમ્ ॥ ૫૭॥

એતદ્ વઃ સર્વમાખ્યાતં યથા તસ્ય પુરાભવત્ ।
વિવાહો વૃષયાનસ્ય મનુસ્વાયમ્ભુવાન્તરે ॥ ૫૮॥

વિવાહસમયે યજ્ઞે પ્રારમ્ભે વા શૃણોતિ યઃ ।
એતદાખ્યાનમવ્યગ્રઃ સમ્પૂજ્ય વૃષભધ્વજમ્ ॥ ૫૯॥

તસ્યાવિઘ્નં ભવેત્સર્વં કર્મ વૈવાહિકં ચ યત્ ।
શુભાખ્યમપરં કર્મ નિર્વિઘ્નં સર્વદા ભવેત્ ॥ ૬૦॥

કન્યા ચ સુખસૌભાગ્યશીલાચારગુણાન્વિતા ।
સાધ્વી સ્યાત્પુત્રિણી પ્રીત્યા શ્રુત્વાખ્યાનમિદં શુભમ્ ॥ ૬૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે સતીવિવાહવર્ણનં નામ વિંશોઽધ્યાયઃ ॥ ૨.૨.૨૦॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૨૧. એકવિંશોઽધ્યાયઃ । સતીશિવક્રીડાવર્ણનમ્ ।

નારદ ઉવાચ ।
સમીચીનં વચસ્તાત સર્વજ્ઞસ્ય તવાનઘ ।
મહાદ્ભુતં શ્રુતં નો વૈ ચરિતં શિવયોઃ શુભમ્ ॥ ૧॥

વિવાહશ્ચ શ્રુતઃ સમ્યક્ સર્વમોહાપહારકઃ ।
પરમજ્ઞાનસમ્પન્નો મઙ્ગલાલય ઉત્તમઃ ॥ ૨॥

ભૂય એવ વિવિત્સા મે ચરિતં શિવયોઃ શુભમ્ ।
તદ્વર્ણય મહાપ્રાજ્ઞ કૃપાં કૃત્વાતુલામરમ્ ॥ ૩॥

બ્રહ્મોવાચ ।
સમ્યક્કારુણિકસ્યૈવ મુને તે વિચિકિત્સિતમ્ ।
યદહં નોદિતઃ સૌમ્ય શિવલીલાનુવર્ણને ॥ ૪॥

વિવાહ્ય દક્ષજાં દેવીં સતીં ત્રૈલોક્યમાતરમ્ ।
ગત્વા સ્વધામ સુપ્રીત્યા યદકાર્ષીન્નિબોધ મે ॥ ૫॥

તતો હરઃ સ સગણઃ સ્વસ્થાનં પ્રાપ્ય મોદનમ્ ।
દેવર્ષે તત્ર વૃષભાદવાતરદતિપ્રિયાત્ ॥ ૬॥

યથાયોગ્યં નિજસ્થાનં પ્રવિશ્ય સ સતીસખઃ ।
મુમુદેઽતીવ દેવર્ષે ભવાચારકરઃ શિવઃ ॥ ૭॥

તતો વિરૂપાક્ષ ઇમાં પ્રાપ્ય દાક્ષાયણીં ગણાન્ ।
સ્વીયાન્નિર્યાપયામાસ નન્દ્યાદીન્ ગિરિકન્દરાત્ ॥ ૮॥

ઉવાચ ચૈતાંસ્તાન્ સર્વાન્નન્દ્યાદીનતિસૂનૃતમ્ ।
લૌકિકીં રીતિમાશ્રિત્ય કરુણાસાગરઃ પ્રભુઃ ॥ ૯॥

મહેશ ઉવાચ ।

યદાહં ચ સ્મરામ્યત્ર સ્મરણાદરમાનસાઃ ।
સમાગમિષ્યથ તદા મત્પાર્શ્વે મે ગણા દ્રુતમ્ ॥ ૧૦॥

ઇત્યુક્તે વામદેવેન નન્ધાદ્યાઃ સ્વગણાશ્ચ તે ।
મહાવેગા મહાવીરા નાનાસ્થાનેષુ સંયયુઃ ॥ ૧૧॥

ઈશ્વરોઽપિ તયા સાર્ધં તેષુ યાતેષુ વિભ્રમી ।
દાક્ષાયણ્યા સમં રેમે રહસ્યે મુદિતો ભૃશમ્ ॥ ૧૨॥

કદાચિદ્વન્યપુષ્પાણિ સમાહૃત્ય મનોહરામ્ ।
માલાં વિધાય સત્યાસ્તુ હારસ્થાને સ યોજયત્ ॥ ૩॥

કદાચિદ્દર્પણે ચૈવ વીક્ષન્તીમાત્મનઃ સતીમ્ ।
અનુગમ્ય હરો વક્ત્રં સ્વીયમપ્યવલોકયત્ ॥ ૧૪॥

કદાચિત્કુણ્ડલં તસ્યા ઉલ્લાસ્યોલ્લાસ્ય સઙ્ગતઃ ।
બધ્નાતિ મોચયત્યેવ સા સ્વયં માર્જયત્યપિ ॥ ૧૫॥

સરાગૌ ચરણાવસ્યાઃ યાવકેનોજ્જ્વલેન ચ ।
નિસર્ગરક્તૌ કુરુતે પૂર્ણરાગૌ વૃષધ્વજઃ ॥ ૧૬॥

ઉચ્ચૈરપિ યદાખ્યેયમન્યેષાં પુરતો બહુ ।
તત્ કર્ણે કથયત્યસ્યા હરો દ્રષ્ટું તદાનનમ્ ॥ ૧૭॥

ન દૂરમપિ ગન્તાસૌ સમાગત્ય પ્રયત્નતઃ ।
અનુબધ્નાતિ નામાક્ષી પૃષ્ઠદેશેઽન્યમાનસામ્ ॥ ૧૮॥

અન્તર્હિતસ્તુ તત્રૈવ માયયા વૃષભધ્વજઃ ।
તામાલિલિઙ્ગ ભીત્યા સ્વં ચકિતા વ્યાકુલાભવત્ ॥ ૧૯॥

સૌવર્ણપદ્મકલિકાતુલ્યે તસ્યાઃ કુચદ્વયે ।
ચકાર ભ્રમરાકારં મૃગનાભિવિશેષકમ્ ॥ ૨૦॥

હારમસ્યાઃ કુચયુગાદ્વિયોજ્ય સહસા હરઃ ।
ન્યયોજયચ્ચ તત્રૈવ સ્વકરસ્પર્શનં મુહુઃ ॥ ૨૧॥

અઙ્ગદાન્વલયાનૂર્માન્વિશ્લેષ્ય ચ પુનઃ પુનઃ ।
તત્સ્થાનાત્પુનરેવાસૌ તત્સ્થાને પ્રત્યયોજયત્ ॥ ૨૨॥

કાલિકેતિ સમાયાતિ સવર્ણા તે સખી ત્વિમામ્ ।
યાસ્યત્વસ્યાસ્તથેક્ષન્ત્યાઃ પ્રોત્તુઙ્ગૌ સાહસં કુચૌ ॥ ૨૩॥

કદાચિન્મદનોન્માદચેતનઃ પ્રમથાધિપઃ ।
ચકાર નર્મ શર્માણિ તથાકૃત્પ્રિયયા મુદા ॥ ૨૪॥

આહૃત્ય પદ્મપુષ્પાણિ રમ્યપુષ્પાણિ શઙ્કરઃ ।
સર્વાઙ્ગેષુ કરોતિ સ્મ પુષ્પાભરણમાદરાત્ ॥ ૨૫॥

ગિરિકુઞ્જેષુ રમ્યેષુ સત્યા સહ મહેશ્વરઃ ।
વિજહાર સમસ્તેષુ પ્રિયયા ભક્તવત્સલઃ ॥ ૨૬॥

તયા વિના સ્મ નો યાતિ નાસ્થિતો ન સ્મ ચેષ્ટતે ।
તયા વિના ક્ષણમપિ શર્મ લેભે ન શઙ્કરઃ ॥ ૨૭॥

વિહૃત્ય સુચિરં કાલં કૈલાસગિરિકુઞ્જરે ।
અગમદ્ધિમવત્પ્રસ્થં સસ્માર સ્વેચ્છયા સ્મરમ્ ॥ ૨૮॥

તસ્મિન્પ્રવિષ્ટે કામે તુ વસન્તઃ શઙ્કરાન્તિકે ।
વિતસ્તાર નિજં ભાવં હાર્દં વિજ્ઞાય યત્પ્રભોઃ ॥ ૨૯॥

સર્વે ચ પુષ્પિતા વૃક્ષા લતાશ્ચાન્યાશ્ચ પુષ્પિતાઃ ।
અમ્ભાંસિ ફુલ્લપદ્માનિ પદ્માઃ સભ્રમરાસ્તથા । ૩૦॥

પ્રવિષ્ટે સદૃતૌ તત્ર વવૌ સ મલયો મરુત્ ।
સુગન્ધિગન્ધપુષ્પેણ મોદકશ્ચ સુગન્ધિયુક્ ॥ ૩૧॥

સન્ધ્યાર્ધચન્દ્રસઙ્કાશાઃ પલાશાશ્ચ વિરેજિરે ।
કામાસ્ત્રવત્સુમનસઃ પ્રમોદાત્પાદપાધરઃ ॥ ૩૨॥

બભુઃ પઙ્કજપુષ્પાણિ સરસ્સુ સકલાઞ્જનાન્ ।
સમ્મોહયિતુમુદ્યુક્તા સુમુખી વાયુદેવતા ॥ ૩૩॥

નાગકેશરવૃક્ષાશ્ચ સ્વર્ણવર્ણૈઃ પ્રસૂનકૈઃ ।
બભુર્મદનકેત્વાભા મનોજ્ઞાઃ શઙ્કરાન્તિકે ॥ ૩૪॥

લવઙ્ગવલ્લી સુરભિગન્ધેનોદ્વાસ્ય મારુતમ્ ।
મોહયામાસ ચેતાંસિ ભૃશં કામિજને પુરા ॥ ૩૫॥

ચારુચર્ચિતભૃઙ્ગૌઘાઃ સુસ્વરાશ્ચૂતશાલિનઃ ।
બભુર્મદનબાણૌઘપર્યઙ્કમદનાવૃતાઃ ॥ ૩૬॥

અમ્ભાંસિ મલહીનાનિ રેજુઃ ફુલ્લકુશાશયાઃ ।

મુનીનામિવ ચેતાંસિ પ્રવ્યક્તજ્યોતિરુદ્ગમમ્ ॥ ૩૭॥

તુષારાઃ સૂર્યરશ્મીનાં સઙ્ગમાદગમન્ બહિઃ ।
પ્રમત્વાનીક્ષ્યતેક્ષાશ્ચ સલિલીહૃદયાસ્તદા ॥ ૩૮॥

પ્રસન્નાઃ સહ ચન્દ્રેણ નિર્નીશારાસ્તદાઽભવન્ ।
વિભાવર્યઃ પ્રિયેણૈવં કામિન્યઃ સુમનોહરાઃ ॥ ૩૯॥

તસ્મિન્કાલે મહાદેવઃ સહ સત્યા ધરોત્તમે ।
રેમે સ સુચિરં છન્દં નિકુઞ્જેષુ નદીષુ ચ ॥ ૪૦॥

તથા તેન સમં રેજે તદા દાક્ષાયણી મુને ।
યથા હરઃ ક્ષણમપિ શાન્તિમાપ તયા વિના ॥ ૪૧॥

સમ્ભોગવિષયે દેવી સતી તસ્ય મનઃપ્રિયા ।
વિશતીવ હરસ્યાઙ્ગે પાયયન્નિવ તદ્રસમ્ ॥ ૪૨॥

તસ્યાઃ કુસુમમાલાભિર્ભૂષયન્સકલાં તનુમ્ ।
સ્વહસ્તરચિતાભિસ્તુ નવશર્માકરોચ્ચ સઃ ॥ ૪૩॥

આલાપૈર્વીક્ષિતૈર્હાસ્યૈસ્તથા સમ્ભાષણૈર્હરઃ ।
તસ્યાદિદેશ ગિરિજાં શંસતીવાત્મસંવિદમ્ ॥ ૪૪॥

તદ્વક્ત્રચન્દ્રપીયૂષપાનસ્થિરતનુર્હરઃ ।
નાનાવૈશેષિકીં તન્વીમવસ્થાં સ કદાચન ॥ ૪૫॥

તદ્વક્ત્રામ્બુજવાસેન તત્સૌન્દર્યૈશ્ચ નર્મભિઃ ।
ગુણૈરિવ મહાદન્તી બદ્ધો નાન્યવિચેષ્ટિતઃ ॥ ૪૬॥

ઇતિ હિમગિરિકુઞ્જપ્રસ્થભાગે દરીષુ
પ્રતિદિનમભિરેમે દક્ષપુત્ર્યા મહેશઃ ।
ક્રતુભુજપરિમાણૈઃ ક્રીડતસ્તસ્ય જાતા
દશ દશ ચ સુરર્ષે વત્સરાઃ પઞ્ચ ચાન્યે ॥ ૪૭॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે સતીશિવક્રીડાવર્ણનં નામૈકવિંશોઽધ્યાયઃ ॥ ૨.૨.૨૧॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૨૨. દ્વાવિંશોઽધ્યાયઃ । શિવાશિવવિહારવર્ણનમ્ ।

બ્રહ્મોવાચ ।
કદાચિદથ દક્ષસ્ય તનયા જલદાગમે ।
કૈલાસક્ષ્માભૃતઃ પ્રાહ પ્રસ્થસ્થં વૃષભધ્વજમ્ ॥ ૧॥

સત્યુવાચ ।
દેવદેવ મહાદેવ શમ્ભો મત્પ્રાણવલ્લભ ।
શ‍ૃણુ મે વચનં નાથ શ્રુત્વા તત્કુરુ માનદ ॥ ૨॥

ઘનાગમોઽયં સમ્પ્રાપ્તઃ કાલઃ પરમદુઃસહઃ ।
અનેકવર્ણમેઘૌઘાઃ સઙ્ગીતામ્બરદિક્ચયાઃ ॥ ૩॥

વિવાન્તિ વાતા હૃદયં હારયન્તીતિ વેગિનઃ ।
કદમ્બરજસા ધૌતાઃ પાથોબિન્દુવિકર્ષણાઃ ॥ ૪॥

મેઘાનાં ગર્જિતૈરુચ્ચૈર્ધારાસારં વિમુઞ્ચતામ્ ।
વિદ્યુત્પતાકિનાં તીવ્રૈઃ ક્ષુબ્ધં સ્યાત્કસ્ય નો મનઃ ॥ ૫॥

ન સૂર્યો દૃશ્યતે નાપિ મેઘચ્છન્નો નિશાપતિઃ ।
દિવાપિ રાત્રિવદ્ભાતિ વિરહિવ્યસનાકરઃ ॥ ૬॥

મેઘા નૈકત્ર તિષ્ઠન્તો ધ્વનન્તઃ પવનેરિતાઃ ।
પતન્ત ઇવ લોકાનાં દૃશ્યન્તે મૂર્ધ્નિ શઙ્કર ॥ ૭॥

વાતાહતા મહાવૃક્ષા નર્તન્ત ઇવ ચામ્બરે ।
દૃશ્યન્તે હર ભીરૂણાં ત્રાસદાઃ કામુકેપ્સિતાઃ ॥ ૮॥

સ્નિગ્ધનીલાઞ્જનસ્યાશુ સદ્વિવૌઘસ્ય પૃષ્ઠતઃ ।
બલાકરાજીવાત્યુચ્ચૈર્યમુનાપૃષ્ઠફેનવત્ ॥ ૯॥

ક્ષપાયામીશ વલયો દૃશ્યન્તે કરભાશ્રિતાઃ ।
અમ્બુધાવિવ સન્દીપ્તપાવકો વડવામુખઃ ॥ ૧૦॥

પ્રારોહન્તીહ સસ્યાનિ મન્દરે પ્રાઙ્ગણેષ્વપિ ।
કિમન્યત્ર વિરૂપાક્ષ સસ્યોદ્ભૂતિં વદામ્યહમ્ ॥ ૧૧॥

શ્યામલૈ રાજતૈ રક્તૈર્વિશદોઽયં હિમાચલઃ ।

મન્દરાશ્રયમેઘૌઘઃ પત્રૈર્દુગ્ધામ્બુધિર્યથા ॥ ૧૨॥

અસમશ્રીશ્ચ કુટિલં ભેજે યસ્યાથ કિંશુકાન્ ।
ઉચ્ચાવચાન્ કલૌ લક્ષ્મીર્ગન્તા સન્ત્યજ્ય સજ્જનાન્ ॥ ૧૩॥

મન્દરાચલમેઘાનાં શબ્દેન હૃષિતા મુહુઃ ।
કેકાયન્તે પ્રતિવને સતતં પૃષ્ઠસૂચકમ્ ॥ ૧૪॥

મેઘોત્સુકાનાં મધુરશ્ચાતકાનાં મનોહરઃ ।
ધારાસારશરૈસ્તાપં પેતુઃ પ્રતિપથોદ્ધતમ્ ॥ ૧૫॥

મેઘાનાં પશ્ય મદ્દેહે દુર્નયં કરકોત્કરૈઃ ।
યે છાદયન્ત્યનુગતે મયૂરાંશ્ચાતકાંસ્તથા ॥ ૧૬॥

શિખિસારઙ્ગયોર્દૃષ્ટ્વા મિત્રાદપિ પરાભવમ્ ।
હર્ષં ગચ્છન્તિ ગિરિશ વિદૂરમપિ માનસમ્ ॥ ૧૭॥

એતસ્મિન્વિષમે કાલે નીડં કાકાશ્ચકોરકાઃ ।
કુર્વન્તિ ત્વાં વિના ગેહાન્ કથં શાન્તિમવાપ્સ્યસિ ॥ ૧૮॥

મહતીવાધ નો ભીતિર્માં મેઘોત્થા પિનાકધૃક્ ।
યતસ્વ યસ્માદ્વાસાય માચિરં વચનાન્મમ ॥ ૧૯॥

કૈલાસે વા હિમાદ્રૌ વા મહાકોશ્યામથ ક્ષિતૌ ।
તત્રોપયોગ્યં સંવાસં કુરુ ત્વં વૃષભધ્વજ ॥ ૨૦॥

બ્રહ્મોવાચ ।
એવમુક્તસ્તયા શમ્ભુર્દાક્ષાયણ્યા તથાસકૃત્ ।
સઞ્જહાસ ચ શીર્ષસ્થચન્દ્રરશ્મિસ્મિતાલયમ્ ॥ ૨૧॥

અથોવાચ સતીં દેવીં સ્મિતાભિન્નૌષ્ઠસમ્પુટઃ ।
મહાત્મા સર્વતત્ત્વજ્ઞસ્તોષયન્પરમેશ્વરઃ ॥ ૨૨॥

ઈશ્વરઃ ઉવાચ ।
યત્ર પ્રીત્યૈ મયા કાર્યો વાસસ્તવ મનોહરે ।
મેઘાસ્તત્ર ન ગન્તારઃ કદાચિદપિ મત્પ્રિયે ॥ ૨૩॥

મેઘા નિતમ્બપર્યન્તં સઞ્ચરન્તિ મહીભૃતઃ ।
સદા પ્રાલેયસાનોસ્તુ વર્ષાસ્વપિ મનોહરે ॥ ૨૪॥

કૈલાસસ્ય તથા દેવિ પાદગાઃ પ્રાયશો ઘનાઃ ।

સઞ્ચરન્તિ ન ગચ્છન્તિ તત ઊર્ધ્વં કદાચન ॥ ૨૫॥

સુમેરોર્વા ગિરેરૂર્ધ્વં ન ગચ્છન્તિ બલાહકાઃ ।
જમ્બૂમૂલં સમાસાદ્ય પુષ્કરાવર્તકાદયઃ ॥ ૨૬॥

ઇત્યુક્તેષુ ગિરીન્દ્રેષુ યસ્યોપરિ ભવેદ્ધિ તે ।
મનોરુચિર્નિવાસાય તમાચક્ષ્વ દ્રુતં હિ મે ॥ ૨૭॥

સ્વેચ્છાવિહારૈસ્તવ કૌતુકાનિ
સુવર્ણપક્ષાનિલવૃન્દવૃન્દૈઃ ।
શબ્દોત્તરઙ્ગૈર્મધુરસ્વનૈસ્તૈ-
ર્મુદોપગેયાનિ ગિરૌ હિમોત્થે ॥ ૨૮॥

સિદ્ધાઙ્ગનાસ્તે રચિતાસના ભુવં
કાઙ્ક્ષન્તિ ચૈવોપહૃતં સકૌતુકમ્ ।
સ્વેચ્છાવિહારે મણિકુટ્ટિમે ગિરૌ
કુર્વન્તિ ચેષ્યન્તિ ફલાદિદાનકૈઃ ॥ ૨૯॥

ફણીન્દ્રકન્યા ગિરિકન્યકાશ્ચ
યા નાગકન્યાશ્ચ તુરઙ્ગમુખ્યાઃ ।
સર્વાસ્તુ તાસ્તે સતતં સહાયતાં
સમાચરિષ્યન્ત્યનુમોદવિભ્રમૈઃ ॥ ૩૦॥

રૂપં તદેવમતુલં વદનં સુચારુ
દૃષ્ટ્વાઙ્ગના નિજવપુર્નિજકાન્તિસહ્યમ્ ।
હેલા નિજે વપુષિ રૂપગણેષુ નિત્યં
કર્તાર ઇત્યનિમિષેક્ષણચારુરૂપાઃ ॥ ૩૧॥

યા મેનકા પર્વતરાજ જાયા
રૂપૈર્ગુણૈઃ ખ્યાતવતી ત્રિલોકે ।
સા ચાપિ તે તત્ર મનોઽનુમોદં
નિત્યં કરિષ્યત્યનુનાથનાદ્યૈઃ ॥ ૩૨॥

પુરસ્થવર્ગૈર્ગિરિરાજવન્દ્યૈઃ
પ્રીતિં વિચિન્વદ્ભિરુદારરૂપામ્ ।
શિક્ષા સદા તે ખલુ શોચિતાપિ
કાર્યાન્વહં પ્રીતિયુતા ગુણાદ્યૈઃ ॥ ૩૩॥

વિચિત્રૈઃ કોકિલાલાપમોદૈઃ કુઞ્જગણાવૃતમ્ ।
સદા વસન્તપ્રભવં ગન્તુમિચ્છસિ કિં પ્રિયે ॥ ૩૪॥

નાનાબહુજલાપૂર્ણસરઃ શીતસમાવૃતમ્ ।
પદ્મિનીશતશોયુક્તમચલેન્દ્રં હિમાલયમ્ ॥ ૩૫॥

સર્વકામપ્રદૈર્વૃક્ષૈઃ શાદ્વલૈઃ કલ્પસંજ્ઞકૈઃ ।
સક્ષણં પશ્ય કુસુમાન્યથાશ્વકરિગોવ્રજમ્ ॥ ૩૬॥

પ્રશાન્તશ્વાપદગણં મુનિભિર્યતિભિર્વૃતમ્ ।
દેવાલયે મહામાયે નાનામૃગગણૈર્યુતમ્ ॥ ૩૭॥

સ્ફાટિકૈઃ સ્વર્ણવપ્રાદ્યૈ રાજતૈશ્ચ વિરાજિતમ્ ।
માનસાદિસરોરઙ્ગૈરભિતઃ પરિશોભિતમ્ ॥ ૩૮॥

હિરણ્મયૈ રત્નનાલૈઃ પઙ્કજૈર્મુકુલૈર્વૃતમ્ ।
શિશુમારૈસ્તથાસઙ્ખ્યૈઃ કચ્છપૈર્મકરૈઃ કરૈઃ ॥ ૩૯॥

નિષેવિતં મઞ્જુલૈશ્ચ તથા નીલોત્પલાદિભિઃ ।
દેવેશિ તસ્માન્મુક્તૈશ્ચ સર્વગન્ધૈશ્ચ કુઙ્કુમૈઃ ॥ ૪૦॥

લસદ્ગન્ધજલૈઃ શુભ્રૈરાપૂર્ણૈઃ સ્વચ્છકાન્તિભિઃ ।
શાદ્વલૈસ્તરુણૈસ્તુઙ્ગૈસ્તીરસ્થૈરુપશોભિતમ્ ॥ ૪૧॥

નૃત્યદ્ભિરિવ શાખોટૈર્વર્જયન્તં સ્વસમ્ભવમ્ ।
કામદેવૈઃ સારસૈશ્ચ મત્તચક્રાઙ્ગશોભિતૈઃ ॥ ૪૨॥

મધુરારાવિભિર્મોદકારિભિર્ભ્રમરાદિભિઃ ।
શબ્દાયમાનં ચ મુદા કામોદ્દીપનકારકમ્ ॥ ૪૩॥

વાસવસ્ય કુબેરસ્ય યમસ્ય વરુણસ્ય ચ ।
અગ્નેઃ કોણપરાજસ્ય મારુતસ્ય પરસ્ય ચ ॥ ૪૪॥

પુરીભિઃ શોભિશિખરં મેરોરુચ્ચૈઃ સુરાલયમ્ ।
રમ્ભાશચીમેનકાદિરમ્ભોરુગણસેવિતમ્ ॥ ૪૫॥

કિં ત્વમિચ્છસિ સર્વેષાં પર્વતાનાં હિ ભૂભૃતામ્ ।
સારભૂતે મહારમ્યે સંવિહર્તું મહાગિરૌ ॥ ૪૬॥

તત્ર દેવી સખિયુતા સાપ્સરોગણમણ્ડિતા ।
નિત્યં કરિષ્યતિ શચી તવ યોગ્યાં સહાયતામ્ ॥ ૪૭॥

અથવા મમ કૈલાસે પર્વતેન્દ્રે સદાશ્રયે ।
સ્થાનમિચ્છસિ વિત્તેશપુરીપરિવિરાજિતે ॥ ૪૮॥

ગઙ્ગાજલૌઘપ્રયતે પૂર્ણચન્દ્રસમપ્રભે ।
દરીષુ સાનુષુ સદા બ્રહ્મકન્યાભ્યુદીરિતે ॥ ૪૯॥

નાનામૃગગણૈર્યુક્તે પદ્માકરશતાવૃતે ।
સર્વૈર્ગુણૈશ્ચ સદ્વસ્તુસુમેરોરપિ સુન્દરે ॥ ૫૦॥

સ્થાનેષ્વેતેષુ યત્રાપિ તવાન્તઃકરણે સ્પૃહા ।
તં દ્રુતં મે સમાચક્ષ્વ વાસકર્તાસ્મિ તત્ર તે ॥ ૫૧॥

બ્રહ્મોવાચ ।
ઇતીરિતે શઙ્કરેણ તદા દાક્ષાયણી શનૈઃ ।
ઇદમાહ મહાદેવં લક્ષણં સ્વપ્રકાશનમ્ ॥ ૫૨॥

સત્યુવાચ ।
હિમાદ્રાવેવ વસિતુમહમિચ્છે ત્વયા સહ ।
નચિરાત્કુરુ સંવાસં તસ્મિન્નેવ મહાગિરૌ ॥ ૫૩॥

બ્રહ્મોવાચ ।
અથ તદ્વાક્યમાકર્ણ્ય હરઃ પરમમોહિતઃ ।
હિમાદ્રિશિખરં તુઙ્ગં દાક્ષાયણ્યા સમં યયૌ ॥ ૫૪॥

સિદ્ધાઙ્ગનાગણયુતમગમ્યં ચૈવ પક્ષિભિઃ ।
અગમચ્છિખરં રમ્યં સરસીવનરાજિતમ્ ॥ ૫૫॥

વિચિત્રરૂપૈઃ કમલૈઃ શિખરં રત્નકર્બુરમ્ ।
બાલાર્કસદૃશં શમ્ભુરાસસાદ સતીસખઃ ॥ ૫૬॥

સ્ફટિકાભ્રમયે તસ્મિન્ શાદ્વલદ્રુમરાજિતે ।
વિચિત્રપુષ્પાવલિભિઃ સરસીભિશ્ચ સંયુતે ॥ ૫૭॥

પ્રફુલ્લતરુશાખાગ્રં ગુઞ્જદ્ ભ્રમરસેવિતમ્ ।
પઙ્કેરુહૈઃ પ્રફુલ્લૈશ્ચ નીલોત્પલચયૈસ્તથા ॥ ૫૮॥

શોભિતં ચક્રવાકાદ્યૈઃ કાદમ્બૈર્હંસસઙ્કુલૈઃ ।
પ્રમત્તસારસૈઃ ક્રૌઞ્ચૈર્નીલસ્કન્ધૈશ્ચ શબ્દિતૈઃ ॥ ૫૯॥

પુંસ્કોકિલાનાં નિનદૈર્મધુરૈર્ગણસેવિતૈઃ ।
તુરઙ્ગવદનૈઃ સિદ્ધૈરપ્સરોભિશ્ચ ગુહ્યકૈઃ ॥ ૬૦॥

વિદ્યાધરીભિર્દેવીભિઃ કિન્નરીભિર્વિહારિતમ્ ।
પુરન્ધ્રીભિઃ પાર્વતીભિઃ કન્યાભિરભિસઙ્ગતમ્ ॥ ૬૧॥

વિપઞ્ચીતાન્ત્રિકામત્તમૃદઙ્ગપટહસ્વનૈઃ ।
નૃત્યદ્ભિરપ્સરોભિશ્ચ કૌતુકોત્થૈશ્ચ શોભિતમ્ ॥ ૬૨॥

દેવિકાભિર્દીર્ઘિકાભિર્ગન્ધિભિઃ સુસમાવૃતમ્ ।
પ્રફુલ્લકુસુમૈર્નિત્યં સુકુઞ્જૈરુપશોભિતમ્ ॥ ૬૩॥

શૈલરાજપુરાભ્યર્ણે શિખરે વૃષભધ્વજઃ ।
સહ સત્યા ચિરં રેમે એવમ્ભૂતેષુ શોભનમ્ ॥ ૬૪॥

તસ્મિન્ સ્વર્ગસમે સ્થાને દિવ્યમાનેન શઙ્કરઃ ।
દશવર્ષસહસ્રાણિ રેમે સત્યા સમં મુદા ॥ ૬૫॥

સ કદાચિત્તતઃ સ્થાનાદન્યદ્યાતિ સ્થલં હરઃ ।
કદાચિન્મેરુશિખરં દેવીદેવવૃતં સદા ॥ ૬૬॥

દ્વીપાન્નાના તથોદ્યાનવનાનિ વસુધાતલમ્ ।
ગત્વા ગત્વા પુનસ્તત્રાભ્યેત્ય રેમે સતીસુખમ્ ॥ ૬૭॥

ન યજ્ઞે સ દિવારાત્રૌ ન બ્રહ્મણિ તપસ્સમમ્ ।
સત્યાં હિ મનસા શમ્ભુઃ પ્રીતિમેવ ચકાર હ ॥ ૬૮॥

એવં મહાદેવમુખં સત્યપશ્યત્સ્મ સર્વદા ।
મહાદેવોઽપિ સર્વત્ર સદાદ્રાક્ષીત્સતીમુખમ્ ॥ ૬૯॥

એવમન્યોન્યસંસર્ગાદનુરાગમહીરુહમ્ ।
વર્ધયામાસતુઃ કાલીશિવૌ ભાવામ્બુસેચનૈઃ ॥ ૭૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે શિવાશિવવિહારવર્ણનં નામદ્વાવિંશોઽધ્યાયઃ ॥ ૨.૨.૨૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૨૩. ત્રયોવિંશોઽધ્યાયઃ । ભક્તિપ્રભાવવર્ણનમ્ ।

બ્રહ્મોવાચ ।
એવં કૃત્વા વિહારં વૈ શઙ્કરેણ ચ સા સતી ।
સન્તુષ્ટા સાભવચ્ચાતિ વિરાગા સમજાયત ॥ ૧॥

એકસ્મિન્દિવસે દેવી સતી રહસિ સઙ્ગતા ।
શિવં પ્રણમ્ય સદ્ભક્ત્યા ન્યસ્યોચ્ચૈઃ સુકૃતાઞ્જલિઃ ॥ ૨॥

સુપ્રસન્નં પ્રભું નત્વા સા દક્ષતનયા સતી ।
ઉવાચ સાઞ્જલિર્ભક્ત્યા વિનયાવનતા તતઃ ॥ ૩॥

સત્યુવાચ ।
દેવદેવ મહાદેવ કરુણાસાગર પ્રભો ।
દીનોદ્ધર મહાયોગિન્ કૃપાં કુરુ મમોપરિ ॥ ૪॥

ત્વં પરઃ પુરુષઃ સ્વામી રજઃસત્ત્વતમઃ પરઃ ।
નિર્ગુણઃ સગુણઃ સાક્ષી નિર્વિકારી મહાપ્રભુઃ ॥ ૫॥

ધન્યાહં તે પ્રિયા જાતા કામિની સુવિહારિણી ।
જાતસ્ત્વં મે પતિઃ સ્વામિન્ ભક્તવાત્સલ્યતો હર ॥ ૬॥

કૃતો બહુસમા નાથ વિહારઃ પરમસ્ત્વયા ।
સન્તુષ્ટાહં મહેશાન નિવૃત્તં મે મનસ્તતઃ ॥ ૭॥

જ્ઞાતુમિચ્છામિ દેવેશ પરં તત્ત્વં સુખાવહમ્ ।
યેન સંસારદુઃખાદ્ધૈ તરેજ્જીવોઽઞ્જસા હર ॥ ૮॥

યત્કૃત્વા વિષયી જીવઃ સ લભેત્પરમં પદમ્ ।
સંસારી ન ભવેન્નાથ તત્ત્વં વદ કૃપાં કુરુ ॥ ૯॥

બ્રહ્મોવાચ ।
ઇત્યપૃચ્છત્સ્મ સદ્ભક્ત્યા શઙ્કરં સા સતી મુને ।
આદિશક્તિર્મહેશાની જીવોદ્ધારાય કેવલમ્ ॥ ૧૦॥

આકર્ણ્ય તચ્છિવઃ સ્વામી સ્વેચ્છયોપાત્તવિગ્રહઃ ।
અવોચત્પરમપ્રીતઃ સતીં યોગવિરક્તધીઃ ॥ ૧૧॥

શિવ ઉવાચ ।

શ઼ૃણુ દેવિ પ્રવક્ષ્યામિ દાક્ષાયણિ મહેશ્વરિ ।
પરં તત્ત્વં તદેવાનુશયી મુક્તો ભવેદ્યતઃ ॥ ૧૨॥

પરતત્ત્વં વિજાનીહિ વિજ્ઞાનં પરમેશ્વરી ।
દ્વિતીયં સ્મરણં યત્ર નાહં બ્રહ્મેતિ શુદ્ધધીઃ ॥ ૧૩॥

તદ્દુર્લભં ત્રિલોકેઽસ્મિંસ્તજ્જ્ઞાતા વિરલઃ પ્રિયે ।
યાદૃશો યઃ સ દાસોઽહં બ્રહ્મ સાક્ષાત્પરાત્પરઃ ॥ ૧૪॥

તન્માતા મમ ભક્તિશ્ચ ભુક્તિમુક્તિફલપ્રદા ।
સુલભા મત્પ્રસાદાદ્ધિ નવધા સા પ્રકીર્તિતા ॥ ૧૫॥

ભક્તૌ જ્ઞાને ન ભેદો હિ તત્કર્તુઃ સર્વદા સુખમ્ ।
વિજ્ઞાનં ન ભવત્યેવ સતિ ભક્તિવિરોધિનઃ ॥ ૧૬॥

ભક્ત્યાધીઃ સદાહં વૈ તત્પ્રભાવાદ્ ગૃહેષ્વપિ ।
નીચાનાં જાતિહીનાનાં યામિ દેવિ ન સંશયઃ ॥ ૧૭॥

સા ભક્તિર્દ્વિવિધા દેવિ સગુણા નિર્ગુણા મતા ।
વૈધી સ્વાભાવિકી યા યા વરા સા ત્વવરા સ્મૃતા ॥ ૧૮॥

નૈષ્ઠિક્યનૈષ્ઠિકી ભેદાદ્ દ્વિવિધે દ્વિવિધે હિ તે ।
ષડ્વિધા નૈષ્ઠિકી જ્ઞેયા દ્વિતીયૈકવિધા સ્મૃતા ॥ ૧૯॥

વિહિતાવિહિતાભેદાત્તામનેકાં વિદુર્બુધાઃ ।
તયોર્બહુવિધત્વાચ્ચ તત્ત્વં ત્વન્યત્ર વર્ણિતમ્ ॥ ૨૦॥

તે નવાઙ્ગે ઉભે જ્ઞેયે વર્ણિતે મુનિભિઃ પ્રિયે ।
વર્ણયામિ નવાઙ્ગાનિ પ્રેમતઃ શ઼ૃણુ દક્ષજે ॥ ૨૧॥

શ્રવણં કીર્તનં ચૈવ સ્મરણં સેવનં તથા ।
દાસ્યં તથાર્ચનં દેવિ વન્દનં મમ સર્વદા ॥ ૨૨॥

સખ્યમાત્માર્પણં ચેતિ નવાઙ્ગાનિ વિદુર્બુધાઃ ।
ઉપાઙ્ગાનિ શિવે તસ્યા બહૂનિ કથિતાનિ વૈ ॥ ૨૩॥

શ઼ૃણુ દેવિ નવાઙ્ગાનાં લક્ષણાનિ પૃથક્ પૃથક્ ।
મમ ભક્તેર્મનો દત્ત્વા ભુક્તિમુક્તિપ્રદાનિ હિ ॥ ૨૪॥

કથાદેર્નિત્યસમ્માનં કુર્વન્દેહાદિભિર્મુદા ।
સ્થિરાસનેન તત્પાનં યત્તચ્છ્રવણમુચ્યતે ॥ ૨૫॥

હૃદાકાશેન સમ્પશ્યન્ જન્મકર્માણિ વૈ મમ ।
પ્રીત્યોચ્ચોચ્ચારણં તેષામેતત્કીર્તનમુચ્યતે ॥ ૨૬॥

વ્યાપકં દેવિ માં દૃષ્ટ્વા નિત્યં સર્વત્ર સર્વદા ।
નિર્ભયત્વં સદા લોકે સ્મરણં તદુદાહૃતમ્ ॥ ૨૭॥

અરુણોદયમારભ્ય સેવાકાલેઽઞ્ચિતા હૃદા ।
નિર્ભયત્વં સદા લોકે સ્મરણં તદુદાહૃતમ્ ॥ ૨૮॥

સદા સેવ્યાનુકૂલ્યેન સેવનં તદ્ધિ ગોગણૈઃ ।
હૃદયામૃતભોગેન પ્રિયં દાસ્યમુદાહૃતમ્ ॥ ૨૯॥

સદા ભૃત્યાનુકૂલ્યેન વિધિના મે પરાત્મને ।
અર્પણં ષોડશાનાં વૈ પાદ્યાદીનાં તદર્ચનમ્ ॥ ૩૦॥

મન્ત્રોચ્ચારણધ્યાનાભ્યાં મનસા વચસા ક્રમાત્ ।
યદષ્ટાઙ્ગેન ભૂસ્પર્શં તદ્વૈ વન્દનમુચ્યતે ॥ ૩૧॥

મઙ્ગલામઙ્ગલં યદ્યત્કરોતીતીશ્વરો હિ મે ।
સર્વં તન્મઙ્ગલાયેતિ વિશ્વાસઃ સખ્યલક્ષણમ્ ॥ ૩૨॥

કૃત્વા દેહાદિકં તસ્ય પ્રીત્યૈ સર્વં તદર્પણમ્ ।
નિર્વાહાય ચ શૂન્યત્વં યત્તદાત્મસમર્પણમ્ ॥ ૩૩॥

નવાઙ્ગાનીતિ મદ્ભક્તેર્ભુક્તિમુક્તિપ્રદાનિ ચ ।
મમ પ્રિયાણિ ચાતીવ જ્ઞાનોત્પત્તિકરાણિ ચ ॥ ૩૪॥

ઉપાઙ્ગાનિ ચ મદ્ભક્તેર્બહૂનિ કથિતાનિ વૈ ।
બિલ્વાદિસેવનાદીનિ સમૂહ્યાનિ વિચારતઃ ॥ ૩૫॥

ઇત્થં સાઙ્ગોપાઙ્ગભક્તિર્મમ સર્વોત્તમા પ્રિયે ।
જ્ઞાનવૈરાગ્યજનની મુક્તિદાસી વિરાજતે ॥ ૩૬॥

સર્વકર્મફલોત્પત્તિઃ સર્વદા ત્વત્સમપ્રિયા ।
યચ્ચિત્તે સા સ્થિતા નિત્યં સર્વદા સોઽતિ મત્પ્રિયઃ ॥ ૩૭॥

ત્રૈલોક્યે ભક્તિસદૃશઃ પન્થા નાસ્તિ સુખાવહઃ ।
ચતુર્યુગેષુ દેવેશિ કલૌ તુ સુવિશેષતઃ ॥ ૩૮॥

કલૌ તુ જ્ઞાનવૈરાગ્યૌ વૃદ્ધરૂપૌ નિરુત્સવૌ ।

ગ્રાહકાભાવતો દેવિ જાતૌ જર્જરતામતિ ॥ ૩૯॥

કલૌ પ્રત્યક્ષફલદા ભક્તિઃ સર્વયુગેષ્વપિ ।
તત્પ્રભાવાદહં નિત્યં તદ્વશો નાત્ર સંશયઃ ॥ ૪૦॥

યો ભક્તિમાન્પુમાઁલ્લોકે સદાહં તત્સહાયકૃત્ ।
વિઘ્નહર્તા રિપુસ્તસ્ય દણ્ડ્યો નાત્ર ચ સંશયઃ ॥ ૪૧॥

ભક્તહેતોરહં દેવિ કાલં ક્રોધપરિપ્લુતઃ ।
અદહં વહ્નિના નેત્રભવેન નિજરક્ષકઃ ॥ ૪૨॥

ભક્તહેતોરહં દેવિ રવ્યુપર્યભવં કિલ ।
અતિક્રોધાન્વિતઃ શૂલં ગૃહીત્વાન્વજયં પુરા । ૪૩॥

ભક્તહેતોરહં દેવિ રાવણં સગણં ક્રુધા ।
ત્યજામિ સ્મ કૃતો નૈવ પક્ષપાતો હિ તસ્ય વૈ ॥ ૪૪॥

ભક્તહેતોરહં દેવિ વ્યાસં હિ કુમતિગ્રહમ્ ।
કાશ્યા ન્યસારયં ક્રોધાદ્દણ્ડયિત્વા ચ નન્દિના ॥ ૪૫॥

કિં બહૂક્તેન દેવેશિ ભક્ત્યાધીનઃ સદા હ્યહમ્ ।
તત્કર્તુઃ પુરુષસ્યાતિવશગો નાત્ર સંશયઃ ॥ ૪૬॥

બ્રહ્મોવાચ ।
ઇત્થમાકર્ણ્ય ભક્તેસ્તુ મહત્ત્વં દક્ષજા સતી ।
જહર્ષાતીવ મનસિ પ્રણનામ શિવં મુદા ॥ ૪૭॥

પુનઃ પપ્રચ્છ સદ્ભક્ત્યા તત્કાણ્ડવિષયં મુને ।
શાસ્ત્રં સુખકરં લોકે જીવોદ્ધારપરાયણમ્ ॥ ૪૮॥

સયન્ત્રમન્ત્રશાસ્ત્રં ચ તન્માહાત્મ્યં વિશેષતઃ ।
અન્યાનિ ધર્મવસ્તૂનિ જીવોદ્ધારકરાણિ હિ ॥ ૪૯॥

શઙ્કરોઽપિ તદાકર્ણ્ય સતીપ્રશ્નં પ્રહૃષ્ટધીઃ ।
વર્ણયામાસ સુપ્રીત્યા જીવોદ્ધારાય કૃત્સ્નશઃ ॥ ૫૦॥

તન્ત્રશાસ્ત્રં સયન્ત્રં હિ સપઞ્ચાઙ્ગં મહેશ્વરઃ ।
બભાષે મહિમાનં ચ તત્તદ્દેવવરસ્ય વૈ ॥ ૫૧॥

સેતિહાસકથાં તેષાં ભક્તમાહાત્મ્યમેવ ચ ।
સવર્ણાશ્રમધર્માંશ્ચ નૃપધર્માન્ મુનીશ્વર ॥ ૫૨॥

સુતસ્ત્રીધર્મમાહાત્મ્યં વર્ણાશ્રમમનશ્વરમ્ ।
વૈદ્યશાસ્ત્રં તથા જ્યોતિઃશાસ્ત્રં જીવસુખાવહમ્ ॥ ૫૩॥

સામુદ્રિકં પરં શાસ્ત્રમન્યચ્છાસ્ત્રાણિ ભૂરિશઃ ।
કૃપાં કૃત્વા મહેશાનો વર્ણયામાસ તત્ત્વતઃ ॥ ૫૪॥

ઇત્થં ત્રિલોકસુખદૌ સર્વજ્ઞૌ ચ સતીશિવૌ ।
લોકોપકારકરણધૃતસદ્ગુણવિગ્રહૌ ॥ ૫૫॥

ચિક્રીડાતે બહુવિધં કૈલાસે હિમવદ્ ગિરૌ ।
અન્યસ્થલેષુ ચ તદા પરબ્રહ્મસ્વરૂપિણૌ ॥ ૫૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે ભક્તિપ્રભાવવર્ણનં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૨.૨.૨૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૨૪. ચતુર્વિંશોઽધ્યાયઃ । રામપરીક્ષાવર્ણનમ્ ।

નારદ ઉવાચ ।
બ્રહ્મન્ વિધે પ્રજાનાથ મહાપ્રાજ્ઞ કૃપાકર ।
શ્રાવિતં શઙ્કરયશઃ સતીશઙ્કરયોઃ શુભમ્ ॥ ૧॥

ઇદાનીં બ્રૂહિ સત્પ્રીત્યા પરં તદ્યશ ઉત્તમમ્ ।
કિમકાર્ષ્ટાં હિ તત્સ્થૌ વૈ ચરિતં દમ્પતી શિવૌ ॥ ૨॥

બ્રહ્મોવાચ ।
સતીશિવચરિત્રં ચ શ‍ૃણુ મે પ્રેમતો મુને ।
લૌકિકીં ગતિમાશ્રિત્ય ચિક્રીડાતે સદાન્વહમ્ ॥ ૩॥

તતઃ સતી મહાદેવી વિયોગમલભન્મુને ।
સ્વપતઃ શઙ્કરસ્યેતિ વદન્ત્યેકે સુબુદ્ધયઃ ॥ ૪॥

વાગર્થાવિવ સમ્પૃક્તૌ શક્તીશૌ સર્વદા ચિતૌ ।

કથં ઘટેત ચ તયોર્વિયોગસ્તત્ત્વતો મુને ॥ ૫॥

લીલારુચિત્વાદથવા સઙ્ઘટેતાખિલં ચ તત્ ।
કુરુતે યદ્યદીશૌ ચ સતીશૌ ભવરીતિગૌ ॥ ૬॥

સા ત્યક્ત્વા દક્ષજા દૃષ્ટ્વા પતિના જનકાધ્વરે ।
શમ્ભોરનાદરાત્તત્ર દેહં તત્યાજ સઙ્ગતા ॥ ૭॥

પુનર્હિમાલયે સૈવાવિર્ભૂતા નામતઃ સતી ।
પાર્વતીતિ શિવં પ્રાપ તપ્ત્વા ભૂરિ વિવાહતઃ ॥ ૮॥

સૂત ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય બ્રહ્મણઃ સ તુ નારદઃ ।
પપ્રચ્છ ચ વિધાતારં શિવાશિવમહદ્યશઃ ॥ ૯॥

નારદ ઉવાચ ।
વિષ્ણુશિષ્ય મહાભાગ વિધે મે વદ વિસ્તરાત્ ।
શિવાશિવચરિત્રં તદ્ભવાચારપરાનુગમ્ ॥ ૧૦॥

કિમર્થં શઙ્કરો જાયાં તત્યાજ પ્રાણતઃ પ્રિયામ્ ।
તસ્માદાચક્ષ્વ મે તાત વિચિત્રમિતિ મન્મહે ॥ ૧૧॥

કુતોઽધ્વરેઽજઃ પુત્રસ્યાનાદરોઽભૂચ્છિવસ્ય તે ।
કથં તત્યાજ સા દેહં ગત્વા તત્ર પિતુઃ ક્રતૌ ॥ ૧૨॥

તતઃ કિમભવત્તત્ર કિમકાર્ષીન્મહેશ્વરઃ ।
તત્સર્વં મે સમાચક્ષ્વ શ્રદ્ધાયુક્ તચ્છ્રુતાવહમ્ ॥ ૧૩॥

બ્રહ્મોવાચ ।
શ‍ૃણુ તાત પરપ્રીત્યા મુનિભિઃ સહ નારદ ।
સુતવર્ય મહાપ્રાજ્ઞ ચરિતં શશિમૌલિનઃ ॥ ૧૪॥

નમસ્કૃત્ય મહેશાનં હર્યાદિસુરસેવિતમ્ ।
પરબ્રહ્મ પ્રવક્ષ્યામિ તચ્ચરિત્રં મહાદ્ભુતમ્ ॥ ૧૫॥

સર્વેયં શિવલીલા હિ બહુલીલાકરઃ પ્રભુઃ ।
સ્વતન્ત્રો નિર્વિકારી ચ સતી સાપિ હિ તદ્વિધા ॥ ૧૬॥

અન્યથા કઃ સમર્થો હિ તત્કર્મકરણે મુને ।
પરમાત્મા પરબ્રહ્મ સ એવ પરમેશ્વરઃ ॥ ૧૭॥

યં સદા ભજતે શ્રીશોઽહં ચાપિ સકલાઃ સુરાઃ ।
મુનયશ્ચ મહાત્માનઃ સિધ્દ્ધાશ્ચ સનકાદયઃ ॥ ૧૮॥

શેષઃ સદા યશો યસ્ય મુદા ગાયતિ નિત્યશઃ ।
પારં ન લભતે તાત સ પ્રભુઃ શઙ્કરઃ શિવઃ ॥ ૧૯॥

તસ્યૈવ લીલયા સર્વોઽયમિતિ તત્ત્વવિભ્રમઃ ।
તત્ર દોષો ન કસ્યાપિ સર્વવ્યાપી સ પ્રેરકઃ ॥ ૨૦॥

એકસ્મિન્સમયે રુદ્રઃ સત્યા ત્રિભવને ભવઃ ।
વૃષમારુહ્ય પર્યાટદ્રસાં લીલાવિશારદઃ ॥ ૨૧॥

આગત્ય દણ્ડકારણ્યં પર્યટન્ સાગરામ્બરામ્ ।
દર્શયન્ તત્રગાં શોભાં સત્યૈ સત્યપણઃ પ્રભુઃ ॥ ૨૨॥

તત્ર રામં દદર્શાસૌ લક્ષ્મણેનાન્વિતં હરઃ ।
અન્વિષ્યન્તં પ્રિયાં સીતાં રાવણેન હૃતાં છલાત્ ॥ ૨૩॥

હા સીતેતિ પ્રોચ્ચરન્તં વિરહાવિષ્ટમાનસમ્ ।
યતસ્તતશ્ચ પશ્યન્તં રુદન્તં હિ મુહુર્મુહુઃ ॥ ૨૪॥

સમિચ્છન્તં ચ તત્પ્રાપ્તિં પૃચ્છન્તં તદ્ગતિં હૃદા ।
કુજાદિભ્યો નષ્ટધિયમત્રપં શોકવિહ્વલમ્ ॥ ૨૫॥

સૂર્યવંશોદ્ભવં વીરં ભૂપં દશરથાત્મજમ્ ।
ભરતાગ્રજમાનન્દરહિતં વિગતપ્રભમ્ ॥ ૨૬॥

પૂર્ણકામો વરાધીનં પ્રાણમત્સ્મ મુદા હરઃ ।
રામં ભ્રમન્તં વિપિને સલક્ષ્મણમુદારધીઃ ॥ ૨૭॥

જયેત્યુક્ત્વાન્યતોઽગચ્છન્નદાત્તસ્મૈ સ્વદર્શનમ્ ।
રામાય વિપિને તસ્મિન્ શઙ્કરો ભક્તવત્સલઃ ॥ ૨૮॥

ઇતીદૃશીં સતી દૃષ્ટ્વા શિવલીલાં વિમોહનીમ્ ।
સુવિસ્મિતા શિવં પ્રાહ શિવમાયાવિમોહિતા ॥ ૨૯॥

સત્યુવાચ ।
દેવદેવ પરબ્રહ્મ સર્વેશ પરમેશ્વર ।
સેવન્તે ત્વાં સદા સર્વે હરિબ્રહ્માદયઃ સુરાઃ ॥ ૩૦॥

ત્વં પ્રણમ્યો હિ સર્વેષાં સેવ્યો ધ્યેયશ્ચ સર્વદા ।

વેદાન્તવેદ્યો યત્નેન નિર્વિકારી પરપ્રભુઃ ॥ ૩૧॥

કાવિમૌ પુરુષૌ નાથ વિરહવ્યાકુલાકૃતી ।
વિચરન્તૌ વને ક્લિષ્ટૌ દીનૌ વીરૌ ધનુર્ધરૌ ॥ ૩૨॥

તયોર્જ્યેષ્ઠં કઞ્જશ્યામં દૃષ્ટ્વા વૈ કેન હેતુના ।
મુદિતઃ સુપ્રસન્નાત્માભવો ભક્ત ઇવાધુના ॥ ૩૩॥

ઇતિ મે સંશયં સ્વામિન્ શઙ્કર છેત્તુમર્હસિ ।
સેવ્યસ્ય સેવકે નૈવ ઘટતે પ્રણતિઃ પ્રભો ॥ ૩૪॥

બ્રહ્મોવાચ ।
આદિશક્તિઃ સતી દેવી શિવા સા પરમેશ્વરી ।
શિવમાયાવશી ભૂત્વા પપ્રચ્છેત્થં શિવં પ્રભુમ્ ॥ ૩૫॥

તદાકર્ણ્ય વચઃ સત્યાઃ શઙ્કરઃ પરમેશ્વરઃ ।
તદા વિહસ્ય સ પ્રાહ સતીં લીલાવિશારદઃ ॥ ૩૬॥

પરમેશ્વર ઉવાચ ।
શૃણુ દેવિ સતિ પ્રીત્યા યથાર્થં વચ્મિ નચ્છલમ્ ।
વરદાનપ્રભાવાત્તુ પ્રણામં ચૈવમાદરાત્ ॥ ૩૭॥

રામલક્ષ્મણનામાનૌ ભ્રાતરૌ વીરસમ્મતૌ ।
સૂર્યવંશોદ્ભવૌ દેવિ પ્રાજ્ઞૌ દશરથાત્મજૌ ॥ ૩૮॥

ગૌરવર્ણો લઘુર્બન્ધુઃ શેષેશો લક્ષ્મણાભિધઃ ।
જ્યેષ્ઠો રામાભિધો વિષ્ણુઃ પૂર્ણાંશો નિરુપદ્રવઃ ॥ ૩૯॥

અવતીર્ણઃ ક્ષિતૌ સાધુરક્ષણાય ભવાય નઃ ।
ઇત્યુક્ત્વા વિરરામાસૌ શમ્ભુઃ સૂતિકરઃ પ્રભુઃ ॥ ૪૦॥

શ્રુત્વાપીત્થં વચઃ શમ્ભોર્ન વિશશ્વાસ તન્મનઃ ।
શિવમાયા બલવતી સૈવ ત્રૈલોક્યમોહિની ॥ ૪૧॥

અવિશ્વસ્તં મનો જ્ઞાત્વા તસ્યાઃ શમ્ભુઃ સનાતનઃ ।
અવોચદ્વચનં ચેતિ પ્રભુર્લીલાવિશારદઃ ॥ ૪૨॥

શિવ ઉવાચ ।
શૃણુ મદ્વચનં દેવિ ન વિશ્વસિતિ ચેન્મનઃ ।
તવ રામપરિક્ષાં હિ કુરુ તત્ર સ્વયા ધિયા ॥ ૪૩॥

વિનશ્યતિ યથા મોહસ્તત્કુરુ ત્વં સતિ પ્રિયે ।
ગત્વા તત્ર સ્થિતસ્તાવદ્ વટે ભવ પરીક્ષિકા ॥ ૪૪॥

બ્રહ્મોવાચ ।
શિવાજ્ઞયા સતી તત્ર ગત્વાચિન્તયદીશ્વરી ।
કુર્યાં પરીક્ષાં ચ કથં રામસ્ય વનચારિણઃ ॥ ૪૫॥

સીતારૂપમહં ધૃત્વા ગચ્છેયં રામસન્નિધૌ ।
યદિ રામો હરિઃ સર્વં વિજ્ઞાસ્યતિ ન ચાન્યથા ॥ ૪૬॥

ઇત્થં વિચાર્ય સીતા સા ભૂત્વા રામસમીપતઃ ।
અગમત્તત્પરીક્ષાર્થં સતી મોહપરાયણા ॥ ૪૭॥

સીતારૂપાં સતીં દૃષ્ટ્વા જપન્નામ શિવેતિ ચ ।
વિહસ્ય તત્પ્રવિજ્ઞાય નત્વાવોચદ્ રઘૂદ્વહઃ ॥ ૪૮॥

શ્રીરામ ઉવાચ ।
પ્રેમતસ્ત્વં સતિ બ્રૂહિ ક્વ શમ્ભુસ્તે નમો ગતઃ ।
એકાકી વિપિને કસ્માદાગતા પતિના વિના ॥ ૪૯॥

ત્યક્ત્વા સ્વરૂપં કસ્માત્તે ધૃતં રૂપમિદં સતિ ।
બ્રૂહિ તત્કારણં દેવિ કૃપાં કૃત્વા મમોપરિ ॥ ૫૦॥

બ્રહ્મોવાચ ।
ઇતિ રામવચઃ શ્રુત્વા ચકિતાસીત્સતી તદા ।
સ્મૃત્વા શિવોક્તં મત્વા ચાવિતથં લજ્જિતા ભૃશમ્ ॥ ૫૧॥

રામં વિજ્ઞાય વિષ્ણું તં સ્વરૂપં સંવિધાય ચ ।
સ્મૃત્વા શિવપદં ચિત્તે સત્યુવાચ પ્રસન્નધીઃ ॥ ૫૨॥

શિવો મયા ગણૈશ્ચૈવ પર્યટન્ વસુધાં પ્રભુઃ ।
ઇહાગચ્છચ્ચ વિપિને સ્વતન્ત્રઃ પરમેશ્વરઃ ॥ ૫૩॥

અપશ્યદત્ર સ ત્વાં હિ સીતાન્વેષણતત્પરમ્ ।
સલક્ષ્મણં વિરહિણં સીતયા ક્લિષ્ટમાનસમ્ ॥ ૫૪॥

નત્વા ત્વાં સ ગતો મૂલે વટસ્ય સ્થિત એવ હિ ।
પ્રશંસન્ મહિમાનં તે વૈષ્ણવં પરમં મુદા ॥ ૫૫॥

ચતુર્ભુજં હરિં ત્વાં નો દૃષ્ટ્વૈવ મુદિતોઽભવત્ ।

યથેદં રૂપમમલં પશ્યન્નાનન્દમાપ્તવાન્ ॥ ૫૬॥

તચ્છ્રુત્વા વચનં શમ્ભોર્ભ્રમમાનીય ચેતસિ ।
તદાજ્ઞયા પરીક્ષાં તે કૃતવત્યસ્મિ રાઘવ ॥ ૫૭॥

જ્ઞાતં મે રામ વિષ્ણુસ્ત્વં દૃષ્ટા તે પ્રભુતાખિલા ।
નિઃસંશયા તદાપિ તચ્છૃણુ ત્વં ચ મહામતે ॥ ૫૮॥

કથં પ્રણમ્યસ્ત્વં તસ્ય સત્યં બ્રૂહિ મમાગ્રતઃ ।
કુરુ નિઃસંશયાં ત્વં માં શમલં પ્રાપ્નુહિ દ્રુતમ્ ॥ ૫૯॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્યા રામશ્ચોત્ફુલ્લલોચનઃ ।
અસ્મરત્સ્વં પ્રભું શમ્ભું પ્રેમાભૂદ્ હૃદિ ચાધિકમ્ ॥ ૬૦॥

સત્યા વિનાજ્ઞયા શમ્ભુસમીપં નાગમન્મુને ।
સંવર્ણ્ય મહિમાનં ચ પ્રાવોચદ્રાઘવઃ સતીમ્ ॥ ૬૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે રામપરીક્ષાવર્ણનં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૨.૨.૨૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૨૫. પઞ્ચવિંશોઽધ્યાયઃ । શિવસતીવિયોગઃ ।

શ્રીરામ ઉવાચ ।
એકદા હિ પુરા દેવિ શમ્ભુઃ પરમસૂતિકૃત્ ।
વિશ્વકર્માણમાહૂય સ્વલોકે પરતઃ પરે ॥ ૧॥

તેન સ્વધેનુશાલાયાં કારયામાસ વિસ્તૃતમ્ ।
રમ્યં ચ ભવનં સમ્યક્ તત્ર સિંહાસનં વરમ્ ॥ ૨॥

તત્ર ચ્છત્રં મહાદિવ્યં સર્વદાદ્ભુતમુત્તમમ્ ।
કારયામાસ વિઘ્નાર્થં શઙ્કરો વિશ્વકર્મણા ॥ ૩॥

શક્રાદીનાં જુહાવાશુ સમસ્તાન્ દેવતાગણાન્ ।

સિદ્ધગન્ધર્વનાગાદીનુપદેવાંશ્ચ કૃત્સ્નશઃ ॥ ૪॥

દેવાન્ સર્વાનાગમાંશ્ચ વિધિપુત્રાન્ મુનીનપિ ।
દેવીઃ સર્વા અપ્સરોભિર્નાનાવસ્તુસમન્વિતાઃ ॥ ૫॥

દેવાનાં ચ તથર્ષીણાં સિદ્ધાનાં ફણિનામપિ ।
આનયન્ મઙ્ગલકરાઃ કન્યાઃ ષોડશ ષોડશ ॥ ૬॥

વીણામૃદઙ્ગપ્રમુખવાદ્યાન્નાનાવિધાન્ મુને ।
ઉત્સવં કારયામાસ વાદયિત્વા સુગાયનૈઃ ॥ ૭॥

રાજાભિષેકયોગ્યાનિ દ્રવ્યાણિ સકલૌષધૈઃ
પ્રત્યક્ષતીર્થપાથોભિઃ પઞ્ચકુમ્ભાંશ્ચ પૂરિતાન્ । ૮॥

તથાન્યાઃ સંવિધા દિવ્યા આનયત્સ્વગણૈસ્તદા ।
બ્રહ્મઘોષં મહારાવં કારયામાસ શઙ્કરઃ ॥ ૯॥

અથો હરિં સમાહૂય વૈકુણ્ઠાત્પ્રીતમાનસઃ ।
તદ્ભક્ત્યા પૂર્ણયા દેવિ મોદતિ સ્મ મહેશ્વરઃ ॥ ૧૦॥

સુમુહૂર્તે મહાદેવસ્તત્ર સિંહાસને વરે ।
ઉપવેશ્ય હરિં પ્રીત્યા ભૂષયામાસ સર્વશઃ ॥ ૧૧॥

આબદ્ધરમ્યમુકુટં કૃતકૌતુકમઙ્ગલમ્ ।
અભ્યષિઞ્ચન્મહેશસ્તુ સ્વયં બ્રહ્માણ્ડમણ્ડપે ॥ ૧૨॥

દત્તવાન્નિખિલૈશ્વર્યં યન્નૈજં નાન્યગામિ યત્ ।
તતસ્તુષ્ટાવ તં શમ્ભુઃ સ્વતન્ત્રો ભક્તવત્સલઃ ॥ ૧૩॥

બ્રહ્માણં લોકકર્તારમવોચદ્વચનં ત્વિદમ્ ।
વ્યાપયન્સ્વં વરાધીનં સ્વતન્ત્રં ભક્તવત્સલઃ ॥ ૧૪॥

મહેશ ઉવાચ ।
અતઃ પ્રભૃતિ લોકેશ મન્નિદેશાદયં હરિઃ ।
મમ વન્દ્યઃ સ્વયં વિષ્ણુર્જાતઃ સર્વઃ શ‍ૃણોતિ હિ ॥ ૧૫॥

સર્વૈર્દેવાદિભિસ્તાત પ્રણમ ત્વમમું હરિમ્ ।
વર્ણયન્તુ હરિં વેદા મમૈતે મામિવાજ્ઞયા ॥ ૧૬॥

શ્રીરામ ઉવાચ ।
ઇત્યુક્ત્વાથ સ્વયં રુદ્રોઽનમદ્વૈ ગરુડધ્વજમ્ ।

વિષ્ણુભક્તિપ્રસન્નાત્મા વરદો ભક્તવત્સલઃ ॥ ૧૭॥

તતો બ્રહ્માદિભિર્દેવૈઃ સર્વરૂપસુરૈસ્તથા ।
મુનિસિદ્ધાદિભિશ્ચૈવ વન્દિતોઽભૂદ્ધરિસ્તદા ॥ ૧૮॥

તતો મહેશો હરયેઽશંસદ્દિવિષદાં પુરઃ ।
મહાવરાન્ સુપ્રસન્નો દત્તવાન્ ભક્તવત્સલઃ ॥ ૧૯॥

મહેશ ઉવાચ ।
ત્વં કર્તા સર્વલોકાનાં ભર્તા હર્તા મદાજ્ઞયા ।
દાતા ધર્માર્થકામાનાં શાસ્તા દુર્ણયકારિણામ્ ॥ ૨૦॥

જગદીશો જગત્પૂજ્યો મહાબલપરાક્રમઃ ।
અજેયસ્ત્વં રણે ક્વાપિ મમાપિ હિ ભવિષ્યસિ ॥ ૨૧॥

શક્તિત્રયં ગૃહાણ ત્વમિચ્છાદિ પ્રાપિતં મયા ।
નાનાલીલાપ્રભાવત્વં સ્વતન્ત્રત્વં ભવત્રયે ॥ ૨૨॥

ત્વદ્દ્વેષ્ટારો હરે નૂનં મયા શાસ્યાઃ પ્રયત્નતઃ ।
ત્વદ્ભક્તાનાં મયા વિષ્ણો દેયં નિર્વાણમુત્તમમ્ ॥ ૨૩॥

માયાં ચાપિ ગૃહાણેમાં દુઃપ્રણોદ્યાં સુરાદિભિઃ ।
યયા સમ્મોહિતં વિશ્વમચિદ્રૂપં ભવિષ્યતિ ॥ ૨૪॥

મમ બાહુર્મદીયસ્ત્વં દક્ષિણોઽસૌ વિધિર્હરે ।
અસ્યાપિ હિ વિધેઃ પાતા જનિતાપિ ભવિષ્યસિ ॥ ૨૫॥

હૃદયં મમ યો રુદ્રઃ સ એવાહં ન સંશયઃ ।
પૂજ્યસ્તવ સદા સોઽપિ બ્રહ્માદીનામપિ ધ્રુવમ્ ॥ ૨૬॥

અત્ર સ્થિત્વા જગત્સર્વં પાલય ત્વં વિશેષતઃ ।
નાનાવતારભેદૈશ્ચ સદા નાનોતિકર્તૃભિઃ ॥ ૨૭॥

મમ લોકે તવેદં વૈ સ્થાનં ચ પરમર્દ્ધિમત્ ।
ગોલોક ઇતિ વિખ્યાતં ભવિષ્યતિ મહોજ્જ્વલમ્ ॥ ૨૮॥

ભવિષ્યન્તિ હરે યે તેઽવતારા ભુવિ રક્ષકાઃ ।
મદ્ભક્તાસ્તાન્ ધ્રુવં દ્રક્ષ્યે પ્રીતાનથ નિજાદ્ વરાત્ ॥ ૨૯॥

શ્રીરામ ઉવાચ ।
અખણ્ડૈશ્વર્યમાસાદ્ય હરેરિત્થં હરઃ સ્વયમ્ ।

કૈલાસે સ્વગણૈસ્તસ્મિન્ સ્વૈરં ક્રીડત્યુમાપતિઃ ॥ ૩૦॥

તદાપ્રભૃતિ લક્ષ્મીશો ગોપવેષોઽભવત્તથા ।
અયાસીત્તત્ર સુપ્રીત્યા ગોપગોપીગવાં પતિઃ ॥ ૩૧॥

સોઽપિ વિષ્ણુઃ પ્રસન્નાત્મા જુગોપ નિખિલં જગત્ ।
નાનાવતારસન્ધર્તાવનકર્તા શિવાજ્ઞયા ॥ ૩૨॥

ઇદાનીં સ ચતુર્દ્ધાત્રાવાતરચ્છઙ્કરાજ્ઞયા ।
રામોઽહં તત્ર ભરતો લક્ષ્મણઃ શત્રુહેતિ ચ ॥ ૩૩॥

અથ પિત્રાજ્ઞયા દેવિ સસીતાલક્ષ્મણઃ સતિ ।
આગતોઽહં વને ચાદ્ય દુઃખિતો દૈવતોઽભવમ્ ॥ ૩૪॥

નિશાચરેણ મે જાયા હૃતા સીતેતિ કેનચિત્ ।
અન્વેષ્યામિ પ્રિયાં ચાત્ર વિરહી બન્ધુના વને ॥ ૩૫॥

દર્શનં તે યદિ પ્રાપ્તં સર્વથા કુશલં મમ ।
ભવિષ્યતિ ન સન્દેહો માતસ્તે કૃપયા સતિ ॥ ૩૬॥

સીતાપ્રાપ્તિવરં દેવિ ભવિષ્યતિ ન સંશયઃ ।
તં હત્વા દુઃખદં પાપં રાક્ષસં ત્વદનુગ્રહાત્ ॥ ૩૭॥

મહદ્ભાગ્યં મમાદ્યૈવ યદ્યકાર્ષ્ટાં કૃપાં યુવામ્ ।
યસ્મિન્ સકરુણૌ સ્યાતાં સ ધન્યઃ પુરુષો વરઃ ॥ ૩૮॥

ઇત્થમાભાષ્ય બહુધા સુપ્રણમ્ય સતીં શિવામ્ ।
તદાજ્ઞયા વને તસ્મિન્ વિચચાર રઘૂદ્વહઃ ॥ ૩૯॥

અથાકર્ણ્ય સતી વાક્યં રામસ્ય પ્રયતાત્મનઃ ।
હૃષ્ટાભૂત્સા પ્રશંસન્તં શિવભક્તિરતં હૃદિ ॥ ૪૦॥

સ્મૃત્વા સ્વકર્મ મનસાકાર્ષીચ્છોકં સુવિસ્તરમ્ ।
પ્રત્યાગચ્છદુદાસીના વિવર્ણા શિવસન્નિધૌ ॥ ૪૧॥

પથિ સાચિન્તયદ્ દેવી સઞ્ચલન્તી પુનઃ પુનઃ ।
નાઙ્ગીકૃતં શિવોક્તં મે રામં પ્રતિ કુધીઃ કૃતા ॥ ૪૨॥

કિમુત્તરમહં દાસ્યે ગત્વા શઙ્કરસન્નિધૌ ।
ઇતિ સઞ્ચિન્ત્ય બહુધા પશ્ચાત્તાપોઽભવત્તદા ॥ ૪૩॥

ગત્વા શમ્ભુસમીપં ચ પ્રણનામ શિવં હૃદા ।
વિષણ્ણવદના શોકવ્યાકુલા વિગતપ્રભા ॥ ૪૪॥

અથ તાં દુઃખિતાં દૃષ્ટ્વા પપ્રચ્છ કુશલં હરઃ ।
પ્રોવાચ વચનં પ્રીત્યા તત્પરીક્ષા કૃતા કથમ્ ॥ ૪૫॥

શ્રુત્વા શિવવચો નાહં કિમપિ પ્રણતાનના ।
સતી શોકવિષણ્ણા સા તસ્થૌ તત્ર સમીપતઃ ॥ ૪૬॥

અથ ધ્યાત્વા મહેશસ્તુ બુબોધ ચરિતં હૃદા ।
દક્ષજાયા મહાયોગી નાનાલીલાવિશારદઃ ॥ ૪૭॥

સસ્માર સ્વપણં પૂર્વં યત્કૃતં હરિકોપતઃ ।
તત્પ્રાર્થિતોઽથ રુદ્રોઽસૌ મર્યાદાપ્રતિપાલકઃ ॥ ૪૮॥

વિષાદોઽભૂત્પ્રભોસ્તત્ર મનસ્યેવમુવાચ હ ।
ધર્મવક્તા ધર્મકર્તા ધર્માવનકરઃ સદા ॥ ૪૯॥

શિવ ઉવાચ ।
કુર્યાં ચેદ્દક્ષજાયાં હિ સ્નેહં પૂર્વં યથા મહાન્ ।
નશ્યેન્મમ પણઃ શુદ્ધો લોકલીલાનુસારિણઃ ॥ ૫૦॥

બ્રહ્મોવાચ ।
ઇત્થં વિચાર્ય બહુધા હૃદા તામત્યજત્સતીમ્ ।
પણં ન નાશયામાસ વેદધર્મપ્રપાલકઃ ॥ ૫૧॥

તતો વિહાય મનસા સતીં તાં પરમેશ્વરઃ ।
જગામ સ્વગિરિં ભેદં જગાવદ્ધા સ હિ પ્રભુઃ ॥ ૫૨॥

ચલન્તં પથિ તં વ્યોમવાણ્યુવાચ મહેશ્વરમ્ ।
સર્વાન્ સંશ્રાવયંસ્તત્ર દક્ષજાં ચ વિશેષતઃ ॥ ૫૩॥

વ્યોમવાણ્યુવાચ ।
ધન્યસ્ત્વં પરમેશાન ત્વત્સમોઽદ્ય તથા પણઃ ।
ન કોઽપ્યન્યસ્ત્રિલોકેઽસ્મિન્ મહાયોગી મહાપ્રભુઃ ॥ ૫૪॥

બ્રહ્મોવાચ ।
શ્રુત્વા વ્યોમવચો દેવી શિવં પપ્રચ્છ વિપ્રભા ।
કં પણં કૃતવાન્નાથ બ્રૂહિ મે પરમેશ્વર ॥ ૫૫॥

ઇતિ પૃષ્ટોઽપિ ગિરિશઃ સત્યા હિતકરઃ પ્રભુઃ ।
નોદ્વાહં સ્વં પણં તસ્યૈ યત્ હર્યગ્રેઽકરોત્પુરા ॥ ૫૬॥

તદા સતી શિવં ધ્યાત્વા સ્વપતિં પ્રાણવલ્લભમ્ ।
સર્વં બુબોધ હેતું તં પ્રિયત્યાગમયં મુને ॥ ૫૭॥

તતોઽતીવ શુશોચાશુ બુધ્વા સા ત્યાગમાત્મનઃ ।
શમ્ભુના દક્ષજા તસ્માન્નિઃશ્વસન્તી મુહુર્મુહુઃ ॥ ૫૮॥

શિવસ્તસ્યાઃ સમાજ્ઞાય ગુપ્તં ચક્રે મનોભવમ્ ।
સત્યૈ પણં સ્વકીયં હિ કથા બહ્વીર્વદન્ પ્રભુઃ ॥ ૫૯॥

સત્યા પ્રાપ સ કૈલાસં કથયન્ વિવિધાઃ કથાઃ ।
વરે સ્થિત્વા નિજં રૂપં દધૌ યોગી સમાધિભૃત્ ॥ ૬૦॥

તત્ર તસ્થૌ સતી ધામ્નિ મહાવ્યાકુલમાનસા ।
ન બુબોધ ચરિત્રં તત્કશ્ચિચ્ચ શિવયોર્મુને ॥ ૬૧॥

મહાન્કાલો વ્યતીયાય તયોરિત્થં મહામુને ।
સ્વોપાત્તદેહયોઃ પ્રભ્વોર્લોકલીલાનુસારિણોઃ ॥ ૬૨॥

ધ્યાનં તત્યાજ ગિરિશસ્તતઃ સ પરમોતિકૃત્ ।
તજ્જ્ઞાત્વા જગદમ્બા હિ સતી તત્રાજગામ સા ॥ ૬૩॥

નનામાથ શિવં દેવી હૃદયેન વિદૂયતા ।
આસનં દત્તવાન્ શમ્ભુઃ સ્વસમ્મુખ ઉદારધીઃ ॥ ૬૪॥

કથયામાસ સુપ્રીત્યા કથા વહ્વીર્મનોરમાઃ ।
નિઃશોકાં કૃતવાન્ સદ્યો લીલાં કૃત્વા ચ તાદૃશીમ્ ॥ ૬૫॥

પૂર્વવત્સા સુખં લેભે તત્યાજ સ્વપણં ન સઃ ।
નેત્યાશ્ચર્યં શિવે તાત મન્તવ્યં પરમેશ્વરે ॥ ૬૬॥

ઇત્થં શિવાશિવકથાં વદન્તિ મુનયો મુને ।
કિલ કેચિદવિદ્વાંસો વિયોગશ્ચ કથં તયોઃ ॥ ૬૭॥

શિવાશિવચરિત્રં કો જાનાતિ પરમાર્થતઃ ।
સ્વેચ્છયા ક્રીડતસ્તૌ હિ ચરિતં કુરુતઃ સદા ॥ ૬૮॥

વાગર્થાવિવ સમ્પૃક્તૌ સદા ખલુ સતીશિવૌ ।
તયોર્વિયોગોઽસમ્ભાવ્યઃ સમ્ભવેદિચ્છયા તયોઃ ॥ ૬૯॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે સતીવિયોગો નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૨.૨.૨૫॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૨૬. ષડ્વિંશોઽધ્યાયઃ । શિવસતીવિયોગઃ ।

બ્રહ્મોવાચ ।
પુરાભવચ્ચ સર્વેષામધ્વરો વિધિના મહાન્ ।
પ્રયાગે સમવેતાનાં મુનીનાં ચ મહાત્મનામ્ ॥ ૧॥

તત્ર સિદ્ધાઃ સમાયાતાઃ સનકાદ્યાઃ સુરર્ષયઃ ।
સપ્રજાપતયો દેવા જ્ઞાનિનો બ્રહ્મદર્શિનઃ ॥ ૨॥

અહં સમાગતસ્તત્ર પરિવારસમન્વિતઃ ।
નિગમૈરાગમૈર્યુક્તો મૂર્તિમદ્ભિર્મહાપ્રભૈઃ ॥ ૩॥

સમાજોઽભૂદ્વિચિત્રો હિ તેષામુત્સવસંયુતઃ ।
જ્ઞાનવાદોઽભવત્તત્ર નાનાશાસ્ત્રસમુદ્ભવઃ ॥ ૪॥

તસ્મિન્નવસરે રુદ્રઃ સભવાનીગણઃ પ્રભુઃ ।
ત્રિલોકહિતકૃત્સ્વામી તત્રાગાત્સૂતિકૃન્મુને ॥ ૫॥

દૃષ્ટ્વા શિવં સુરાઃ સર્વે સિદ્ધાશ્ચ મુનયસ્તથા ।
અનમંસ્તં પ્રભું ભક્ત્યા તુષ્ટુવુશ્ચ તથા હ્યહમ્ ॥ ૬॥

તસ્થુઃ શિવાજ્ઞયા સર્વે યથાસ્થાનં મુદાન્વિતાઃ ।
પ્રભુદર્શનસન્તુષ્ટાઃ વર્ણયન્તો નિજં વિધિમ્ ॥ ૭॥

તસ્મિન્નવસરે દક્ષઃ પ્રજાપતિપતિઃ પ્રભુઃ ।
આગમત્તત્ર સુપ્રીતઃ સુવર્ચસ્વી યદૃચ્છયા ॥ ૮॥

માં પ્રણમ્ય સ દક્ષો હિ ન્યુષ્ટસ્તત્ર મદાજ્ઞયા ।
બ્રહ્માણ્ડાધિપતિર્માન્યો માની તત્ત્વબહિર્મુખઃ ॥ ૯॥

સ્તુતિભિઃ પ્રણિપાતૈશ્ચ દક્ષઃ સર્વૈઃ સુરર્ષિભિઃ ।
પૂજિતો વરતેજસ્વી કરૌ વધ્વા વિનમ્રકૈઃ ॥ ૧૦॥

નાનાવિહારકૃન્નાથઃ સ્વતન્ત્રઃ પરમોતિકૃત્ ।
નાનામત્તં તદા દક્ષં સ્વાસનસ્થો મહેશ્વરઃ ॥ ૧૧॥

દૃષ્ટ્વાનતં હરં તત્ર સ મે પુત્રોઽપ્રસન્નધીઃ ।
અકુપ્યત્સહસા રુદ્રે તદા દક્ષઃ પ્રજાપતિઃ ॥ ૧૨॥

ક્રૂરદૃષ્ટ્યા મહાગર્વો દૃષ્ટ્વા રુદ્રં મહાપ્રભુમ્ ।
સર્વાન્સંશ્રાવયન્નુચ્ચૈરવોચજ્જ્ઞાનવર્જિતઃ ॥ ૧૩॥

દક્ષવાચ ।
એતે હિ સર્વે ચ સુરાસુરા ભૃશં
નમન્તિ માં વિપ્રવરાસ્તથર્ષયઃ ।
કથં હ્યસૌ દુર્જનવન્મહામના
ત્વભૂત્તુ યઃ પ્રેતપિશાચસંવૃતઃ ॥ ૧૪॥

શ્મશાનવાસી નિરપત્રપો હ્યયં
કથં પ્રણામં ન કરોતિ મેઽધુના ।
લુપ્તક્રિયો ભૂતપિશાચસેવિતો
મત્તોઽવિધો નીતિવિદૂષકઃ સદા ॥ ૧૫॥

પાખણ્ડિનો દુર્જનપાપશીલા
દૃષ્ટ્વા દ્વિજં પ્રોદ્ધતનિન્દકાઞ્ચ ।
વધ્વાં સદાસક્તરતિપ્રવીણ-
સ્તસ્માદમું શપ્તુમહં પ્રવૃત્તઃ ॥ ૧૬॥

બ્રહ્મોવાચ ।
ઇત્યેવમુક્ત્વા સ મહાખલસ્તદા
રુષાન્વિતો રુદ્રમિદં હ્યવોચત્ ।
શ ૃણ્વન્ત્વમી વિપ્રવરાસ્તથા સુરા
વધ્યં હિ મે ચાર્હથ કર્તુમેતમ્ ॥ ૧૭॥

દક્ષ ઉવાચ ।
રુદ્રો હ્યયં યજ્ઞબહિષ્કૃતો મે
વર્ણેષ્વતીતોઽથ વિવર્ણરૂપઃ ।

દેવૈર્ન ભાગં લભતાં સહૈવ
શ્મશાનવાસી કુલજન્મહીનઃ ॥ ૧૮॥

બ્રહ્મોવાચ ।
ઇતિ દક્ષોક્તમાકર્ણ્ય ભૃગ્વાદ્યા બહવો જનાઃ ।
અગર્હયન્ દુષ્ટસત્ત્વં રુદ્રં મત્ત્વામરૈઃ સમમ્ ॥ ૧૯॥

નન્દી નિશમ્ય તદ્વાક્યં લોલાક્ષોઽતિરુષાન્વિતઃ ।
અબ્રવીત્ ત્વરિતં દક્ષં શાપં દાતુમના ગણઃ ॥ ૨૦॥

નન્દીશ્વર ઉવાચ ।
રે રે શઠ મહામૂઢ દક્ષ દુષ્ટમતે ત્વયા ।
યજ્ઞબાહ્યો હિ મે સ્વામી મહેશો હિ કૃતઃ કથમ્ ॥ ૨૧॥

યસ્ય સ્મરણમાત્રેણ ભવન્તિ સફલા મખાઃ ।
તીર્થાનિ ચ પવિત્રાણિ સોઽયં શપ્તો હરઃ કથમ્ ॥ ૨૨॥

વૃથા તે બ્રહ્મચાપલ્યાચ્છપ્તોઽયં દક્ષ દુર્મતે ।
વૃથોપહસિતશ્ચૈવાદુષ્ટો રુદ્રો મહાપ્રભુઃ ॥ ૨૩॥

યેનેદં પાલ્યતે વિશ્વં સૃષ્ટમન્તે વિનાશિતમ્ ।
શપ્તોઽયં સ કથં રુદ્રો મહેશો બ્રાહ્મણાધમ ॥ ૨૪॥

એવં નિર્ભત્સિતસ્તેન નન્દિના હિ પ્રજાપતિઃ ।
નન્દિનં ચ શશાપાથ દક્ષો રોષસમન્વિતઃ ॥ ૨૫॥

દક્ષ ઉવાચ ।
યૂયં સર્વે રુદ્રગણા વેદબાહ્યા ભવન્તુ વૈ ।
વેદમાર્ગપરિત્યક્તાસ્તથા ત્યક્તા મહર્ષિભિઃ ॥ ૨૬॥

પાખણ્ડવાદનિરતાઃ શિષ્ટાચારબહિષ્કૃતાઃ ।
મદિરાપાનનિરતા જટાભસ્માસ્થિધારિણઃ ॥ ૨૭॥

બ્રહ્મોવાચ ।
ઇતિ શપ્તાસ્તથા તેન દક્ષેણ શિવકિઙ્કરાઃ ।
તચ્છ્રુત્વાતિરુષાવિષ્ટોઽભવન્નન્દી શિવપ્રિયઃ ॥ ૨૮॥

પ્રત્યુવાચ દ્રુતં દક્ષં ગર્વિતં તં મહાખલમ્ ।
શિલાદતનયો નન્દી તેજસ્વી શિવવલ્લભઃ ॥ ૨૯॥

નન્દીશ્વર ઉવાચ ।
રે દક્ષ શઠ દુર્બુદ્ધે વૃથૈવ શિવકિઙ્કરાઃ ।
શપ્તાસ્તે બ્રહ્મચાપલ્યાચ્છિવતત્ત્વમજાનતા ॥ ૩૦॥

ભૃગ્વાદ્યૈર્દુષ્ટચિત્તૈશ્ચ મૂઢૈઃ સ ઉપહાસિતઃ ।
મહાપ્રભુર્મહેશાનો બ્રાહ્મણત્વાદહમ્મતે ॥ ૩૧॥

યે રુદ્રવિમુખાશ્ચાત્ર બ્રાહ્મણાસ્ત્વાદૃશાઃ ખલાઃ ।
રુદ્રતેજઃપ્રભાવત્વાત્તેષાં શાપં દદામ્યહમ્ ॥ ૩૨॥

વેદવાદરતા યૂયં વેદતત્ત્વબહિર્મુખાઃ ।
ભવન્તુ સતતં વિપ્રા નાન્યદસ્તીતિ વાદિનઃ ॥ ૩૩॥

કામાત્માનઃ સ્વર્ગપરાઃ ક્રોધલોભમદાન્વિતાઃ ।
ભવન્તુ સતતં વિપ્રા ભિક્ષુકા નિરપત્રપાઃ ॥ ૩૪॥

વેદમાર્ગં પુરસ્કૃત્ય બ્રાહ્મણાઃ શૂદ્રયાજિનઃ ।
દરિદ્રા વૈ ભવિષ્યન્તિ પ્રતિગ્રહરતાઃ સદા ॥ ૩૫॥

અસત્પ્રતિગ્રહાશ્ચૈવ સર્વે નિરયગામિનઃ ।
ભવિષ્યન્તિ સદા દક્ષ કેચિદ્વૈ બ્રહ્મરાક્ષસાઃ ॥ ૩૬॥

યઃ શિવં સુરસામાન્યમુદ્દિશ્ય પરમેશ્વરમ્ ।
દ્રુહ્યત્યજો દુષ્ટમતિઃ તત્ત્વતાં વિમુખો ભવેત્ ॥ ૩૭॥

કૂટધર્મેષુ ગેહેષુ સદા ગ્રામ્યસુખેચ્છયા ।
કર્મતન્ત્રં વિતનુતાં વેદવાદં ચ શાશ્વતમ્ ॥ ૩૮॥

વિનષ્ટાનન્દકમુખો વિસ્મૃતાત્મગતિઃ પશુઃ ।
ભ્રષ્ટકર્માનયરતો દક્ષો બસ્તમુખોઽચિરાત્ ॥ ૩૯॥

શપ્તાસ્તે કોપિના તત્ર નન્દિના બ્રાહ્મણા યદા ।
હાહાકારો મહાનાસીચ્છપ્તો દક્ષેણ ચેશ્વરઃ ॥ ૪૦॥

તદાકર્ણ્યાહમત્યન્તમનિન્દં તં મુહુર્મુહુઃ ।
ભૃગ્વાદીનપિ વિપ્રાંશ્ચ વેદસૃટ્ શિવતત્ત્વવિત્ ॥ ૪૧॥

ઈશ્વરોઽપિ વચઃ શ્રુત્વા નન્દિનઃ પ્રહસન્નિવ ।
ઉવાચ મધુરં વાક્યં બોધયંસ્તં સદાશિવઃ ॥ ૪૨॥

સદાશિવ ઉવાચ ।

શ્ૃણુ નન્દિન્ મહાપ્રાજ્ઞ ન કર્તું ક્રોધમર્હસિ ।
વૃથા શપ્તં બ્રહ્મકુલં મત્વા શપ્તં ચ માં ભ્રમાત્ ॥ ૪૩॥

વેદો મન્ત્રાક્ષરમયઃ સાક્ષાત્સૂક્તમયો ભૃશમ્ ।
સૂક્તે પ્રતિષ્ઠિતો હ્યાત્મા સર્વેષામપિ દેહિનામ્ ॥ ૪૪॥

તસ્માદાત્મવિદો નિત્યં ત્વં મા શપ રુષાન્વિતઃ ।
શપ્યા ન વેદાઃ કેનાપિ દુર્ધિયાઽપિ કદાચન ॥ ૪૫॥

અહં શપ્તો ન ચેદાનીં તત્ત્વતો બોદ્ધુમર્હસિ ।
શાન્તો ભવ મહાધીમન્ સનકાદિવિબોધકઃ ॥ ૪૬॥

યજ્ઞોઽહં યજ્ઞકર્માહં યજ્ઞાઙ્ગાનિ ચ સર્વશઃ ।
યજ્ઞાત્મા યજ્ઞનિરતો યજ્ઞબાહ્યોઽહમેવ વૈ ॥ ૪૭॥

કોઽયં કસ્ત્વમિમે કે હિ સર્વોઽહમપિ તત્ત્વતઃ ।
ઇતિ બુદ્ધ્યા હિ વિમૃશ વૃથા શપ્તાસ્ત્વયા દ્વિજાઃ ॥ ૪૮॥

તત્ત્વજ્ઞાનેન નિર્હૃત્ય પ્રપઞ્ચરચનાં ભવ ।
બુધઃસ્વસ્થો મહાબુદ્ધે નન્દિન્ ક્રોધાદિવર્જિતઃ ॥ ૪૯॥

બ્રહ્મોવાચ ।
એવં પ્રબોધિતસ્તેન શમ્ભુના નન્દિકેશ્વરઃ ।
વિવેકપરમો ભૂત્વા શાન્તોઽભૂત્ક્રોધવર્જિતઃ ॥ ૫૦॥

શિવોઽપિ તં પ્રબોધ્યાશુ સ્વગણં પ્રાણવલ્લભમ્ ।
સગણઃ સ યયૌ તસ્માત્સ્વસ્થાનં પ્રમુદાન્વિતઃ ॥ ૫૧॥

દક્ષોઽપિ સ રુષાવિષ્ટસ્તૈર્દ્વિજૈઃ પરિવારિતઃ ।
સ્વસ્થાનં ચ યયૌ ચિત્તે શિવદ્રોહપરાયણઃ ॥ ૫૨॥

રુદ્રં તદાનીં પરિશપ્યમાનં
સંસ્મૃત્ય દક્ષઃ પરયા રુષાન્વિતઃ ।
શ્રદ્ધાં વિહાયૈવ સ મૂઢબુદ્ધિ-
ર્નિન્દાપરોઽભૂચ્છિવપૂજકાનામ્ ॥ ૫૩॥

ઇત્યુક્તો દક્ષદુર્બુદ્ધિઃ શમ્ભુના પરમાત્મના ।
પરાં દુર્ધિષણાં તસ્ય શ્ૃણુ તાત વદામ્યહમ્ ॥ ૫૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે સત્યુપાખ્યાને શિવેન દક્ષવિરોધો નામ ષડ્વિંશોઽધ્યાયઃ ॥ ૨.૨.૨૬॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયા રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૨૭. સપ્તવિંશોઽધ્યાયઃ । દક્ષયજ્ઞારમ્ભઃ ।

બ્રહ્મોવાચ ।
એકદા તુ મુને તેન યજ્ઞઃ પ્રારમ્ભિતો મહાન્ ।
તત્રાહૂતાસ્તદા સર્વે દીક્ષિતેન સુરર્ષયઃ ॥ ૧॥

મહર્ષયોઽખિલાસ્તત્ર નિર્જરાશ્ચ સમાગતાઃ ।
યદ્યજ્ઞકરણાર્થં હિ શિવમાયાવિમોહિતાઃ ॥ ૨॥

અગસ્ત્યઃ કશ્યપોઽત્રિશ્ચ વામદેવસ્તથા ભૃગુઃ ।
દધીચિર્ભગવાન્ વ્યાસો ભારદ્વાજોઽથ ગૌતમઃ ॥ ૩॥

પૈલઃ પરાશરો ગર્ગો ભાર્ગવઃ કકુભઃ સિતઃ ।
સુમન્તુત્રિકકઙ્કાશ્ચ વૈશમ્પાયન એવ ચ ॥ ૪॥

એતે ચાન્યે ચ બહવો મુનયો હર્ષિતા યયુઃ ।
મમ પુત્રસ્ય દક્ષસ્ય સદારાઃ સસુતા મખમ્ ॥ ૫॥

તથા સર્વે સુરગણા લોકપાલા મહોદયાઃ ।
તથોપનિર્જરાઃ સર્વે સ્વોપકારબલાન્વિતાઃ ॥ ૬॥

સત્યલોકાત્સમાનીતો નુતોઽહં વિશ્વકારકઃ ।
સસુતઃ સપરીવારો મૂર્તવેદાદિસંયુતઃ ॥ ૭॥

વૈકુણ્ઠાચ્ચ તથા વિષ્ણુઃ સમ્પ્રાર્થ્ય વિવિધાદરાત્ ।
સપાર્ષદપરીવારઃ સમાનીતો મખં પ્રતિ ॥ ૮॥

એવમન્યે સમાયાતા દક્ષયજ્ઞં વિમોહિતાઃ ।
સત્કૃતાસ્તેન દક્ષેણ સર્વે તે હિ દુરાત્મના ॥ ૯॥

ભવનાનિ મહાર્હાણિ સુપ્રભાણિ મહાન્તિ ચ ।

ત્વષ્ટ્રા કૃતાનિ દિવ્યાનિ તેભ્યો દત્તાનિ તેન વૈ ॥ ૧૦॥

તેષુ સર્વેષુ ધિષ્ણ્યેષુ યથાયોગ્યં ચ સંસ્થિતાઃ ।
સન્માનિતા અરાજંસ્તે સકલા વિષ્ણુના મયા ॥ ૧૧॥

વર્તમાને મહાયજ્ઞે તીર્થે કનખલે તદા ।
ઋત્વિજશ્ચ કૃતાસ્તેન ભૃગ્વાદ્યાશ્ચ તપોધનાઃ ॥ ૧૨॥

અધિષ્ઠાતા સ્વયં વિષ્ણુઃ સહ સર્વમરુદ્ગણૈઃ ।
અહં તત્રાભવં બ્રહ્મા ત્રયીવિધિનિદર્શકઃ ॥ ૧૩॥

તથૈવ સર્વે દિક્પાલા દ્વારપાલાશ્ચ રક્ષકાઃ ।
સાયુધાઃ સપરીવારાઃ કુતૂહલકરાઃ સદા ॥ ૧૪॥

ઉપતસ્થે સ્વયં યજ્ઞઃ સુરૂપસ્તસ્ય ચાધ્વરે ।
સર્વે મહામુનિશ્રેષ્ઠાઃ સ્વયં વેદધરાભવન્ ॥ ૧૫॥

તનૂનપાદપિ નિજં ચક્રે રૂપં સહસ્રશઃ ।
હવિષાં ગ્રહણાયાશુ તસ્મિન્ યજ્ઞે મહોત્સવે ॥ ૧૬॥

અષ્ટાશીતિસહસ્રાણિ જુહ્વતિ સહ ઋત્વિજઃ ।
ઉદ્ગાતારશ્ચતુઃષષ્ટિસહસ્રાણિ સુરર્ષયઃ ॥ ૧૭॥

અધ્વર્યવોઽથ હોતારસ્તાવન્તો નારદાદયઃ ।
સપ્તર્ષયઃ સમા ગાથાઃ કુર્વન્તિ સ્મ પૃથક્પૃથક્ ॥ ૧૮॥

ગન્ધર્વવિદ્યાધરસિદ્ધસઙ્ઘા-
નાદિત્યસઙ્ઘાન્ સગણાન્ સયક્ષાન્ ।
સઙ્ખ્યાવતાન્નાગચરાન્ સમસ્તાન્
વવ્રે સ દક્ષો હિ મહાધ્વરે સ્વે ॥ ૧૯॥

દ્વિજર્ષિરાજર્ષિસુરર્ષિસઙ્ઘા
નૃપાઃ સમિત્રાઃ સચિવાઃ સસૈન્યાઃ ।
વસુપ્રમુખ્યા ગણદેવતાશ્ચ
સર્વે વૃતાસ્તેન મખોપવેત્રા ॥ ૨૦॥

દીક્ષાયુક્તસ્તદા દક્ષઃ કૃતકૌતુકમઙ્ગલઃ ।
ભાર્યયા સહિતો રેજે કૃતસ્વસ્ત્યયનો ભૃશમ્ ॥ ૨૧॥

તસ્મિન્ યજ્ઞે વૃતઃ શમ્ભુર્ન દક્ષેણ દુરાત્મના ।

કપાલીતિ વિનિશ્ચિત્ય તસ્ય યજ્ઞાર્હતા ન હિ ॥ ૨૨॥

કપાલિભાર્યેતિ સતી દયિતા સ્વસુતાપિ ચ ।
નાહૂતા યજ્ઞવિષયે દક્ષેણાગુણદર્શિના ॥ ૨૩॥

એવં પ્રવર્તમાને હિ દક્ષયજ્ઞે મહોત્સવે ।
સ્વકાર્યલગ્નાસ્તત્રાસન્ સર્વે તેઽધ્વરસમ્મતાઃ ॥ ૨૪॥

એતસ્મિન્નન્તરેઽદૃષ્ટ્વા તત્ર વૈ શઙ્કરં પ્રભુમ્ ।
પ્રોદ્વિગ્નમાનસઃ શૈવો દધીચો વાક્યમબ્રવીત્ ॥ ૨૫॥

દધીચ ઉવાચ ।
સર્વે શૃણુત મદ્વાક્યં દેવર્ષિપ્રમુખા મુદા ।
કસ્માન્નૈવાગતઃ શમ્ભુરસ્મિન્ યજ્ઞે મહોત્સવે ॥ ૨૬॥

એતે સુરેશા મુનયો મહત્તરાઃ
સલોકપાલાશ્ચ સમાગતા હિ ।
તથાપિ યજ્ઞસ્તુ ન શોભતે ભૃશં
પિનાકિના તેન મહાત્મના વિના ॥ ૨૭॥

યેનૈવ સર્વાણ્યપિ મઙ્ગલાનિ
ભવન્તિ શંસન્તિ મહાવિપશ્ચિતઃ ।
સોઽસૌ ન દૃષ્ટોઽત્ર પુમાન્ પુરાણો
વૃષધ્વજો નીલગલઃ પરેશઃ ॥ ૨૮॥

અમઙ્ગલાન્યેવ ચ મઙ્ગલાનિ
ભવન્તિ યેનાધિગતાનિ દક્ષ ।
ત્રિપઞ્ચકેનાપ્યથ મઙ્ગલાનિ
ભવન્તિ સદ્યઃ પરતઃ પરાણિ ॥ ૨૯॥

તસ્માત્ત્વયૈવ કર્તવ્યમાહ્વાનં પરમેશિતુઃ ।
ત્વરિતં બ્રહ્મણા વાપિ વિષ્ણુના પ્રભુવિષ્ણુના ॥ ૩૦॥

ઇન્દ્રેણ લોકપાલૈશ્ચ દ્વિજૈઃ સિદ્ધૈઃ સહાધુના ।
સર્વથાનયનીયોઽસૌ શઙ્કરો યજ્ઞપૂર્તયે ॥ ૩૧॥

સર્વૈર્ભવદ્ભિર્ગન્તવ્યં યત્ર દેવો મહેશ્વરઃ ।
દાક્ષાયણ્યા સમં શમ્ભુમાનયધ્વં ત્વરાન્વિતાઃ ॥ ૩૨॥

તેન સર્વં પવિત્રં સ્યાચ્છમ્ભુના પરમાત્મના ।
અત્રાગતેન દેવેશાઃ સામ્બેન પરમાત્મના ॥ ૩૩॥

યસ્ય સ્મૃત્યા ચ નામોક્ત્યા સમગ્રં સુકૃતં ભવેત્ ।
તસ્માત્સર્વપ્રયત્નેન હ્યાનેતવ્યો વૃષધ્વજઃ ॥ ૩૪॥

સમાગતે શઙ્કરેઽત્ર પાવનો હિ ભવેન્મખઃ ।
ભવિષ્યત્યન્યથાપૂર્ણઃ સત્યમેતદ્ બ્રવીમ્યહમ્ ॥ ૩૫॥

બ્રહ્મોવાચ ।
તસ્ય તદ્વચનં શ્રુત્વા દક્ષો રોષસમન્વિતઃ ।
ઉવાચ ત્વરિતં મૂઢઃ પ્રહસન્નિવ દુષ્ટધીઃ ॥ ૩૬॥

મૂલં વિષ્ણુર્દેવતાનાં યત્ર ધર્મઃ સનાતનઃ ।
સમાનીતો મયા સમ્યક્ કિમૂનં યજ્ઞકર્મણિ ॥ ૩૭॥

યસ્મિન્ વેદાશ્ચ યજ્ઞાશ્ચ કર્માણિ વિવિધાનિ ચ ।
પ્રતિષ્ઠિતાનિ સર્વાણિ સોઽસૌ વિષ્ણુરિહાગતઃ ॥ ૩૮॥

સત્યલોકાત્સમાયાતો બ્રહ્મા લોકપિતામહઃ ।
વેદૈઃ સોપનિષદ્ભિશ્ચ વિવિધૈરાગમૈઃ સહ ॥ ૩૯॥

તથા સુરગણૈઃ સાકમાગતઃ સુરરાટ્ સ્વયમ્ ।
તથા યૂયં સમાયાતા ઋષયો વીતકલ્મષાઃ ॥ ૪૦॥

યે યે યજ્ઞોચિતાઃ શાન્તાઃ પાત્રભૂતાઃ સમાગતાઃ ।
વેદવેદાર્થતત્ત્વજ્ઞાઃ સર્વે યૂયં દૃઢવ્રતાઃ ॥ ૪૧॥

અત્રૈવ ચ કિમસ્માકં રુદ્રેણાપિ પ્રયોજનમ્ ।
કન્યા દત્તા મયા વિપ્ર બ્રહ્મણા નોદિતેન હિ ॥ ૪૨॥

હરોઽકુલીનોઽસૌ વિપ્ર પિતૃમાતૃવિવર્જિતઃ ।
ભૂતપ્રેતપિશાચાનાં પતિરેકો દુરત્યયઃ ॥ ૪૩॥

આત્મસમ્ભાવિતો મૂઢઃ સ્તબ્ધો મૌની સમત્સરઃ ।
કર્મણ્યસ્મિન્ન યોગ્યોઽસૌ નાનીતો હિ મયાધુના ॥ ૪૪॥

તસ્માત્ત્વયેદૃશં વાક્યં પુનર્વાચ્યં ન હિ ક્વચિત્ ।
સર્વૈર્ભવદ્ભિઃ કર્તવ્યો યજ્ઞો મે સફલો મહાન્ ॥ ૪૫॥

બ્રહ્મોવાચ ।

એતચ્છ્રુત્વા વચસ્તસ્ય દધીચિર્વાક્યમબ્રવીત્ ।
સર્વેષાં શ‍ૃણ્વતાં દેવમુનીનાં સારસંયુતમ્ ॥ ૪૬॥

દધીચ ઉવાચ ।
અયજ્ઞોઽયં મહાજાતો વિના તેન શિવેન હિ ।
વિનાશોઽપિ વિશેષેણ હ્યત્ર તે હિ ભવિષ્યતિ ॥ ૪૭॥

એવમુક્ત્વા દધીચોઽસાવેક એવ વિનિર્ગતઃ ।
યજ્ઞવાટાચ્ચ દક્ષસ્ય ત્વરિતઃ સ્વાશ્રમં યયૌ ॥ ૪૮॥

તતોઽન્યે શાઙ્કરા યે ચ મુખ્યાઃ શિવમતાનુગાઃ ।
નિર્યયુઃ સ્વાશ્રમાન્ સદ્યઃ શાપં દત્ત્વા તથૈવ ચ ॥ ૪૯॥

મુનૌ વિનિર્ગતે તસ્મિન્ મખાદન્યેષુ દુષ્ટધીઃ ।
શિવદ્રોહી મુનીન્ દક્ષઃ પ્રહસન્નિદમબ્રવીત્ ॥ ૫૦॥

દક્ષ ઉવાચ ।
ગતઃ શિવપ્રિયો વિપ્રો દધીચો નામ નામતઃ ।
અન્યે તથાવિધા યે ચ ગતાસ્તે મમ ચાધ્વરાત્ ॥ ૫૧॥

એતચ્છુભતરં જાતં સમ્મતં મે હિ સર્વથા ।
સત્યં બ્રવીમિ દેવેશ સુરાશ્ચ મુનયસ્તથા ॥ ૫૨॥

વિનષ્ટચિત્તા મન્દાશ્ચ મિથ્યાવાદરતાઃ ખલાઃ ।
વેદબાહ્યા દુરાચારાઃ ત્યાજ્યાસ્તે મખકર્મણિ ॥ ૫૩॥

વેદવાદરતા યૂયં સર્વે વિષ્ણુપુરોગમાઃ ।
યજ્ઞં મે સફલં વિપ્રાઃ સુરાઃ કુર્વન્તુ માચિરમ્ ॥ ૫૪॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય શિવમાયાવિમોહિતાઃ ।
તન્મખે દેવયજનં ચક્રુઃ સર્વે સુરર્ષયઃ ॥ ૫૫॥

ઇતિ તન્મખશાપો હિ વર્ણિતો મે મુનીશ્વર ।
યજ્ઞવિધ્વંસયોગોઽપિ પ્રોચ્યતે શ‍ૃણુ સાદરમ્ ॥ ૫૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે યજ્ઞપ્રારમ્ભો નામ સપ્તવિંશોઽધ્યાયઃ ॥ ૨.૨.૨૭॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૨૮. અષ્ટાવિંશોઽધ્યાયઃ । સતીયાત્રાવર્ણનમ્ ।

બ્રહ્મોવાચ ।
યદા યયુર્દક્ષમખમુત્સવેન સુરર્ષયઃ ।
તસ્મિન્નેવાન્તરે દેવી પર્વતે ગન્ધમાદને ॥ ૧॥

ધારાગૃહે વિતાનેન સખીભિઃ પરિવારિતા ।
દાક્ષાયણી મહાક્રીડાશ્ચકાર વિવિધાઃ સતી ॥ ૨॥

ક્રીડાસક્તા તદા દેવી દદર્શાથ મુદા સતી ।
દક્ષયજ્ઞે પ્રયાન્તીં તાં રોહિણ્યાપૃચ્છ્ય સત્વરમ્ ॥ ૩॥

દૃષ્ટ્વા સીમન્તયા ભૂતાં વિજયાં પ્રાહ સા સતી ।
સ્વસખીં પ્રવરાં પ્રાણપ્રિયાં સા હિ હિતાવહામ્ ॥ ૪॥

સત્યુવાચ ।
હે સખીપ્રવરે પ્રાણપ્રિયે ત્વં વિજયે મમ ।
ક્વ ગમિષ્યતિ ચન્દ્રોઽયં રોહિણ્યા પૃચ્છ સત્વરમ્ ॥ ૫॥

બ્રહ્મોવાચ ।
તથોક્તા વિજયા સત્યા ગત્વા તત્સન્નિધૌ દ્રુતમ્ ।
ક્વ ગચ્છસીતિ પપ્રચ્છ શશિનં તં યથોચિતમ્ ॥ ૬॥

વિજયોક્તમથાકર્ણ્ય સ્વયાત્રાં પૂર્વમાદરાત્ ।
કથિતં તેન તત્સર્વં દક્ષયજ્ઞોત્સવાદિકમ્ ॥ ૭॥

તચ્છ્રુત્વા વિજયા દેવીં ત્વરિતા જાતસમ્ભ્રમા ।
કથયામાસ તત્સર્વં યદુક્તં શશિના સતીમ્ ॥ ૮॥

તચ્છ્રુત્વા કાલિકા દેવી વિસ્મિતાભૂત્સતી તદા ।
વિમૃશ્ય કારણં તત્રાજ્ઞાત્વા ચેતસ્યચિન્તયત્ ॥ ૯॥

દક્ષઃ પિતા મે માતા ચ વીરિણી નૌ કુતઃ સતી ।
આહ્વાનં ન કરોતિ સ્મ વિસ્મૃતા માં પ્રિયાં સુતામ્ ॥ ૧૦॥

પૃચ્છેયં શઙ્કરં તત્ર કારણં સર્વમાદરાત્ ।
ચિન્તયિત્વેતિ સાસીદ્વૈ તત્ર ગન્તું સુનિશ્ચયા ॥ ૧૧॥

અથ દાક્ષાયણી દેવી વિજયાં પ્રવરાં સખીમ્ ।
સ્થાપયિત્વા દ્રુતં તત્ર સમગચ્છચ્છિવાન્તિકમ્ ॥ ૧૨॥

દદર્શ તં સભામધ્યે સંસ્થિતં બહુભિર્ગણૈઃ ।
નન્દ્યાદિભિર્મહાવીરૈઃ પ્રવરૈર્યૂથયૂથપૈઃ ॥ ૧૩॥

દૃષ્ટ્વા તં પ્રભુમીશાનં સ્વપતિં સાથ દક્ષજા ।
પ્રષ્ટું તત્કારણં શીઘ્રં પ્રાપ શઙ્કરસન્નિધિમ્ ॥ ૧૪॥

શિવેન સ્થાપિતા સ્વાઙ્કે પ્રીતિયુક્તેન સ્વપ્રિયા ।
પ્રમોદિતા વચોભિઃ સા બહુમાનપુરઃસરમ્ ॥ ૧૫॥

અથ શમ્ભુર્મહાલીલઃ સર્વેશઃ સુખદઃ સતામ્ ।
સતીમુવાચ ત્વરિતં ગણમધ્યસ્થ આદરાત્ ॥ ૧૬॥

શમ્ભુરુવાચ ।
કિમર્થમાગતાત્ર ત્વં સભામધ્યે સવિસ્મયા ।
કારણં તસ્ય સુપ્રીત્યા શીઘ્રં વદ સુમધ્યમે ॥ ૧૭॥

બ્રહ્મોવાચ ।
એવમુક્તા તદા તેન મહેશેન મુનીશ્વર ।
સાઞ્જલિઃ સુપ્રણમ્યાશુ સત્યુવાચ પ્રભું શિવા ॥ ૧૮॥

સત્યુવાચ ।
પિતુર્મમ મહાન્ યજ્ઞો ભવતીતિ મયા શ્રુતમ્ ।
તત્રોત્સવો મહાનસ્તિ સમવેતાઃ સુરર્ષયઃ ॥ ૧૯॥

પિતુર્મમ મહાયજ્ઞે કસ્માત્તવ ન રોચતે ।
ગમનં દેવદેવેશ તત્સર્વં કથય પ્રભો ॥ ૨૦॥

સુહૃદામેષ વૈ ધર્મઃ સુહૃદ્ભિઃ સહ સઙ્ગતિઃ ।
કુર્વન્તિ યન્મહાદેવ સુહૃદઃ પ્રીતિવર્ધિનીમ્ ॥ ૨૧॥

તસ્માત્સર્વપ્રયત્નેન મયા ગચ્છ સહ પ્રભો ।
યજ્ઞવાટં પિતુર્મેઽદ્ય સ્વામિન્ પ્રાર્થનયા મમ ॥ ૨૨॥

બ્રહ્મોવાચ ।

તસ્યાસ્તદ્વચનં શ્રુત્વા સત્યા દેવો મહેશ્વરઃ ।
દક્ષવાગિષુહૃદ્વિદ્ધો બભાષે સૂનૃતં વચઃ ॥ ૨૩॥

મહેશ્વર ઉવાચ ।
દક્ષસ્તવ પિતા દેવિ મમ દ્રોહી વિશેષતઃ ॥ ૨૪॥

યસ્ય યે માનિનઃ સર્વે સસુરર્ષિમુખાઃ પરે ।
તે મૂઢા યજનં પ્રાપ્તાઃ પિતુસ્તે જ્ઞાનવર્જિતાઃ ॥ ૨૫॥

અનાહૂતાશ્ચ યે દેવિ ગચ્છન્તિ પરમન્દિરમ્ ।
અવમાનં પ્રાપ્નુવન્તિ મરણાદધિકં તથા ॥ ૨૬॥

પરાલયં ગતોઽપીન્દ્રો લઘુર્ભવતિ તદ્વિધઃ ।
કા કથા ચ પરેષાં વૈ રીઢા યાત્રા હિ તદ્વિધા ॥ ૨૭॥

તસ્માત્ત્વયા મયા ચાપિ દક્ષસ્ય યજનં પ્રતિ ।
ન ગન્તવ્યં વિશેષેણ સત્યમુક્તં મયા પ્રિયે ॥ ૨૮॥

તથારિભિર્ન વ્યથતે હ્યર્દિતોઽપિ શરૈર્જનઃ ।
સ્વાનાં દુરુક્તિભિર્મર્મતાડિતઃ સ યથા મતઃ ॥ ૨૯॥

વિદ્યાદિભિર્ગુણૈઃ ષડ્ભિરસદન્યૈઃ સતાં સ્મૃતૌ ।
હતાયાં ભૂયસાં ધામ ન પશ્યન્તિ ખલાઃ પ્રિયે ॥ ૩૦॥

બ્રહ્મોવાચ ।
એવમુક્તા સતી તેન મહેશેન મહાત્મના ।
ઉવાચ રોષસંયુક્તા શિવં વાક્યવિદાં વરમ્ ॥ ૩૧॥

સત્યુવાચ ।
યજ્ઞઃસ્યાત્સફલો યેન સ ત્વં શમ્ભોઽખિલેશ્વર ।
અનાહૂતોઽસિ તેનાદ્ય પિત્રા મે દુષ્ટકારિણા ॥ ૩૨॥

તત્સર્વં જ્ઞાતુમિચ્છામિ ભવ ભાવં દુરાત્મનઃ ।
સુરર્ષીણાં ચ સર્વેષામાગતાનાં દુરાત્મનામ્ ॥ ૩૩॥

તસ્માચ્ચાદ્યૈવ ગચ્છામિ સ્વપિતુર્યજનં પ્રભો ।
અનુજ્ઞાં દેહિ મે નાથ તત્ર ગન્તું મહેશ્વર ॥ ૩૪॥

બ્રહ્મોવાચ ।
ઇત્યુક્તો ભગવાન્ રુદ્રસ્તયા દેવ્યા શિવઃ સ્વયમ્ ।

વિજ્ઞાતાખિલદૃક્ દ્રષ્ટા સતીં સૂતિકરોઽબ્રવીત્ ॥ ૩૫॥

શિવ ઉવાચ ।
યદ્યેવં તે રુચિર્દેવિ તત્ર ગન્તુમવશ્યકમ્ ।
સુવ્રતે વચનાન્મે ત્વં ગચ્છ શીઘ્રં પિતુર્મખમ્ ॥ ૩૬॥

એતં નન્દિનમારુહ્ય વૃષભં સજ્જમાદરાત્ ।
મહારાજોપચારાણિ કૃત્વા બહુગુણાન્વિતા ॥ ૩૭॥

ભૂષિતં વૃષમારોહેત્યુક્તા રુદ્રેણ સા સતી ।
સુભૂષિતા સતી યુક્તા હ્યગમત્પિતૃમન્દિરમ્ ॥ ૩૮॥

મહારાજોપચારાણિ દત્તાનિ પરમાત્મના ।
સુચ્છત્રચામરાદીનિ સદ્વસ્ત્રાભરણાનિ ચ ॥ ૩૯॥

ગણાઃ ષષ્ટિસહસ્રાણિ રૌદ્રા જગ્મુઃ શિવાજ્ઞયા ।
કુતૂહલયુતાઃ પ્રીતા મહોત્સવસમન્વિતાઃ ॥ ૪૦॥

તદોત્સવો મહાનાસીદ્યજને તત્ર સર્વતઃ ।
સત્યાઃ શિવપ્રિયાયાસ્તુ વામદેવગણૈઃ કૃતઃ ॥ ૪૧॥

કુતૂહલં ગણાશ્ચક્રુઃ શિવયોર્યશ ઉજ્જગુઃ ।
બલાત્તે પુપ્લુવુઃ પ્રીત્યા મહાવીરાઃ શિવપ્રિયાઃ ॥ ૪૨॥

સર્વથાસીન્મહાશોભા ગમને જગદમ્બિકે ।
સુખારાવઃ સમ્બભૂવ પૂરિતં ભુવનત્રયમ્ ॥ ૪૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે સતીયાત્રાવર્ણનં નામાષ્ટવિંશોઽધ્યાયઃ ॥ ૨.૨.૨૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૨૯. એકોનત્રિંશોઽધ્યાયઃ । સતીવાક્યમ્ ।

બ્રહ્મોવાચ ।
દાક્ષાયણી ગતા તત્ર યત્ર યજ્ઞો મહાપ્રભઃ ।

સુરાસુરમુનીન્દ્રાદિકુતૂહલસમન્વિતઃ ॥ ૧॥

સ્વપિતુર્ભવનં તત્ર નાનાશ્ચર્યસમન્વિતમ્ ।
દદર્શ સુપ્રભં ચારુ સુરર્ષિગણસંયુતમ્ ॥ ૨॥

દ્વારિ સ્થિતા તદા દેવી હ્યવરુહ્ય નિજાસનાત્ ।
નન્દિનોઽભ્યન્તરં શીઘ્રમેકૈવાગચ્છદધ્વરમ્ ॥ ૩॥

આગતાં ચ સતીં દૃષ્ટ્વાસિક્ની માતા યશસ્વિની ।
અકરોદાદરં તસ્યા ભગિન્યશ્ચ યથોચિતમ્ ॥ ૪॥

નાકરોદાદરં દક્ષો દૃષ્ટ્વા તામપિ કિઞ્ચન ।
નાન્યોઽપિ તદ્ભયાત્તત્ર શિવમાયાવિમોહિતઃ ॥ ૫॥

અથ સા માતરં દેવી પિતરં ચ સતી મુને ।
અનમદ્વિસ્મિતાત્યન્તં સર્વલોકપરાભવાત્ ॥ ૬॥

ભાગાનપશ્યદ્દેવાનાં હર્યાદીનાં તદધ્વરે ।
ન શમ્ભુભાગમકરોત્ ક્રોધં દુર્વિષહં સતી ॥ ૭॥

તદા દક્ષં દહન્તીવ રુષા પૂર્ણા સતી ભૃશમ્ ।
ક્રૂરદૃષ્ટ્યા વિલોક્યૈવ સર્વાનપ્યપમાનિતા ॥ ૮॥

સત્યુવાચ ।
અનાહૂતસ્ત્વયા કસ્માચ્છમ્ભુઃ પરમશોભનઃ ।
યેન પૂતમિદં વિશ્વં સમગ્રં સચરાચરમ્ ॥ ૯॥

યજ્ઞો યજ્ઞવિદાં શ્રેષ્ઠો યજ્ઞાઙ્ગો યજ્ઞદક્ષિણઃ ।
યજ્ઞકર્તા ચ યઃ શમ્ભુસ્તં વિના ચ કથં મખઃ ॥ ૧૦॥

યસ્ય સ્મરણમાત્રેણ સર્વં પૂતં ભવત્યહો ।
વિના તેન કૃતં સર્વમપવિત્રં ભવિષ્યતિ ॥ ૧૧॥

દ્રવ્યમન્ત્રાદિકં સર્વં હવ્યં કવ્યં ચ યન્મયમ્ ।
શમ્ભુના હિ વિના તેન કથં યજ્ઞઃ પ્રવર્તિતઃ ॥ ૧૨॥

કિં શિવં સુરસામાન્યં મત્વાકાર્ષીરનાદરમ્ ।
ભ્રષ્ટબુદ્ધિર્ભવાનદ્ય જાતોઽસિ જનકાધમ ॥ ૧૩॥

વિષ્ણુબ્રહ્માદયો દેવા યં સંસેવ્ય મહેશ્વરમ્ ।
પ્રાપ્તાઃ સ્વપદવીં સર્વે તં ન જાનાસિ રે હરમ્ ॥ ૧૪॥

એતે કથં સમાયાતા વિષ્ણુબ્રહ્માદયઃ સુરાઃ ।
તવ યજ્ઞે વિના શમ્ભું સ્વપ્રભું મુનયસ્તથા ॥ ૧૫॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા પરમેશાની વિષ્ણ્વાદીન્સકલાન્ પ્રતિ ।
પૃથક્પૃથગવોચત્સા ભર્ત્સયન્તી ભવાત્મિકા ॥ ૧૬॥

સત્યુવાચ ।
હે વિષ્ણો ત્વં મહાદેવં કિં ન જાનાસિ તત્ત્વતઃ ।
સગુણં નિર્ગુણં ચાપિ શ્રુતયો યં વદન્તિ હ ॥ ૧૭॥

યદ્યપિ ત્વાં કરં દત્ત્વા બહુવારં મહેશ્વરઃ ।
અશિક્ષયત્પુરા શાલ્વપ્રમુખાકૃતિભિર્હરે ॥ ૧૮॥

તદપિ જ્ઞાનમાયાતં ન તે ચેતસિ દુર્મતે ।
ભાગાર્થી દક્ષયજ્ઞેઽસ્મિન્ શિવં સ્વસ્વામિનં વિના ॥ ૧૯॥

પુરા પઞ્ચમુખો ભૂત્વા ગર્વિતોઽસિ સદાશિવમ્ ।
કૃતશ્ચતુર્મુખસ્તેન વિસ્મૃતોઽસિ તદદ્ભુતમ્ ॥ ૨૦॥

ઇન્દ્ર ત્વં કિં ન જાનાસિ મહાદેવસ્ય વિક્રમમ્ ।
ભસ્મીકૃતઃ પવિસ્તે હિ હરેણ ક્રૂરકર્મણા ॥ ૨૧॥

હે સુરાઃ કિન્ન જાનીથ મહાદેવસ્ય વિક્રમમ્ ।
અત્રે વસિષ્ઠ મુનયો યુષ્માભિઃ કિં કૃતં ત્વિહ ॥ ૨૨॥

ભિક્ષાટનં ચ કૃતવાન્ પુરા દારુવને વિભુઃ ।
શપ્તો યદ્ભિક્ષુકો રુદ્રો ભવદ્ભિર્મુનિભિસ્તદા ॥ ૨૩॥

શપ્તેનાપિ ચ રુદ્રેણ યત્કૃતં વિસ્મૃતં કથમ્ ।
તલ્લિઙ્ગેનાખિલં દગ્ધં ભુવનં સચરાચરમ્ ॥ ૨૪॥

સર્વે મૂઢાશ્ચ સઞ્જાતા વિષ્ણુબ્રહ્માદયઃ સુરાઃ ।
મુનયોઽન્યે વિના શમ્ભુમાગતા યદિહાધ્વરે ॥ ૨૫॥

સર્વે વેદાશ્ચ સમ્ભૂતા સાઙ્ગાઃ શાસ્ત્રાણિ વાગ્યતઃ ।
યોઽસૌ વેદાન્તગઃ શમ્ભુઃ કૈશ્ચિજ્જ્ઞાતું ન પાર્યતે ॥ ૨૬॥

બ્રહ્મોવાચ ।

ઇત્યનેકવિધા વાણીરગદજ્જગદમ્બિકા ।
કોપાન્વિતા સતી તત્ર હૃદયેન વિદૂયતા ॥ ૨૭॥

વિષ્ણ્વાદયોઽખિલા દેવા મુનયો યે ચ તદ્વચઃ ।
મૌનીભૂતાસ્તદાકર્ણ્ય ભયવ્યાકુલમાનસાઃ ॥ ૨૮॥

અથ દક્ષઃ સમાકર્ણ્ય સ્વપુત્ર્યાસ્તાદૃશં વચઃ ।
વિલોક્ય ક્રૂરદૃષ્ટ્યા તાં સતીં ક્રુદ્ધોઽબ્રવીદ્વચઃ ॥ ૨૯॥

દક્ષ ઉવાચ ।
તવ કિં બહુનોક્તેન કાર્યં નાસ્તીહ સામ્પ્રતમ્ ।
ગચ્છ વા તિષ્ઠ વા ભદ્રે કસ્માત્ત્વં હિ સમાગતા ॥ ૩૦॥

અમઙ્ગલસ્તુ તે ભર્તા શિવોઽસૌ ગમ્યતે બુધૈઃ ।
અકુલીનો વેદબાહ્યો ભૂતપ્રેતપિશાચરાટ્ ॥ ૩૧॥

તસ્માન્નાહ્વાયિતો રુદ્રો યજ્ઞાર્થં સુકુવેષભૃત્ ।
દેવર્ષિસંસદિ મયા જ્ઞાત્વા પુત્રિ વિપશ્ચિતા ॥ ૩૨॥

વિધિના પ્રેરિતેન ત્વં દત્તા મન્દેન પાપિના ।
રુદ્રાયાવિદિતાર્થાય ચોદ્ધતાય દુરાત્મને ॥ ૩૩॥

તસ્માત્કોપં પરિત્યજ્ય સ્વસ્થા ભવ શુચિસ્મિતે ।
યદ્યાગતાસિ યજ્ઞેઽસ્મિન્ દાયં ગૃહ્ણીષ્વ ચાત્મના ॥ ૩૪॥

બ્રહ્મોવાચ ।
દક્ષેણોક્તેતિ સા પુત્રી સતી ત્રૈલોક્યપૂજિતા ।
નિન્દાયુક્તં સ્વપિતરં દૃષ્ટ્વાસીદ્ રુષિતા ભૃશમ્ ॥ ૩૫॥

અચિન્તયત્તદા સેતિ કથં યાસ્યામિ શઙ્કરમ્ ।
શઙ્કરં દ્રષ્ટુકામાહં પૃષ્ટા વક્ષ્યે કિમુત્તરમ્ ॥ ૩૬॥

અથ પ્રોવાચ પિતરં દક્ષં તં દુષ્ટમાનસમ્ ।
નિઃશ્વસન્તી રુષાવિષ્ટા સા સતી ત્રિજગત્પ્રસૂઃ ॥ ૩૭॥

સત્યુવાચ ।
યો નિન્દતિ મહાદેવં નિન્દ્યમાનં શૃણોતિ વા ।
તાવુભૌ નરકં યાતૌ યાવચ્ચન્દ્રદિવાકરૌ ॥ ૩૮॥

તસ્માત્ત્યક્ષ્યામ્યહં દેહં પ્રવેક્ષ્યામિ હુતાશનમ્ ।

કિં જીવિતેન મે તાત શ઼ૃણ્વન્ત્યાનાદરં પ્રભોઃ ॥ ૩૯॥

યદિ શક્તઃ સ્વયં શમ્ભોર્નિન્દકસ્ય વિશેષતઃ ।
છિન્દ્યાત્ પ્રસહ્ય રસનાં તદા શુદ્ધ્યેન્ન સંશયઃ ॥ ૪૦॥

યદ્યશક્તો જનસ્તત્ર નિરયાત્સુપિધાય વૈ ।
કર્ણૌ ધીમાન્ તતઃ શુદ્ધ્યેદ્ વદન્તીદં બુધા વરાઃ ॥ ૪૧॥

બ્રહ્મોવાચ ।
ઇત્થમુક્ત્વા ધર્મનીતિં પશ્ચાત્તાપમવાપ સા ।
અસ્મરચ્છાઙ્કરં વાક્યં દૂયમાનેન ચેતસા ॥ ૪૨॥

તતઃ સઙ્કુદ્ધ્ય સા દક્ષં નિઃશઙ્કું પ્રાહ તાનપિ ।
સર્વાન્વિષ્ણ્વાદિકાન્દેવાન્મુનીનપિ સતી ધ્રુવમ્ ॥ ૪૩॥

સત્યુવાચ ।
તાત ત્વં નિન્દકઃ શમ્ભોઃ પશ્ચાત્તાપં ગમિષ્યસિ ।
ઇહ ભુક્ત્વા મહાદુઃખમન્તે યાસ્યસિ યાતનામ્ ॥ ૪૪॥

યસ્ય લોકેઽપ્રિયો નાસ્તિ પ્રિયશ્ચૈવ પરાત્મનઃ ।
તસ્મિન્નવૈરે શર્વેઽસ્મિન્ ત્વાં વિના કઃ પ્રતીપકઃ ॥ ૪૫॥

મહદ્ભિર્નિન્દા નાશ્ચર્યં સર્વદાસત્સુ સેર્ષ્યકમ્ ।
મહદઙ્ઘ્રિરજોધ્વસ્તતમઃસુ નૈવ શોભના ॥ ૪૬॥

શિવેતિ દ્વ્યક્ષરં યસ્ય નૃણાં નામ ગિરેરિતમ્ ।
સકૃત્પ્રસઙ્ગાત્સકલમઘમાશુ વિહન્તિ તત્ ॥ ૪૭॥

પવિત્રકીર્તિમમલં ભવાન્ દ્વેષ્ટિ શિવેતરઃ ।
અલઙ્ઘ્યશાસનં શમ્ભુમહો સર્વેશ્વરં ખલઃ ॥ ૪૮॥

યત્પાદપદ્મં મહતાં મનોઽલિસુનિષેવિતમ્ ।
સર્વાર્થદં બ્રહ્મરસૈઃ સર્વાર્થિભિરથાદરાત્ ॥ ૪૯॥

યદ્વર્ષત્યર્થિનઃ શીઘ્રં લોકસ્ય શિવ આદરાત્ ।
ભવાન્ દ્રુહ્યતિ મૂર્ખત્વાત્ તસ્મૈ ચાશેષબન્ધવે ॥ ૫૦॥

કિંવા શિવાખ્યમશિવં ત્વદન્યે ન વિદુર્બુધાઃ ।
બ્રહ્માદયસ્તં મુનયઃ સનકાદ્યાસ્તથાપરે ॥ ૫૧॥

અવકીર્ય જટા ભૂતૈઃ શ્મશાને સ કપાલધૃક્ ।

તન્માલ્યભસ્મ વા જ્ઞાત્વા પ્રીત્યાવસદુદારધીઃ ॥ ૫૨॥

યે મૂર્દ્ધભિર્દધતિ તચ્ચરણોત્સૃષ્ટમાદરાત્ ।
નિર્માલ્યં મુનયો દેવાઃ સ શિવઃ પરમેશ્વરઃ ॥ ૫૩॥

પ્રવૃત્તં ચ નિવૃત્તં ચ દ્વિવિધં કર્મ ચોદિતમ્ ।
વેદે વિવિચ્ય વૃત્તં ચ તદ્વિચાર્યં મનીષિભિઃ ॥ ૫૪॥

વિરોધિયૌગપદ્યૈકકર્તૃકે ચ તથા દ્વયમ્ ।
પરબ્રહ્મણિ શમ્ભૌ તુ કર્મર્ચ્છન્તિ ન કિઞ્ચન ॥ ૫૫॥

મા વઃ પદવ્યઃ સ્મ પિતઃ યા અસ્મદાસ્થિતાઃ સદા ।
યજ્ઞશાલાસુ વો ધૂમ્રવર્ત્મભુક્તોજ્ઝિતાઃ પરમ્ ॥ ૫૬॥

નોઽવ્યક્તલિઙ્ગઃ સતતમવધૂતસુસેવિતઃ ।
અભિમાનમતો ન ત્વં કુરુ તાત કુબુદ્ધિધૃક્ ॥ ૫૭॥

કિં બહૂક્તેન વચસા દુષ્ટસ્ત્વં સર્વથા કુધીઃ ।
ત્વદુદ્ભવેન દેહેન ન મે કિઞ્ચિત્પ્રયોજનમ્ । ૫૮॥

તજ્જન્મ ધિગ્યો મહતાં સર્વથાવદ્યકૃત્ખલઃ ।
પરિત્યાજ્યો વિશેષેણ તત્સમ્બન્ધો વિપશ્ચિતા ॥ ૫૯॥

ગોત્રં ત્વદીયં ભગવાન્ યદાહ વૃષભધ્વજઃ ।
દાક્ષાયણીતિ સહસાહં ભવામિ સુદુર્મના ॥ ૬૦॥

તસ્માત્ત્વદઙ્ગજં દેહં કુણપં ગર્હિતં સદા ।
વ્યુત્સૃજ્ય નૂનમધુના ભવિષ્યામિ સુખાવહા ॥ ૬૧॥

હે સુરા મુનયઃ સર્વે યૂયં શૃણુત મદ્વચઃ ।
સર્વથાનુચિતં કર્મ યુષ્માકં દુષ્ટચેતસામ્ ॥ ૬૨॥

સર્વે યૂયં વિમૂઢા હિ શિવનિન્દાઃ કલિપ્રિયાઃ ।
પ્રાપ્સ્યન્તિ દણ્ડં નિયતમખિલં ચ હરાદ્ ધ્રુવમ્ ॥ ૬૩॥

બ્રહ્મોવાચ ।
દક્ષમુક્ત્વાધ્વરે તસ્મિન્ વ્યરમત્સા સતી તદા ।
અનૂધ ચેતસા શમ્ભુમસ્મરત્પ્રાણવલ્લભમ્ ॥ ૬૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે સતીવાક્યવર્ણનં નામૈકોનત્રિંશોઽધ્યાયઃ ॥ ૨.૨.૨૯॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૩૦. ત્રિંશોઽધ્યાયઃ । સતીદેહત્યાગોપદ્રવવર્ણનમ્ ।

નારદ ઉવાચ ।
મૌનીભૂતા યદા સાસીત્સતી શઙ્કરવલ્લભા ।
ચરિત્રં કિમભૂત્તત્ર વિધે તદ્વદ ચાદરાત્ ॥ ૧॥

બ્રહ્મોવાચ ।
મૌનીભૂતા સતી દેવી સ્મૃત્વા સ્વપતિમાદરાત્ ।
ક્ષિતાવુદીચ્યાં સહસા નિષસાદ પ્રશાન્તધીઃ ॥ ૨॥

જલમાચમ્ય વિધિવત્ સંવૃતા વાસસા શુચિઃ ।
દૃઙ્ નિમીલ્ય પતિં સ્મૃત્વા યોગમાર્ગં સમાવિશત્ ॥ ૩॥

કૃત્વા સમાનાવનિલૌ પ્રાણાપાનૌ સિતાનના ।
ઉત્થાપ્યોદાનમથ ચ યત્નાત્સા નાભિચક્રતઃ ॥ ૪॥

હૃદિ સ્થાપ્યોરસિ ધિયા સ્થિતં કણ્ઠાદ્ ભ્રુવોઃ સતી ।
અનિન્દિતાનયન્મધ્યં શઙ્કરપ્રાણવલ્લભા ॥ ૫॥

એવં સ્વદેહં સહસા દક્ષકોપાજ્જિહાસતી ।
દગ્ધે ગાત્રે વાયુશુચિર્ધારિતં યોગમાર્ગતઃ ॥ ૬॥

તતઃ સ્વભર્તુશ્ચરણં ચિન્તયન્તી ન ચાપરમ્ ।
અપશ્યત્સા સતી તત્ર યોગમાર્ગનિવિષ્ટધીઃ ॥ ૭॥

હતકલ્મષતદ્દેહઃ પ્રાપતચ્ચ તદગ્નિના ।
ભસ્મસાદભવત્સદ્યો મુનિશ્રેષ્ઠ તદિચ્છયા ॥ ૮॥

તત્પશ્યતાં ચ ખે ભૂમૌ વાદોઽભૂત્સુમહાંસ્તદા ।
હાહેતિ સોઽદ્ભુતશ્ચિત્રઃ સુરાદીનાં ભયાવહઃ ॥ ૯॥

હન્ત પ્રિયા પરા શમ્ભોર્દેવી દૈવતમસ્ય હિ ।

જહાવસૂન્ સતી કેન સુદુષ્ટેન પ્રકોપિતા ॥ ૧૦॥

અહો ત્વનાત્મ્યં સુમહદસ્ય દક્ષસ્ય પશ્યત ।
ચરાચરં પ્રજા યસ્ય યત્પુત્રસ્ય પ્રજાપતેઃ ॥ ૧૧॥

અહોઽદ્ય વિમનાભૂત્સા સતી દેવી મનસ્વિની ।
વૃષધ્વજપ્રિયાભીક્ષ્ણં માનયોગ્યા સતાં સદા ॥ ૧૨॥

સોઽયં દુર્મર્ષહૃદયો બ્રહ્મધ્રુક્ સ પ્રજાપતિઃ ।
મહતીમપકીર્તિં હિ પ્રાપ્સ્યતિ ત્વખિલે ભવે ॥ ૧૩॥

યત્સ્વાઙ્ગજાં સુતાં શમ્ભુદ્વિટ્ ન્યષેધત્સમુદ્યતામ્ ।
મહાનરકભોગી સ મૃતયે નોઽપરાધતઃ ॥ ૧૪॥

વદત્યેવં જને સત્યા દૃષ્ટ્વાસુત્યાગમદ્ભુતમ્ ।
દ્રુતં તત્પાર્ષદાઃ ક્રોધાદુદતિષ્ઠન્નુદાયુધાઃ ॥ ૧૫॥

દ્વારિ સ્થિતા ગણાઃ સર્વે રસાયુતમિતા રુષા ।
શઙ્કરસ્ય પ્રભાવાત્તેઽક્રુધ્યન્નતિમહાબલાઃ ॥ ૧૬॥

હાહાકારમકુર્વંસ્તે ધિગ્ ધિગ્ નો નેતિ વાદિનઃ ।
ઉચ્ચૈઃ સર્વેઽસકૃદ્વીરાઃ શઙ્કરસ્ય ગણાધિપાઃ ॥ ૧૭॥

હાહાકારેણ મહતા વ્યાપ્તમાસીદ્દિગન્તરમ્ ।
સર્વે પ્રાપન્ ભયં દેવા મુનયોઽન્યેઽપિ તે સ્થિતાઃ ॥ ૧૮॥

ગણાઃ સમ્મન્ત્ર્ય તે સર્વેઽભૂવન્ ક્રુદ્ધા ઉદાયુધાઃ ।
કુર્વન્તઃ પ્રલયં વાદ્યૈઃ શસ્ત્રૈર્વ્યાપ્તં દિગન્તરમ્ ॥ ૧૯॥

શસ્ત્રૈરઘ્નન્નિજાઙ્ગાનિ કેચિત્તત્ર શુચાકુલાઃ ।
શિરોમુખાનિ દેવર્ષે સુતીક્ષ્ણૈઃ પ્રાણનાશિભિઃ ॥ ૨૦॥

ઇત્થં તે વિલયં પ્રાપ્તા દાક્ષાયણ્યાઃ સમં તદા ।
ગણાયુતે દ્વે ચ તદા તદદ્ભુતમિવાભવત્ ॥ ૨૧॥

ગણા નાશાવશિષ્ટા યે શઙ્કરસ્ય મહાત્મનઃ ।
દક્ષં તં ક્રોધિતં હન્તુમુદતિષ્ઠન્નુદાયુધાઃ ॥ ૨૨॥

તેષામાપતતાં વેગં નિશમ્ય ભગવાન્ ભૃગુઃ ।
યજ્ઞઘ્નઘ્નેન યજુષા દક્ષિણાગ્નૌ જુહોન્મુને ॥ ૨૩॥

હૂયમાને ચ ભૃગુણા સમુત્પેતુર્મહાસુરાઃ ।
ऋભવો નામ પ્રબલા વીરાસ્તત્ર સહસ્રશઃ ॥ ૨૪॥

તૈરલાતાયુધૈસ્તત્ર પ્રમથાનાં મુનીશ્વર ।
અભૂદ્યુદ્ધં સુવિકટં શ‍ૃણ્વતાં રોમહર્ષણમ્ ॥ ૨૫॥

ऋભુભિસ્તૈર્મહાવીરૈર્હન્યમાનાઃ સમન્તતઃ ।
અયત્નયાનાઃ પ્રમથા ઉશદ્ભિર્બ્રહ્મતેજસા ॥ ૨૬॥

એવં શિવગણાસ્તે વૈ હતા વિદ્રાવિતા દ્રુતમ્ ।
શિવેચ્છયા મહાશક્ત્યા તદદ્ભુતમિવાભવત્ ॥ ૨૭॥

તદ્ દૃષ્ટ્વા ऋષયો દેવાઃ શક્રાદ્યાઃ સમરુદ્ગણાઃ ।
વિશ્વેઽશ્વિનૌ લોકપાલાસ્તૂષ્ણીં ભૂતાસ્તદાભવન્ ॥ ૨૮॥

કેચિદ્વિષ્ણું પ્રભું તત્ર પ્રાર્થયન્તઃ સમન્તતઃ ।
ઉદ્વિગ્ના મન્ત્રયન્તશ્ચ વિઘ્નાભાવં મુહુર્મુહુઃ ॥ ૨૯॥

સુવિચાર્યોદર્કફલં મહોદ્વિગ્નાઃ સુબુદ્ધયઃ ।
સુરવિષ્ણ્વાદયોઽભૂવંસ્તન્નાશાદ્રાવણાન્મુહુઃ ॥ ૩૦॥

એવમ્ભૂતસ્તદા યજ્ઞો વિઘ્નો જાતો દુરાત્મનઃ ।
બ્રહ્મબન્ધોશ્ચ દક્ષસ્ય શઙ્કરદ્રોહિણો મુને ॥ ૩૧॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે સત્યુપાખ્યાને સતીદેહત્યાગોપદ્રવવર્ણનં નામ ત્રિંશોઽધ્યાયઃ ॥ ૨.૨.૩૦॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૩૧. એકત્રિંશોઽધ્યાયઃ । આકાશવાણી ।

બ્રહ્મોવાચ ।
એતસ્મિન્નન્તરે તત્ર નભોવાણી મુનીશ્વર ।
અવોચચ્છૃણ્વતાં દક્ષસુરાદીનાં યથાર્થતઃ ॥ ૧॥

વ્યોમવાણ્યુવાચ ।

રે રે દક્ષ દુરાચાર દમ્ભાચારપરાયણ ।
કિં કૃતં તે મહામૂઢ કર્મ ચાનર્થકારકમ્ ॥ ૨॥

ન કૃતં શૈવરાજસ્ય દધીચેર્વચનસ્ય હિ ।
પ્રમાણં તત્કૃતે મૂઢ સર્વાનન્દકરં શુભમ્ ॥ ૩॥

નિર્ગતસ્તે મખાદ્વિપ્રઃ શાપં દત્ત્વા સુદુઃસહમ્ ।
તતોઽપિ બુદ્ધં કિઞ્ચિન્નો ત્વયા મૂઢેન ચેતસિ ॥ ૪॥

તતઃ કૃતઃ કથં નો વૈ સ્વપુત્ર્યાસ્ત્વાદરઃ પરઃ ।
સમાગતાયાઃ સત્યાશ્ચ મઙ્ગલાયા ગૃહં સ્વતઃ ॥ ૫॥

સતીભવૌ નાર્ચિતૌ હિ કિમિદં જ્ઞાનદુર્બલ ।
બ્રહ્મપુત્ર ઇતિ વૃથા ગર્વિતોઽસિ વિમોહિતઃ ॥ ૬॥

સા સત્યેવ સદારાધ્યા સર્વપુણ્યફલપ્રદા ।
ત્રિલોકમાતા કલ્યાણી શઙ્કરાર્ધાઙ્ગભાગિની ॥ ૭॥

સા સત્યેવાર્ચિતા નિત્યં સર્વસૌભાગ્યદાયિની ।
માહેશ્વરી સ્વભક્તાનાં સર્વમઙ્ગલદાયિની ॥ ૮॥

સા સત્યેવાર્ચિતા નિત્યં સંસારભયનાશિની ।
મનોઽભીષ્ટપ્રદા દેવી સર્વોપદ્રવહારિણી ॥ ૯॥

સા સત્યેવાર્ચિતા નિત્યં કીર્તિસમ્પત્પ્રદાયિની ।
પરમા પરમેશાની ભુક્તિમુક્તિપ્રદાયિની ॥ ૧૦॥

સા સત્યેવ જગદ્ધાત્રી જગદ્રક્ષણકારિણી ।
અનાદિશક્તિઃ કલ્પાન્તે જગત્સંહારકારિણી ॥ ૧૧॥

સા સત્યેવ જગન્માતા વિષ્ણુમાતા વિલાસિની ।
બ્રહ્મેન્દ્રચન્દ્રવહ્ન્યર્કદેવાદિજનની સ્મૃતા ॥ ૧૨॥

સા સત્યેવ તપોધર્મદાનાદિફલદાયિની ।
શમ્ભુશક્તિર્મહાદેવી દુષ્ટહન્ત્રી પરાત્પરા ॥ ૧૩॥

ઈદૃગ્વિધા સતી દેવી યસ્ય પત્ની સદા પ્રિયા ।
તસ્યૈ ભાગો ન દત્તસ્તે મૂઢેન કુવિચારિણા ॥ ૧૪॥

શમ્ભુર્હિ પરમેશાનઃ સર્વસ્વામી પરાત્પરઃ ।
વિષ્ણુબ્રહ્માદિસંસેવ્યઃ સર્વકલ્યાણકારકઃ ॥ ૧૫॥

તપ્યતે હિ તપઃ સિદ્ધૈરેતદ્દર્શનકાઙ્ક્ષિભિઃ ।
યુજ્યતે યોગિભિર્યોગૈરેતદ્દર્શનકાઙ્ક્ષિભિઃ ॥ ૧૬॥

અનન્તધનધાન્યાનાં યાગાદીનાં તથૈવ ચ ।
દર્શનં શઙ્કરસ્યૈવ મહત્ફલમુદાહૃતમ્ ॥ ૧૭॥

શિવ એવ જગદ્ધાતા સર્વવિદ્યાપતિઃ પ્રભુઃ ।
આદિવિદ્યાવરસ્વામી સર્વમઙ્ગલમઙ્ગલઃ ॥ ૧૮॥

તચ્છક્તેર્ન કૃતો યસ્માત્સત્કરોઽદ્ય ત્વયા ખલ ।
અત એવાધ્વરસ્યાસ્ય વિનાશો હિ ભવિષ્યતિ ॥ ૧૯॥

અમઙ્ગલં ભવત્યેવ પૂજાર્હાણામપૂજયા ।
પૂજ્યમાના ચ નાસૌ હિ યતઃ પૂજ્યતમા શિવા ॥ ૨૦॥

સહસ્રેણાપિ શિરસાં શેષો યત્પાદજં રજઃ ।
વહત્યહરહઃ પ્રીત્યા તસ્ય શક્તિઃ શિવા સતી ॥ ૨૧॥

યત્પાદપદ્મમનિશં ધ્યાત્વા સમ્પૂજ્ય સાદરમ્ ।
વિષ્ણુર્વિષ્ણુત્વમાપન્નસ્તસ્ય શમ્ભોઃ પ્રિયા સતી ॥ ૨૨॥

યત્પાદપદ્મમનિશં ધ્યાત્વા સમ્પૂજ્ય સાદરમ્ ।
બ્રહ્મા બ્રહ્મત્વમાપન્નસ્તસ્ય શમ્ભોઃ પ્રિયા સતી ॥ ૨૩॥

યત્પાદપદ્મમનિશં ધ્યાત્વા સમ્પૂજ્ય સાદરમ્ ।
ઇન્દ્રાદયો લોકપાલાઃ પ્રાપુઃ સ્વં સ્વં પરં પદમ્ ॥ ૨૪॥

જગત્પિતા શિવઃ શક્તિર્જગન્માતા ચ સા સતી ।
સત્કૃતૌ ન ત્વયા મૂઢ કથં શ્રેયો ભવિષ્યતિ ॥ ૨૫॥

દૌર્ભાગ્યં ત્વયિ સઙ્ક્રાન્તં સઙ્ક્રાન્તાસ્ત્વયિ ચાપદઃ ।
યૌ ચાનારાધિતૌ ભક્ત્યા ભવાનીશઙ્કરૌ ચ તૌ ॥ ૨૬॥

અનભ્યર્ચ્ય શિવં શમ્ભું કલ્યાણં પ્રાપ્નુયામિતિ ।
કિમસ્તિ ગર્વો દુર્વારઃ સ ગર્વોઽદ્ય વિનશ્યતિ ॥ ૨૭॥

સર્વેશવિમુખો ભૂત્વા દેવેષ્વેતેષુ કસ્તવ ।
કરિષ્યતિ સહાયં તં ન તે પશ્યામિ સર્વથા ॥ ૨૮॥

યદિ દેવાઃ કરિષ્યન્તિ સાહાય્યમધુના તવ ।

તદા નાશં સમાપ્સ્યન્તિ શલભા ઇવ વહ્નિના ॥ ૨૯॥

જ્વલત્વદ્ય મુખં તે વૈ યજ્ઞધ્વંસો ભવત્વિતિ ।
સહાયાસ્તવ યાવન્તસ્તે જ્વલન્ત્વદ્ય સત્વરમ્ ॥ ૩૦॥

અમરાણાં ચ સર્વેષાં શપથોઽમઙ્ગલાય તે ।
કરિષ્યન્ત્યદ્ય સાહાય્યં યદેતસ્ય દુરાત્મનઃ ॥ ૩૧॥

નિર્ગચ્છન્ત્વમરાઃ સ્વોકમેતદધ્વરમણ્ડપાત્ ।
અન્યથા ભવતો નાશો ભવિષ્યત્યદ્ય સર્વથા ॥ ૩૨॥

નિર્ગચ્છન્ત્વપરે સર્વે મુનિનાગાદયો મખાત્ ।
અન્યથા ભવતાં નાશો ભવિષ્યત્યદ્ય સર્વથા ॥ ૩૩॥

નિર્ગચ્છ ત્વં હરે શીઘ્રમેતદધ્વરમણ્ડપાત્ ।
અન્યથા ભવતો નાશો ભવિષ્યત્યદ્ય સર્વથા ॥ ૩૪॥

નિર્ગચ્છ ત્વં વિધે શીઘ્રમેતદધ્વરમણ્ડપાત્ ।
અન્યથા ભવતો નાશો ભવિષ્યત્યદ્ય સર્વથા ॥ ૩૫॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વાધ્વરશાલાયામખિલાયાં સુસંસ્થિતાન્ ॥

વ્યરમત્સા નભોવાણી સર્વકલ્યાણકારિણી ॥ ૩૬॥

તચ્છ્રુત્વા વ્યોમવચનં સર્વે હર્યાદયઃ સુરાઃ ।
અકાર્ષુર્વિસ્મયં તાત મુનયશ્ચ તથાપરે ॥ ૩૭॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે સત્યુપાખ્યાને નભોવાણીવર્ણનં નામૈકત્રિંશોઽધ્યાયઃ ॥ ૨.૨.૩૧॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૩૨. દ્વાત્રિંશોઽધ્યાયઃ । વીરભદ્રોત્પત્તિઃ શિવોપદેશશ્ચ ।

નારદ ઉવાચ ।
શ્રુત્વા વ્યોમગિરં દક્ષઃ કિમકાર્ષીત્તદાબુધઃ ।

અન્યે ચ કૃતવન્તઃ કિં તતશ્ચ કિમભૂદ્ વદ ॥ ૧॥

પરાજિતાઃ શિવગણા ભૃગુમન્ત્રબલેન વૈ ।
કિમકાર્ષુઃ કુત્ર ગતાસ્તત્ત્વં વદ મહામતે ॥ ૨॥

બ્રહ્મોવાચ ।
શ્રુત્વા વ્યોમગિરં સર્વે વિસ્મિતાશ્ચ સુરાદયઃ ।
નાવોચત્કિઞ્ચિદપિ તે તિષ્ઠન્તસ્તુ વિમોહિતાઃ ॥ ૩॥

પલાયમાના યે વીરા ભૃગુમન્ત્રબલેન તે ।
અવશિષ્ટાઃ શિવગણાઃ શિવં શરણમાયયુઃ ॥ ૪॥

સર્વં નિવેદયામાસૂ રુદ્રાયામિતતેજસે ।
ચરિત્રં ચ તથાભૂતં સુપ્રણમ્યાદરાચ્ચ તે ॥ ૫॥

ગણા ઊચુઃ ।
દેવદેવ મહાદેવ પાહિ નઃ શરણાગતાન્ ।
સંશ◌ૃણ્વાદરતો નાથ સતીવાર્તાં ચ વિસ્તરાત્ ॥ ૬॥

ગર્વિતેન મહેશાન દક્ષેણ સુદુરાત્મના ।
અપમાનઃ કૃતઃ સત્યાનાદરો નિર્જરૈસ્તથા ॥ ૭॥

તુભ્યં ભાગમદાન્નો સ દેવેભ્યશ્ચ પ્રદત્તવાન્ ।
દુર્વચાંસ્યવદત્પ્રોચ્ચૈર્દુષ્ટો દક્ષઃ સુગર્વિતઃ ॥ ૮॥

તતો દૃષ્ટ્વા ન તે ભાગં યજ્ઞેઽકુપ્યત્સતી પ્રભો ।
વિનિન્દ્ય બહુશસ્તાતમધાક્ષીત્સ્વતનું તદા ॥ ૯॥

ગણાસ્ત્વયુતસઙ્ખ્યાકા મૃતાસ્તત્ર વિલજ્જયા ।
સ્વાઙ્ગાન્યાચ્છિદ્ય શસ્ત્રૈશ્ચ ક્રુધ્યામ હ્યપરે વયમ્ ॥ ૧૦॥

તદ્યજ્ઞં ધ્વંસિતું વેગાત્સન્નદ્ધાસ્તુ ભયાવહાઃ ।
તિરસ્કૃતા હિ ભૃગુણા સ્વપ્રભાવાદ્વિરોધિના ॥ ૧૧॥

તે વયં શરણં પ્રાપ્તાસ્તવ વિશ્વમ્ભર પ્રભો ।
નિર્ભયાન્ કુરુ નસ્તસ્માદ્ દયમાન ભવાદ્ભયાત્ ॥ ૧૨॥

અપમાનં વિશેષેણ તસ્મિન્ યજ્ઞે મહાપ્રભો ।
દક્ષાદ્યાસ્તેઽખિલા દુષ્ટા અકુર્વન્ ગર્વિતા અતિ ॥ ૧૩॥

ઇત્યુક્તં નિખિલં વૃત્તં સ્વેષાં સત્યાશ્ચ શઙ્કર ।

તેષાં ચ મૂઢબુદ્ધીનાં યથેચ્છસિ તથા કુરુ ॥ ૧૪॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય સ્વગણાનાં વચઃ પ્રભુઃ ।
સસ્માર નારદં સર્વં જ્ઞાતું તચ્ચરિતં લઘુ ॥ ૧૫॥

આગતસ્ત્વં દ્રુતં તત્ર દેવર્ષે દિવ્યદર્શનઃ ।
પ્રણમ્ય શઙ્કરં ભક્ત્યા સાઞ્જલિસ્તત્ર તસ્થિવાન્ ॥ ૧૬॥

ત્વાં પ્રશસ્યાથ સ સ્વામી સત્યા વાર્તાં ચ પૃષ્ટવાન્ ।
દક્ષયજ્ઞાગતાયા વૈ પરં ચ ચરિતં તથા ॥ ૧૭॥

પૃષ્ટેન શમ્ભુના તાત ત્વયાશ્વેવ શિવાત્મના ।
તત્સર્વં કથિતં વૃત્તં જાતં દક્ષાધ્વરે હિ યત્ ॥ ૧૮॥

તદાકર્ણ્યેશ્વરો વાક્યં મુને તત્ ત્વન્મુખોદિતમ્ ।
ચુકોપાતિદ્રુતં રુદ્રો મહારૌદ્રપરાક્રમઃ ॥ ૧૯॥

ઉત્પાટ્યૈકાં જટાં રુદ્રો લોકસંહારકારકઃ ।
આસ્ફાલયામાસ રુષા પર્વતસ્ય તદોપરિ ॥ ૨૦॥

તોદનાચ્ચ દ્વિધા ભૂતા સા જટા ચ મુને પ્રભોઃ ।
સમ્બભૂવ મહારાવો મહાપ્રલયભીષણઃ ॥ ૨૧॥

તજ્જટાયાઃ સમુદ્ભૂતો વીરભદ્રો મહાબલઃ ।
પૂર્વભાગેન દેવર્ષે મહાભીમો ગણાગ્રણીઃ ॥ ૨૨॥

સ ભૂમિં વિશ્વતો વૃત્ય ચાત્યતિષ્ઠદ્દશાઙ્ગુલમ્ ।
પ્રલયાનલસઙ્કાશઃ પ્રોન્નતો દોઃસહસ્રવાન્ ॥ ૨૩॥

કોપનિઃશ્વાસતસ્તત્ર મહારુદ્રસ્ય ચેશિતુઃ ।
જાતં જ્વરાણાં શતકં સન્નિપાતાસ્ત્રયોદશ ॥ ૨૪॥

મહાકાલી સમુત્પન્ના તજ્જટાપરભાગતઃ ।
મહાભયઙ્કરા તાત ભૂતકોટિભિરાવૃતા ॥ ૨૫॥

સર્વે મૂર્તિધરાઃ ક્રૂરાઃ જ્વરા લોકભયઙ્કરાઃ ।
સ્વતેજસા પ્રજ્વલન્તો દહન્ત ઇવ સર્વતઃ ॥ ૨૬॥

અથ વીરો વીરભદ્રઃ પ્રણમ્ય પરમેશ્વરમ્ ।
કૃતાઞ્જલિપુટઃ પ્રાહ વાક્યં વાક્યવિશારદઃ ॥ ૨૭॥

વીરભદ્ર ઉવાચ ।
મહારુદ્ર મહારૌદ્ર સોમસૂર્યાગ્નિલોચન ।
કિં કર્તવ્યં મયા કાર્યં શીઘ્રમાજ્ઞાપય પ્રભો ॥ ૨૮॥

શોષણીયાઃ કિમીશાન ક્ષણાર્ધેનૈવ સિન્ધવઃ ।
પેષણીયાઃ કિમીશાન ક્ષણાર્ધેનૈવ પર્વતાઃ ॥ ૨૯॥

ક્ષણેન ભસ્મસાત્કુર્યાં બ્રહ્માણ્ડમુત કિં હર ।
ક્ષણેન ભસ્મસાત્કુર્યાં સુરાન્વા કિં મુનીશ્વરાન્ ॥ ૩૦॥

વ્યાશ્વાસઃ સર્વલોકાનાં કિમુ કાર્યો હિ શઙ્કર ।
કર્તવ્યં કિમુતેશાન સર્વપ્રાણિવિહિંસનમ્ ॥ ૩૧॥

મમાશક્યં ન કુત્રાપિ ત્વત્પ્રસાદાન્મહેશ્વર ।
પરાક્રમેણ મત્તુલ્યો ન ભૂતો ન ભવિષ્યતિ ॥ ૩૨॥

યત્ર યત્કાર્યમુદ્દિશ્ય પ્રેષયિષ્યસિ માં પ્રભો ।
તત્કાર્યં સાધયામ્યેવ સત્વરં ત્વત્પ્રસાદતઃ ॥ ૩૩॥

ક્ષુદ્રાસ્તરન્તિ લોકાબ્ધિં શાસનાચ્છઙ્કરસ્ય તે ।
હરાતોઽહં ન કિં તર્તું મહાપત્સાગરં ક્ષમઃ ॥ ૩૪॥

ત્વત્પ્રેષિતતૃણેનાપિ મહત્કાર્યમયત્નતઃ ।
ક્ષણેન શક્યતે કર્તું શઙ્કરાત્ર ન સંશયઃ ॥ ૩૫॥

લીલામાત્રેણ તે શમ્ભો કાર્યં યદ્યપિ સિધ્યતિ ।
તથાપ્યહં પ્રેષણીયો તવૈવાનુગ્રહો હ્યયમ્ ॥ ૩૬॥

શક્તિરેતાદૃશી શમ્ભો મમાપિ ત્વદનુગ્રહાત્ ।
વિના શક્તિર્ન કસ્યાપિ શઙ્કર ત્વદનુગ્રહાત્ ॥ ૩૭॥

ત્વદાજ્ઞયા વિના કોઽપિ તૃણાદીનપિ વસ્તુતઃ ।
નૈવ ચાલયિતું શક્તઃ સત્યમેતન્ન સંશયઃ ॥ ૩૮॥

શમ્ભો નિયમ્યાઃ સર્વેઽપિ દેવાદ્યાસ્તે મહેશ્વર ।
તથૈવાહં નિયમ્યસ્તે નિયન્તુઃ સર્વદેહિનામ્ ॥ ૩૯॥

પ્રણતોઽસ્મિ મહાદેવ ભૂયોઽપિ પ્રણતોઽસ્મ્યહમ્ ।
પ્રેષય સ્વેષ્ટસિદ્ધ્યર્થં મામદ્ય હર સત્વરમ્ ॥ ૪૦॥

સ્પન્દોઽપિ જાયતે શમ્ભોઽસવ્યાઙ્ગાનાં મુહુર્મુહુઃ ।
ભવિષ્યત્યદ્ય વિજયો મામતઃ પ્રેષય પ્રભો ॥ ૪૧॥

હર્ષોત્સાહવિશેષોઽપિ જાયતે મમ કશ્ચન ।
શમ્ભો ત્વત્પાદકમલે સંસક્તશ્ચ મનો મમ ॥ ૪૨॥

ભવિષ્યતિ પ્રતિપદં શુભસન્તાનસન્તતિઃ ॥ ૪૩॥

તસ્યૈવ વિજયો નિત્યં તસ્યૈવ શુભમન્વહમ્ ।
યસ્ય શમ્ભૌ દૃઢા ભક્તિસ્ત્વયિ શોભનસંશ્રયે ॥ ૪૪॥

બ્રહ્મોવાચ ।
ઇત્યુક્તં તદ્વચઃ શ્રુત્વા સન્તુષ્ટો મઙ્ગલાપતિઃ ।
વીરભદ્ર જયેતિ ત્વં પ્રોક્તાશીઃ પ્રાહ તં પુનઃ ॥ ૪૫॥

મહેશ્વર ઉવાચ ।
શૃણુ મદ્વચનં તાત વીરભદ્ર સુચેતસા ।
કરણીયં પ્રયત્નેન તદ્ દ્રુતં મે પ્રતોષકમ્ ॥ ૪૬॥

યાગં કર્તું સમુદ્યુક્તો દક્ષો વિધિસુતઃ ખલઃ ।
મદ્વિરોધી વિશેષેણ મહાગર્વોઽબુધોઽધુના ॥ ૪૭॥

તન્મખં ભસ્મસાત્કૃત્વા સયાગપરિવારકમ્ ।
પુનરાયાહિ મત્સ્થાનં સત્વરં ગણસત્તમ ॥ ૪૮॥

સુરા ભવન્તુ ગન્ધર્વા યક્ષા વાન્યે ચ કેચન ।
તાનપ્યદ્યૈવ સહસા ભસ્મસાત્કુરુ સત્વરમ્ ॥ ૪૯॥

તત્રાસ્તુ વિષ્ણુર્બ્રહ્મા વા શચીશો વા યમોઽપિ વા ।
અપિ ચાદ્યૈવ તાન્સર્વાન્પાતયસ્વ પ્રયત્નતઃ ॥ ૫૦॥

સુરા ભવન્તુ ગન્ધર્વા યક્ષા વાન્યે ચ કેચન ।
તાનપ્યદ્યૈવ સહસા ભસ્મસાત્કુરુ સત્વરમ્ ॥ ૫૧॥

દધીચિકૃતમુલ્લઙ્ઘ્ય શપથં મયિ તત્ર યે ।
તિષ્ઠન્તિ તે પ્રયત્નેન જ્વાલનીયાસ્ત્વયા ધ્રુવમ્ ॥ ૫૨॥

પ્રમથાશ્ચાગમિષ્યન્તિ યદિ વિષ્ણ્વાદયો ભ્રમાત્ ।
નાનાકર્ષણમન્ત્રેણ જ્વાલયાનીય સત્વરમ્ ॥ ૫૩॥

યે તત્રોલ્લઙ્ઘ્ય શપથં મદીયં ગર્વિતાઃ સ્થિતાઃ ।

તે હિ મદ્દ્રોહિણોઽતસ્તાન્ જ્વાલયાનલમાલયા ॥ ૫૪॥

સપત્નીકાન્સસારાંશ્ચ દક્ષયાગસ્થલસ્થિતાન્ ।
પ્રજ્વાલ્ય ભસ્મસાત્કૃત્વા પુનરાયાહિ સત્વરમ્ ॥ ૫૫॥

તત્ર ત્વયિ ગતે દેવા વિશ્વાદ્યા અપિ સાદરમ્ ।
સ્તોષ્યન્તિ ત્વાં તદાપ્યાશુ જ્વાલયા જ્વાલયૈવ તાન્ ॥ ૫૬॥

દેવાનપિ કૃતદ્રોહાન્ જ્વાલામાલાસમાકુલૈઃ ।
જ્વાલય જ્વલનૈઃ શીઘ્રં માધ્યાયાધ્યાયપાલકમ્ ॥ ૫૭॥

દક્ષાદીન્સકલાંસ્તત્ર સપત્નીકાન્સબાન્ધવાન્ ।
પ્રજ્વાલ્ય વીર દક્ષં નુ સલીલં સલિલં પિબ ॥ ૫૮॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા રોષતામ્રાક્ષો વેદમર્યાદપાલકઃ ।
વિરરામ મહાવીરં કાલારિઃ સકલેશ્વરઃ ॥ ૫૯॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે વીરભદ્રોત્પત્તિશિવોપદેશવર્ણનં નામ દ્વાત્રિંશોઽધ્યાયઃ ॥ ૨.૨.૩૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૩૩. ત્રયસ્ત્રિંશોઽધ્યાયઃ । વીરભદ્રયાત્રા ।

બ્રહ્મોવાચ ।
ઇત્યુક્તં શ્રીમહેશસ્ય શ્રુત્વા વચનમાદરાત્ ।
વીરભદ્રોઽતિસન્તુષ્ટઃ પ્રણનામ મહેશ્વરમ્ ॥ ૧॥

શાસનં શિરસા ધૃત્વા દેવદેવસ્ય શૂલિનઃ ।
પ્રચચાલ તતઃ શીઘ્રં વીરભદ્રો મખં પ્રતિ । ૨॥

શિવોઽથ પ્રેષયામાસ શોભાર્થં કોટિશો ગણાન્ ।
તેન સાર્ધં મહાવીરાન્પ્રલયાનલસન્નિભાન્ ॥ ૩॥

અથ તે વીરભદ્રસ્ય પુરતઃ પ્રબલા ગણાઃ ।

પશ્ચાદપિ યયુર્વીરાઃ કુતૂહલકરા ગણાઃ ॥ ૪॥

વીરભદ્રસમેતા યે ગણાઃ શતસહસ્રશઃ ।
પાર્ષદાઃ કાલકાલસ્ય સર્વે રુદ્રસ્વરૂપિણઃ ॥ ૫॥

ગણૈઃ સમેતઃ કિલ તૈર્મહાત્મા
સ વીરભદ્રો હરવેષભૂષણઃ ।
સહસ્રબાહુર્ભુજગાધિપાઢ્યો
યયૌ રથસ્થઃ પ્રબલોઽતિભીકરઃ ॥ ૬॥

નલ્વાનં ચ સહસ્રે દ્વે પ્રમાણં સ્યન્દનસ્ય હિ ।
અયુતેનૈવ સિંહાનાં વાહનાનાં પ્રયત્નતઃ ॥ ૭॥

તથૈવ પ્રબલાઃ સિંહા બહવઃ પાર્શ્વરક્ષકાઃ ।
શાર્દૂલા મકરા મત્સ્યા ગજાસ્તત્ર સહસ્રશઃ ॥ ૮॥

વીરભદ્રે પ્રચલિતે દક્ષનાશાય સત્વરમ્ ।
કલ્પવૃક્ષસમુત્સૃષ્ટા પુષ્પવૃષ્ટિરભૂત્તદા ॥ ૯॥

તુષ્ટુવુશ્ચ ગણા વીરં શિપિવિષ્ટે પ્રચેષ્ટિતમ્ ।
ચક્રુઃ કુતૂહલં સર્વે તસ્મિંશ્ચ ગમનોત્સવે ॥ ૧૦॥

કાલી કાત્યાયનીશાની ચામુણ્ડા મુણ્ડમર્દિની ।
ભદ્રકાલી તથા ભદ્રા ત્વરિતા વૈષ્ણવી તથા ॥ ૧૧॥

એતાભિર્નવદુર્ગાભિર્મહાકાલી સમન્વિતા ।
યયૌ દક્ષવિનાશાય સર્વભૂતગણૈઃ સહ । ૧૨॥

ડાકિની શાકિની ચૈવ ભૂતપ્રમથગુહ્યકાઃ ।
કૂષ્માણ્ડાઃ પર્પટાશ્ચૈવ ચટકા બ્રહ્મરાક્ષસાઃ ॥ ૧૩॥

ભૈરવાઃ ક્ષેત્રપાલાશ્ચ દક્ષયજ્ઞવિનાશકાઃ ।
નિર્યયુસ્ત્વરિતં વીરાઃ શિવાજ્ઞાપ્રતિપાલકાઃ ॥ ૧૪॥

તથૈવ યોગિનીચક્રં ચતુઃષષ્ટિગણાન્વિતમ્ ।
નિર્યયૌ સહસા ક્રુદ્ધં દક્ષયજ્ઞં વિનાશિતુમ્ ॥ ૧૫॥

તેષાં ગણાનાં સર્વેષાં સઙ્ખ્યાનં શ‍ૃણુ નારદ ।
મહાબલવતાં સઙ્ઘો મુખ્યાનાં ધૈર્યશાલિનામ્ ॥ ૧૬॥

અભ્યયાચ્છઙ્કુકર્ણશ્ચ દશકોટ્યા ગણેશ્વરઃ ।

દશભિઃ કેકરાક્ષશ્ચ વિકૃતોઽષ્ટાભિરેવ ચ ॥ ૧૭॥

ચતુઃષષ્ટ્યા વિશાખશ્ચ નવભિઃ પારિયાત્રિકઃ ।
ષડ્ભિઃ સર્વાઙ્કુકો વીરસ્તથૈવ વિકૃતાનનઃ ॥ ૧૮॥

જ્વાલકેશો દ્વાદશભિઃ કોટિભિર્ગણપુઙ્ગવઃ ।
સપ્તભિઃ સમદજ્જીમાન્ દુદ્રભોઽષ્ટાભિરેવ ચ ॥ ૧૯॥

પઞ્ચભિશ્ચ કપાલીશઃ ષડ્ભિઃ સન્દારકો ગણઃ ।
કોટિકોટિભિરેવેહ કોટિકુણ્ડસ્તથૈવ ચ ॥ ૨૦॥

વિષ્ટમ્ભોઽષ્ટાષ્ટભિર્વીરૈઃ કોટિભિર્ગણસત્તમઃ ।
સહસ્રકોટિભિસ્તાત સન્નાદઃ પિપ્પલસ્તથા ॥ ૨૧॥

આવેશનસ્તથાષ્ટાભિરષ્ટાભિશ્ચન્દ્રતાપનઃ ।
મહાવેશઃ સહસ્રેણ કોટિના ગણપો વૃતઃ ॥ ૨૨॥

કુણ્ડી દ્વાદશકોટીભિસ્તથા પર્વતકો મુને ।
વિનાશિતું દક્ષયજ્ઞં નિર્યયૌ ગણસત્તમઃ ॥ ૨૩॥

કાલશ્ચ કાલકશ્ચૈવ મહાકાલસ્તથૈવ ચ ।
કોટીનાં શતકેનૈવ દક્ષયજ્ઞં યયૌ પ્રતિ ॥ ૨૪॥

અગ્નિકૃચ્છતકોટ્યા ચ કોટ્યાગ્નિમુખ એવ ચ ।
આદિત્યમૂર્ધા કોટ્યા ચ તથા ચૈવ ઘનાવહઃ ॥ ૨૫॥

સન્નાહઃ શતકોટ્યા ચ કોટ્યા ચ કુમુદો ગણઃ ।
અમોઘઃ કોકિલશ્ચૈવ કોટિકોટ્યા ગણાધિપઃ ॥ ૨૬॥

કાષ્ઠાગૂઢશ્ચતુઃષષ્ટ્યા સુકેશો વૃષભસ્તથા ।
સુમન્ત્રકો ગણાધીશસ્તથા તાત સુનિર્યયૌ ॥ ૨૭॥

કાકપાદોદરઃ ષષ્ટિકોટિભિર્ગણસત્તમઃ ।
તથા સન્તાનકઃ ષષ્ટિકોટિભિર્ગણપુઙ્ગવઃ ॥ ૨૮॥

મહાબલશ્ચ નવભિઃ કોટિભિઃ પુઙ્ગવસ્તથા । ૨૯॥

મધુપિઙ્ગસ્તથા તાત ગણાધીશો હિ નિર્યયૌ ।
નીલો નવત્યા કોટીનાં પૂર્ણભદ્રસ્તથૈવ ચ ॥ ૩૦॥

નિર્યયૌ શતકોટીભિશ્ચતુર્વક્ત્રો ગણાધિપઃ ॥ ૩૧॥

વિરૂપાક્ષશ્ચ કોટીનાં ચતુઃષષ્ટ્યા ગણેશ્વરઃ ।
તાલકેતુઃ ષડાસ્યશ્ચ પઞ્ચાસ્યશ્ચ ગણાધિપઃ ॥ ૩૨॥

સંવર્તકસ્તથા ચૈવ કુલીશશ્ચ સ્વયં પ્રભુઃ ।
લોકાન્તકશ્ચ દીપ્તાત્મા તથા દૈત્યાન્તકો મુને ॥ ૩૩॥

ગણો ભૃઙ્ગીરિટિઃ શ્રીમાન્ દેવદેવપ્રિયસ્તથા ।
અશનિર્ભાલકશ્ચૈવ ચતુઃષષ્ટ્યા સહસ્રકઃ ॥ ૩૪॥

કોટિકોટિસહસ્રાણાં શતૈર્વિંશતિભિર્વૃતઃ ।
વીરેશો હ્યભ્યયાદ્વીરઃ વીરભદ્રઃ શિવાજ્ઞયા ॥ ૩૫॥

ભૂતકોટિસહસ્રૈસ્તુ પ્રયયૌ કોટિભિસ્ત્રિભિઃ ।
રોમજૈઃ શ્વગણૈશ્ચૈવ તથા વીરો યયૌ દ્રુતમ્ ॥ ૩૬॥

તદા ભેરીમહાનાદઃ શઙ્ખાશ્ચ વિવિધસ્વનાઃ ।
જટાહરો મુખાશ્ચૈવ શ૱ૃઙ્ગાણિ વિવિધાનિ ચ ॥ ૩૭॥

તે તાનિ વિતતાન્યેવ બન્ધનાનિ સુખાનિ ચ ।
વાદિત્રાણિ વિનેદુશ્ચ વિવિધાનિ મહોત્સવે ॥ ૩૮॥

વીરભદ્રસ્ય યાત્રાયાં સબલસ્ય મહામુને ।
શકુનાન્યભવંસ્તત્ર ભૂરીણિ સુખદાનિ ચ ॥ ૩૯॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે વીરભદ્રયાત્રાવર્ણનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ ॥ ૨.૨.૩૩॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયા રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૩૪. ચતુસ્ત્રિંશોઽધ્યાયઃ । યજ્ઞવાટે દેવાનાં દુઃશકુનદર્શનમ્ ।

બ્રહ્મોવાચ ।
એવં પ્રચલિતે ચાસ્મિન્ વીરભદ્રે ગણાન્વિતે ।
દુષ્ટચિહ્નાનિ દક્ષેણ દૃષ્ટાનિ વિબુધૈરપિ ॥ ૧॥

ઉત્પાતા વિવિધાશ્ચાસન્ વીરભદ્રે ગણાન્વિતે ।

ત્રિવિધા અપિ દેવર્ષે યજ્ઞવિધ્વંસસૂચકાઃ ॥ ૨॥

દક્ષવામાક્ષિબાહૂરુવિસ્પન્દઃ સમજાયત ।
નાનાકષ્ટપ્રદસ્તાત સર્વથાશુભસૂચકઃ ॥ ૩॥

ભૂકમ્પઃ સમભૂત્તત્ર દક્ષયાગસ્થલે તદા ।
દક્ષોઽપશ્યચ્ચ મધ્યાહ્ને નક્ષત્રાણ્યદ્ભુતાનિ ચ ॥ ૪॥

દિશશ્ચાસન્સુમલિનાઃ કર્બુરોઽભૂદ્દિવાકરઃ ।
પરિવેષસહસ્રેણ સઙ્ક્રાન્તશ્ચ ભયઙ્કરઃ ॥ ૫॥

નક્ષત્રાણિ પતન્તિ સ્મ વિદ્યુદગ્નિપ્રભાણિ ચ ।
નક્ષત્રાણામભૂદ્વક્રા ગતિશ્ચાધોમુખી તદા ॥ ૬॥

ગૃધ્રા દક્ષશિરઃ સ્પૃષ્ટ્વા સમુદ્ભૂતાઃ સહસ્રશઃ ।
આસીદ્ ગૃધ્રપક્ષચ્છાયૈઃ સચ્છાયો યાગમણ્ડપઃ ॥ ૭॥

વવાશિરે યાગભૂમૌ ક્રોષ્ટારો નેત્રકસ્તદા ।
ઉલ્કાવૃષ્ટિરભૂત્તત્ર શ્વેતવૃશ્ચિકસમ્ભવા ॥ ૮॥

ખરા વાતા વવુસ્તત્ર પાંશુવૃષ્ટિસમન્વિતાઃ ।
શલભાશ્ચ સમુદ્ભૂતા વિવર્તાનિલકમ્પિતાઃ ॥ ૯॥

નીતશ્ચ પવનૈરૂર્ધ્વં સ દક્ષાધ્વરમણ્ડપઃ ।
દૈવાન્વિતેન દક્ષેણ યઃ કૃતો નૂતનોઽદ્ભુતઃ ॥ ૧૦॥

વેમુર્દક્ષાદયઃ સર્વે તદા શોણિતમદ્ભુતમ્ ।
વેમુશ્ચ માંસખણ્ડાનિ સશલ્યાનિ મુહુર્મુહુઃ ॥ ૧૧॥

સકમ્પાશ્ચ બભૂવુસ્તે દીપા વાતહતા ઇવ ।
દુઃખિતાશ્ચાભવન્સર્વે શસ્ત્રધારાહતા ઇવ ॥ ૧૨॥

તદા નિનાદજાતાનિ બાષ્પવર્ષાણિ તત્ક્ષણે ।
પ્રાતસ્તુષારવર્ષીણિ પદ્માનીવ વનાન્તરે ॥ ૧૩॥

દક્ષાદ્યક્ષીણિ જાતાનિ હ્યકસ્માદ્વિશદાન્યપિ ।
નિશાયાં કમલાશ્ચૈવ કુમુદાનીવ સઙ્ગવે ॥ ૧૪॥

અસૃગ્વવર્ષ દેવશ્ચ તિમિરેણાવૃતા દિશઃ ।
દિગ્દાહોઽભૂદ્વિશેષેણ ત્રાસયન્ સકલાઞ્જનાન્ ॥ ૧૫॥

એવંવિધાન્યરિષ્ટાનિ દદૃશુર્વિબુધાદયઃ ।
ભયમાપેદિરેઽત્યન્તં મુને વિષ્ણ્વાદિકાસ્તદા ॥ ૧૬॥

ભુવિ તે મૂર્છિતાઃ પેતુર્હા હતાઃ સ્મ ઇતીરયન્ ।
તરવસ્તીરસઞ્જાતા નદીવેગહતા ઇવ ॥ ૧૭॥

પતિત્વા તે સ્થિતા ભૂમૌ ક્રૂરાઃ સર્પા હતા ઇવ ।
કન્દુકા ઇવ તે ભૂયઃ પતિતાઃ પુનરુત્થિતાઃ ॥ ૧૮॥

તતસ્તે તાપસન્તપ્તા રુરુદુઃ કુરરી ઇવ ।
રોદનધ્વનિસઙ્ક્રાતોરુક્તિપ્રત્યુક્તિકા ઇવ ॥ ૧૯॥

સવૈકુણ્ઠાસ્તતઃ સર્વે તદા કુણ્ઠિતશક્તયઃ ।
સ્વસ્વોપકણ્ઠમાકણ્ઠં લુલુઠુઃ કમઠા ઇવ ॥ ૨૦॥

એતસ્મિન્નન્તરે તત્ર સઞ્જાતા ચાશરીરવાક્ ।
શ્રાવયત્યખિલાન્ દેવાન્ દક્ષં ચૈવ વિશેષતઃ ॥ ૨૧॥

આકાશવાણ્યુવાચ ।
ધિક્ જન્મ તવ દક્ષાદ્ય મહામૂઢોઽસિ પાપધીઃસ્ ॥

ભવિષ્યતિ મહદ્દુઃખમનિવાર્યં હરોદ્ભવમ્ । ૨૨॥

સહાયિનોઽત્ર યે મૂઢાસ્તવ દેવાદયઃ સ્થિતાઃ ।
તેષામપિ મહદ્દુઃખં ભવિષ્યતિ ન સંશયઃ ॥ ૨૩॥

બ્રહ્મોવાચ ।
તચ્છ્રુત્વાકાશવચનં દૃષ્ટ્વારિષ્ટાનિ તાનિ ચ ।
દક્ષઃ પ્રાપદ્ભયં ચાતિ પરે દેવાદયોઽપિ હ ॥ ૨૪॥

વેપમાનસ્તદા દક્ષો વિકલશ્ચાતિ ચેતસિ ।
અગચ્છચ્છરણં વિષ્ણોઃ સ્વપ્રભોરિન્દિરાપતેઃ ॥ ૨૫॥

સુપ્રણમ્ય ભયાવિષ્ટઃ સંસ્તૂય ચ વિચેતનઃ ।
અવોચદ્દેવદેવં તં વિષ્ણું સ્વજનવત્સલમ્ ॥ ૨૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે દુઃશકુનદર્શનં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥ ૨.૨.૩૪॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૩૫. પઞ્ચત્રિંશોઽધ્યાયઃ । વિષ્ણુવચનમ્ ।

દક્ષ ઉવાચ ।
દેવદેવ હરે વિષ્ણો દીનબન્ધો કૃપાનિધે ।
મમ રક્ષા વિધાતવ્યા ભવતા સાધ્વરસ્ય ચ ॥ ૧॥

રક્ષકસ્ત્વં મખસ્યૈવ મખકર્મા મખાત્મકઃ ।
કૃપા વિધેયા યજ્ઞસ્ય ભઙ્ગો ભવતુ ન પ્રભો ॥ ૨॥

બ્રહ્મોવાચ ।
ઇત્થં બહુવિધાં દક્ષઃ કૃત્વા વિજ્ઞપ્તિમાદરાત્ ।
પપાત પાદયોસ્તસ્ય ભયવ્યાકુલમાનસઃ ॥ ૩॥

ઉત્થાપ્ય તં તતો વિષ્ણુર્દક્ષં વિક્લિન્નમાનસમ્ ।
શ્રુત્વા ચ તસ્ય તદ્વાક્યં કુમતેરસ્મરચ્છિવમ્ ॥ ૪॥

સ્મૃત્વા શિવં મહેશાનં સ્વપ્રભું પરમેશ્વરમ્ ।
અવદચ્છિવતત્ત્વજ્ઞો દક્ષં સમ્બોધયન્હરિઃ ॥ ૫॥

હરિરુવાચ ।
શૃણુ દક્ષ પ્રવક્ષ્યામિ તત્ત્વતઃ શૃણુ મે વચઃ ।
સર્વથા તે હિતકરં મહામન્ત્રસુખપ્રદમ્ ॥ ૬॥

અવજ્ઞા હિ કૃતા દક્ષ ત્વયા તત્ત્વમજાનતા ।
સકલાધીશ્વરસ્યૈવ શઙ્કરસ્ય પરાત્મનઃ ॥ ૭॥

ઈશ્વરાવજ્ઞયા સર્વં કાર્યં ભવતિ સર્વથા ।
વિફલં કેવલં નૈવ વિપત્તિશ્ચ પદે પદે ॥ ૮॥

અપૂજ્યા યત્ર પૂજ્યન્તે પૂજનીયો ન પૂજ્યતે ।
ત્રીણિ તત્ર ભવિષ્યન્તિ દારિદ્યં મરણં ભયમ્ ॥ ૯॥

તસ્માત્સર્વપ્રયત્નેન માનનીયો વૃષધ્વજઃ ।
અમાનિતાન્મહેશાચ્ચ મહદ્ભયમુપસ્થિતમ્ ॥ ૧૦॥

અદ્યાપિ ન વયં સર્વે પ્રભવઃ પ્રભવામહે ।

ભવતો દુર્નયેનૈવ મયા સત્યમુદીર્યતે ॥ ૧૧॥

બ્રહ્મોવાચ ।
વિષ્ણોસ્તદ્વચનં શ્રુત્વા દક્ષશ્ચિન્તાપરોઽભવત્ ।
વિવર્ણવદનો ભૂત્વા તૂષ્ણીમાસીદ્ભુવિ સ્થિતઃ ॥ ૧૨॥

એતસ્મિન્નન્તરે વીરભદ્રઃ સૈન્યસમન્વિતઃ ।
અગચ્છદધ્વરં રુદ્રપ્રેરિતો ગણનાયકઃ ॥ ૧૩॥

પૃષ્ઠે કેચિત્સમાયાતા ગગને કેચિદાગતાઃ ।
દિશશ્ચ વિદિશઃ સર્વે સમાવૃત્ય તથાપરે ॥ ૧૪॥

શર્વાજ્ઞયા ગણાઃ શૂરા નિર્ભયા રુદ્રવિક્રમાઃ ।
અસઙ્ખ્યાઃ સિંહનાદાન્વૈ કુર્વન્તો વીરસત્તમાઃ ॥ ૧૫॥

તેન નાદેન મહતા નાદિતં ભુવનત્રયમ્ ।
રજસા ચાવૃતં વ્યોમ તમસા ચાવૃતા દિશઃ ॥ ૧૬॥

સપ્તદ્વીપાન્વિતા પૃથ્વી ચચાલાતિ ભયાકુલા ।
સશૈલકાનના તત્ર ચુક્ષુભુઃ સકલાબ્ધયઃ ॥ ૧૭॥

એવમ્ભૂતં ચ તત્સૈન્યં લોકક્ષયકરં મહત્ ।
દૃષ્ટ્વા ચ વિસ્મિતાઃ સર્વે બભૂવુરમરાદયઃ ॥ ૧૮॥

સૈન્યોદ્યોગમથાલોક્ય દક્ષશ્ચાસૃઙ્મુખાકુલઃ ।
દણ્ડવત્પતિતો વિષ્ણું સકલત્રોઽભ્યભાષત ॥ ૧૯॥

દક્ષ ઉવાચ ।
ભવદ્બલેનૈવ મયા યજ્ઞઃ પ્રારમ્ભિતો મહાન્ ।
સત્કર્મસિદ્ધયે વિષ્ણો પ્રમાણં ત્વં મહાપ્રભો ॥ ૨૦॥

વિષ્ણો ત્વં કર્મણાં સાક્ષી યજ્ઞાનાં પ્રતિપાલકઃ ।
ધર્મસ્ય વેદગર્ભસ્ય બ્રહ્મણસ્ત્વં મહાપ્રભો ॥ ૨૧॥

તસ્માદ્રક્ષા વિધાતવ્યા યજ્ઞસ્યાસ્ય મમ પ્રભો ।
ત્વદન્યઃ કઃ સમર્થોઽસ્તિ યતસ્ત્વં સકલપ્રભુઃ ॥ ૨૨॥

બ્રહ્મોવાચ ।
દક્ષસ્ય વચનં શ્રુત્વા વિષ્ણુર્દીનતરં તદા ।
અવોચદ્ બોધયંસ્તં વૈ શિવતત્ત્વપરાઙ્મુખમ્ ॥ ૨૩॥

વિષ્ણુરુવાચ ।

મયા રક્ષા વિધાતવ્યા તવ યજ્ઞસ્ય દક્ષ વૈ ।
ખ્યાતો મમ પણઃ સત્યો ધર્મસ્ય પરિપાલનમ્ ॥ ૨૪॥

તત્સત્યં તુ ત્વયોક્તં હિ કિં તત્તસ્ય વ્યતિક્રમઃ ।
શ ૃણુ ત્વં વચ્મ્યહં દક્ષ ક્રૂરબુદ્ધિં ત્યજાધુના ॥ ૨૫॥

નૈમિષેઽનિમિષક્ષેત્રે યજ્જાતં વૃત્તમદ્ભુતમ્ ।
તત્ કિં ન સ્મર્યતે દક્ષ વિસ્મૃતં કિં કુબુદ્ધિના ॥ ૨૬॥

રુદ્રકોપાચ્ચ કો હ્યત્ર સમર્થો રક્ષણે તવ ।
ન યસ્યાભિમતં દક્ષ યસ્ત્વાં રક્ષતિ દુર્મતિઃ ॥ ૨૭॥

કિં કર્મ કિમકર્મેતિ તન્ન પશ્યસિ દુર્મતે ।
સમર્થં કેવલં કર્મ ન ભવિષ્યતિ સર્વદા ॥ ૨૮॥

સ્વકર્મ વિદ્ધિ તદ્યેન સમર્થત્વેન જાયતે ।
ન ત્વન્યઃ કર્મણો દાતા શં ભવેદીશ્વરં વિના ॥ ૨૯॥

ઈશ્વરસ્ય ચ યો ભક્ત્યા શાન્તસ્તદ્ગતમાનસઃ ।
કર્મણો હિ ફલં તસ્ય પ્રયચ્છતિ તદા શિવઃ ॥ ૩૦॥

કેવલં જ્ઞાનમાશ્રિત્ય નિરીશ્વરપરા નરાઃ ।
નિરયં તે ચ ગચ્છન્તિ કલ્પકોટિશતાનિ ચ ॥ ૩૧॥

પુનઃ કર્મમયૈઃ પાશૈર્બદ્ધા જન્મનિ જન્મનિ ।
નિરયેષુ પ્રપચ્યન્તે કેવલં કર્મરૂપિણઃ ॥ ૩૨॥

અયં રુદ્રગણાધીશો વીરભદ્રોઽરિમર્દનઃ ।
રુદ્રકોપાગ્નિસમ્ભૂતઃ સમાયાતોઽધ્વરાઙ્ગણે ॥ ૩૩॥

અયમસ્મદ્વિનાશાર્થમાગતોઽસ્તિ ન સંશયઃ ।
અશક્યમસ્ય નાસ્ત્યેવ કિમપ્યસ્તુ તુ વસ્તુતઃ ॥ ૩૪॥

પ્રજ્વાલ્યાસ્માનયં સર્વાન્ ધ્રુવમેવ મહાપ્રભુઃ ।
તતઃ પ્રશાન્તહૃદયો ભવિષ્યતિ ન સંશયઃ ॥ ૩૫॥

શ્રીમહાદેવશપથં સમુલ્લઙ્ઘ્ય ભ્રમાન્મયા ।
યતઃ સ્થિતં તતઃ પ્રાપ્યં મયા દુઃખં ત્વયા સહ ॥ ૩૬॥

શક્તિર્મમ તુ નાસ્ત્યેવ દક્ષાદ્યૈતન્નિવારણે ।

શપથોલ્લઙ્ઘનાદેવ શિવદ્રોહી યતોઽસ્મ્યહમ્ ॥ ૩૭॥

કાલત્રયેઽપિ ન યતો મહેશદ્રોહિણાં સુખમ્ ।
તતોઽવશ્યં મયા પ્રાપ્તં દુઃખમદ્ય ત્વયા સહ ॥ ૩૮॥

સુદર્શનાભિધં ચક્રમેતસ્મિન્ન લગિષ્યતિ ।
શૈવચક્રમિદં યસ્માદશૈવલયકારણમ્ ॥ ૩૯॥

વિનાપિ વીરભદ્રેણ નામૈતચ્ચક્રમૈશ્વરમ્ ।
હત્વા ગમિષ્યત્યધુના સત્વરં હરસન્નિધૌ ॥ ૪૦॥

શૈવં શપથમુલ્લઙ્ઘ્ય સ્થિતં માં ચક્રમીદૃશમ્ ।
અસંહત્યૈવ સહસા કૃપયૈવ સ્થિરં પરમ્ ॥ ૪૧॥

અતઃ પરમિદં ચક્રમપિ ન સ્થાસ્યતિ ધ્રુવમ્ ।
ગમિષ્યત્યધુના શીઘ્રં જ્વાલામાલાસમાકુલમ્ ॥ ૪૨॥

વીરભદ્રઃ પૂજિતોઽપિ શીઘ્રમસ્માભિરાદરાત્ ।
મહાક્રોધસમાક્રાન્તો નાસ્માન્ સંરક્ષયિષ્યતિ ॥ ૪૩॥

અકાણ્ડપ્રલયોઽસ્માકમાગતોઽદ્ય હિ હા હહા ।
હા હા બત તવેદાનીં નાશોઽસ્માકમુપસ્થિતઃ ॥ ૪૪॥

શરણ્યોઽસ્માકમધુના નાસ્ત્યેવ હિ જગત્ત્રયે ।
શઙ્કરદ્રોહિણો લોકે કઃ શરણ્યો ભવિષ્યતિ ॥ ૪૫॥

તનુનાશેઽપિ સમ્પ્રાપ્યાસ્તૈશ્ચાપિ યમયાતનાઃ ।
તા નૈવ શક્યતે સોઢું બહુદુઃખપ્રદાયિનીઃ ॥ ૪૬॥

શિવદ્રોહિણમાલોક્ય દષ્ટદન્તો યમઃ સ્વયમ્ ।
તપ્તતૈલકટાહેષુ પાતયત્યેવ નાન્યથા ॥ ૪૭॥

ગન્તુમેવાહમુદ્યુક્તઃ સર્વથા શપથોત્તરમ્ ।
તથાપિ ન ગતઃ શીઘ્રં દુષ્ટસંસર્ગપાપતઃ ॥ ૪૮॥

યદદ્ય ક્રિયતેઽસ્માભિઃ પલાયનમિતસ્તદા ।
શાર્વો નાકર્ષકઃ શસ્ત્રૈરસ્માનાકર્ષયિષ્યતિ ॥ ૪૯॥

સ્વર્ગે વા ભુવિ પાતાલે યત્ર કુત્રાપિ વા યતઃ ।
શ્રીવીરભદ્રશસ્ત્રાણાં ગમનં ન હિ દુર્લભમ્ ॥ ૫૦॥

યાવન્તશ્ચ ગણાઃ સન્તિ શ્રીરુદ્રસ્ય ત્રિશૂલિનઃ ।
તાવતામપિ સર્વેષાં શક્તિરેતાદૃશી ધ્રુવમ્ ॥ ૫૧॥

શ્રીકાલભૈરવઃ કાશ્યાં નખાગ્રેણૈવ લીલયા ।
પુરા શિરશ્ચ ચિચ્છેદ પઞ્ચમં બ્રહ્મણો ધ્રુવમ્ ॥ ૫૨॥

એતદુક્ત્વા સ્થિતો વિષ્ણુરતિત્રસ્તમુખામ્બુજઃ ।
વીરભદ્રોઽપિ સમ્પ્રાપ તદૈવાધ્વરમણ્ડપમ્ ॥ ૫૩॥

એવં બ્રુવતિ ગોવિન્દ આગતં સૈન્યસાગરમ્ ।
વીરભદ્રેણ સહિતં દદૃશુશ્ચ સુરાદયઃ ॥ ૫૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે સત્યુપાખ્યાને વિષ્ણુવાક્યવર્ણનં નામ પઞ્ચત્રિંશોઽધ્યાયઃ ॥ ૨.૨.૩૫॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૩૬. ષટ્ત્રિંશોઽધ્યાયઃ । વિષ્ણુવીરભદ્રસંવાદઃ ।

બ્રહ્મોવાચ ।
ઇન્દ્રોઽપિ પ્રહસન્ વિષ્ણુમાત્મવાદરતં તદા ।
વજ્રપાણિઃ સુરૈઃ સાર્ધં યોદ્ધુકામોઽભવત્તદા ॥ ૧॥

તદેન્દ્રો ગજમારૂઢો બસ્તારૂઢોઽનલસ્તથા ।
યમો મહિષમારૂઢો નિરૃતિઃ પ્રેતમેવ ચ ॥ ૨॥

પાશી ચ મકરારૂઢો મૃગારૂઢઃ સદાગતિઃ ।
કુબેરઃ પુષ્પકારૂઢઃ સન્નદ્ધોઽભૂદતન્દ્રિતઃ ॥ ૩॥

તથાન્યે સુરસઙ્ઘાશ્ચ યક્ષચારણગુહ્યકાઃ ।
આરુહ્ય વાહનાન્યેવ સ્વાનિ સ્વાનિ પ્રતાપિનઃ ॥ ૪॥

તેષામુદ્યોગમાલોક્ય દક્ષશ્ચાસૃઙ્મુખસ્તથા ।
તદન્તિકં સમાગત્ય સકલત્રોઽભ્યભાષત ॥ ૫॥

દક્ષ ઉવાચ ।

યુષ્મદ્બલેનૈવ મયા યજ્ઞઃ પ્રારમ્ભિતો મહાન્ ।
સત્કર્મસિદ્ધયે યૂયં પ્રમાણાઃ સ્યુર્મહાપ્રભાઃ ॥ ૬॥

બ્રહ્મોવાચ ।
તચ્છ્રુત્વા દક્ષવચનં સર્વે દેવાઃ સવાસવાઃ ।
નિર્યયુસ્ત્વરિતં તત્ર યુદ્ધં કર્તું સમુદ્યતાઃ ॥ ૭॥

અથ દેવગણાઃ સર્વે યુયુધુસ્તે બલાન્વિતાઃ ।
શક્રાદયો લોકપાલા મોહિતાઃ શિવમાયયા ॥ ૮॥

દેવાનાં ચ ગણાનાં ચ તદાસીત્સમરો મહાન્ ।
તીક્ષ્ણતોમરનારાચૈર્યુયુધુસ્તે પરસ્પરમ્ ॥ ૯॥

નેદુઃ શઙ્ખાશ્ચ ભેર્યશ્ચ તસ્મિન્ રણમહોત્સવે ।
મહાદુન્દુભયો નેદુઃ પટહા ડિણ્ડિમાદયઃ ॥ ૧૦॥

તેન શબ્દેન મહતા શ્લાઘ્યમાનાસ્તદા સુરાઃ ।
લોકપાલૈશ્ચ સહિતા જઘ્નુસ્તાન્ શિવકિઙ્કરાન્ ॥ ૧૧॥

ઇન્દ્રાદ્યૈર્લોકપાલૈશ્ચ ગણાઃ શમ્ભોઃ પરાઙ્મુખાઃ ।
કૃતાશ્ચ મુનિશાર્દૂલ ભૃગોર્મન્ત્રબલેન ચ ॥ ૧૨॥

ઉચ્ચાટનં કૃતં તેષાં ભૃગુણા યજ્વના તદા ।
યજનાર્થં ચ દેવાનાં તુષ્ટ્યર્થં દીક્ષિતસ્ય ચ ॥ ૧૩॥

પરાજિતાન્ સ્વકાન્ દૃષ્ટ્વા વીરભદ્રો રુષાન્વિતઃ ।
ભૂતપ્રેતપિશાચાંશ્ચ કૃત્વા તાનેવ પૃષ્ઠતઃ ॥ ૧૪॥

વૃષભસ્થાન્ પુરસ્કૃત્ય સ્વયં ચૈવ મહાબલઃ ।
મહાત્રિશૂલમાદાય પાતયામાસ નિર્જરાન્ ॥ ૧૫॥

દેવાન્ યક્ષાન્ સાધ્યગણાન્ ગુહ્યકાન્ ચારણાનપિ ।
શૂલઘાતૈશ્ચ તે સર્વે ગણા વેગાત્ પ્રજઘ્નિરે ॥ ૧૬॥

કેચિદ્ દ્વિધા કૃતાઃ ખડ્ગૈર્મુદ્ગરૈશ્ચ વિપોથિતાઃ ।
અન્યૈઃ શસ્ત્રૈરપિ સુરા ગણૈર્ભિન્નાસ્તદાભવન્ ॥ ૧૭॥

એવં પરાજિતાઃ સર્વે પલાયનપરાયણાઃ ।
પરસ્પરં પરિત્યજ્ય ગતા દેવાસ્ત્રિવિષ્ટપમ્ ॥ ૧૮॥

કેવલં લોકપાલાસ્તે શક્રાદ્યાસ્તસ્થુરુત્સુકાઃ ।

સઙ્ગ્રામે દારુણે તસ્મિન્ ધૃત્વા ધૈર્યં મહાબલાઃ ॥ ૧૯॥

સર્વે મિલિત્વા શક્રાદ્યા દેવાસ્તત્ર રણાજિરે ।
બૃહસ્પતિં ચ પપ્રચ્છુર્વિનયાવનતાસ્તદા ॥ ૨૦॥

લોકપાલા ઊચુઃ ।
ગુરો બૃહસ્પતે તાત મહાપ્રાજ્ઞ દયાનિધે ।
શીઘ્રં વદ પૃચ્છતો નઃ કુતોઽસ્માકં જયો ભવેત્ ॥ ૨૧॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તેષાં સ્મૃત્વા શમ્ભું પ્રયત્નવાન્ ।
બૃહસ્પતિરુવાચેદં મહેન્દ્રં જ્ઞાનદુર્બલમ્ ॥ ૨૨॥

બૃહસ્પતિરુવાચ ।
યદુક્તં વિષ્ણુના પૂર્વં તત્સર્વં જાતમદ્ય વૈ ।
તદેવ વિવૃણોમીન્દ્ર સાવધાનતયા શ‍ૃણુ ॥ ૨૩॥

અસ્તિ યજ્ઞેશ્વરઃ કશ્ચિત્ ફલદઃ સર્વકર્મણામ્ ।
કર્તારં ભજતે સોઽપિ ન સ્વકર્તુઃ પ્રભુર્હિ સઃ ॥ ૨૪॥

ન મન્ત્રૌષધયઃ સર્વે નાભિચારા ન લૌકિકાઃ ।
ન કર્માણિ ન વેદાશ્ચ ન મીમાંસાદ્વયં તથા ॥ ૨૫॥

અન્યાન્યપિ ચ શાસ્ત્રાણિ નાનાવેદયુતાનિ ચ ।
જ્ઞાતું નેશં સમ્ભવન્તિ વદન્ત્યેવં પુરાતનાઃ ॥ ૨૬॥

ન સ્વજ્ઞેયો મહેશાનઃ સર્વવેદાયુતેન સઃ ।
ભક્તૈરનન્યશરણૈર્નાન્યથેતિ મહાશ્રુતિઃ ॥ ૨૭॥

શાન્ત્યા ચ પરયા દૃષ્ટ્યા સર્વથા નિર્વિકારયા ।
તદનુગ્રહતો નૂનં જ્ઞાતવ્યો હિ સદાશિવઃ ॥ ૨૮॥

પરં તુ સંવદિષ્યામિ કાર્યાકાર્ય વિવક્ષિતૌ ।
સિદ્ધ્યંશં ચ સુરેશાન તં શ‍ૃણુ ત્વં હિતાય વૈ ॥ ૨૯॥

ત્વમિન્દ્ર બાલિશો ભૂત્વા લોકપાલૈઃ સહાદ્ય વૈ ।
આગતો દક્ષયજ્ઞં હિ કિં કરિષ્યસિ વિક્રમમ્ ॥ ૩૦॥

એતે રુદ્રસહાયાશ્ચ ગણાઃ પરમકોપનાઃ ।
આગતા યજ્ઞવિઘ્નાર્થં તં કરિષ્યન્ત્યસંશયમ્ ॥ ૩૧॥

સર્વથા ન હ્યુપાયોઽત્ર કેષાઞ્ચિદપિ તત્ત્વતઃ ।
યજ્ઞવિઘ્નવિનાશાર્થં સત્યં સત્યં બ્રવીમ્યહમ્ ॥ ૩૨॥

બ્રહ્મોવાચ ।
એવં બૃહસ્પતેર્વાક્યં શ્રુત્વા તે હિ દિવૌકસઃ ।
ચિન્તામાપેદિરે સર્વે લોકપાલાઃ સવાસવાઃ ॥ ૩૩॥

તતોઽબ્રવીદ્ વીરભદ્રો મહાવીરગણૈર્વૃતઃ ।
ઇન્દ્રાદીન્ લોકપાલાંસ્તાન્ સ્મૃત્વા મનસિ શઙ્કરમ્ ॥ ૩૪॥

વીરભદ્ર ઉવાચ ।
સર્વે યૂયં બાલિશત્વાદવદાનાર્થમાગતાઃ ।
અવદાનં પ્રયચ્છામિ આગચ્છત મમાન્તિકમ્ ॥ ૩૫॥

હે શક્ર હે શુચે ભાનો હે શશિન્ હે ધનાધિપ ।
હે પાશપાણે હે વાયો નિરૃતે યમ શેષ હે ॥ ૩૬॥

હે સુરાસુરસઙ્ઘા હીહૈત યૂયં વિચક્ષણાઃ ।
અવદાનાનિ દાસ્યામિ આતૃપ્ત્યાદ્યાસતાં વરાન્ ॥ ૩૭॥

બ્રહ્મોવાચ ।
એવમુક્ત્વા સિતૈર્બાણૈર્જઘાનાથ રુષાન્વિતઃ ।
નિખિલાંસ્તાન્ સુરાન્ સદ્યો વીરભદ્રો ગણાગ્રણીઃ ।
તૈર્બાણૈર્નિહતાઃસર્વે વાસવાદ્યાઃ સુરેશ્વરાઃ ॥ ૩૮॥

પલાયનપરા ભૂત્વા જગ્મુસ્તે ચ દિશો દશ ।
ગતેષુ લોકપાલેષુ વિદ્રુતેષુ સુરેષુ ચ ॥

યજ્ઞવાટોપકણ્ઠે હિ વીરભદ્રોઽગમદ્ ગણૈઃ । ૩૯॥

તદા તે ઋષયઃ સર્વે સુભીતા હિ રમેશ્વરમ્ ।
વિજ્ઞપ્તુકામાઃ સહસા શીઘ્રમૂચુર્નતા ભૃશમ્ ॥ ૪૦॥

ઋષય ઊચુઃ ।
દેવદેવ રમાનાથ સર્વેશ્વર મહાપ્રભો ।
રક્ષ યજ્ઞં હિ દક્ષસ્ય યજ્ઞોઽસિ ત્વં ન સંશયઃ ॥ ૪૧॥

યજ્ઞકર્મા યજ્ઞરૂપો યજ્ઞાઙ્ગો યજ્ઞરક્ષકઃ ।
રક્ષ યજ્ઞમતો રક્ષ ત્વત્તોઽન્યો ન હિ રક્ષકઃ ॥ ૪૨॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તેષામૃષીણાં વચનં હરિઃ ।
યોદ્ધુકામોઽભવદ્વિષ્ણુર્વીરભદ્રેણ તેન વૈ ॥ ૪૩॥

ચતુર્ભુજઃ સુસન્નદ્ધો ચક્રાયુધધરઃ કરૈઃ ।
મહાબલોઽમરગણૈર્યજ્ઞવાટાત્સ નિર્યયૌ ॥ ૪૪॥

વીરભદ્રઃ શૂલપાણિર્નાનાગણસમન્વિતઃ ।
દદર્શ વિષ્ણું સન્નદ્ધં યોદ્ધુકામં મહાપ્રભુમ્ ॥ ૪૫॥

તં દૃષ્ટ્વા વીરભદ્રોઽભૂદ્ ભ્રુકુટીકુટિલાનનઃ ।
કૃતાન્ત ઇવ પાપિષ્ઠં મૃગેન્દ્ર ઇવ વારણમ્ ॥ ૪૬॥

તથાવિધં હરિં દૃષ્ટ્વા વીરભદ્રોઽરિમર્દનઃ ।
અવદત્ત્વરિતઃ ક્રુદ્ધો ગણૈર્વીરૈઃ સમાવૃતઃ ॥ ૪૭॥

વીરભદ્ર ઉવાચ ।
રે રે હરે મહાદેવશપથોલ્લઙ્ઘનં ત્વયા ।
કથમદ્ય કૃતં ચિત્તે ગર્વઃ કિમભવત્તવ ॥ ૪૮॥

તવ શ્રીરુદ્રશપથોલ્લઙ્ઘને શક્તિરસ્તિ કિમ્ ।
કો વા ત્વમસિ કો વા તે રક્ષઽકોઽસ્તિ જગત્ત્રયે ॥ ૪૯॥

અત્ર ત્વમાગતઃ કસ્માદ્વયં તન્નૈવ વિદ્મહે ।
દક્ષસ્ય યજ્ઞપાતા ત્વં કથં જાતોઽસિ તદ્વદ ॥ ૫૦॥

દાક્ષાયણ્યા કૃતં યચ્ચ તન્ન દૃષ્ટં કિમુ ત્વયા ।
પ્રોક્તં યચ્ચ દધીચેન શ્રુતં તન્ન કિમુ ત્વયા ચાપિ દક્ષયજ્ઞેઽસ્મિન્ અવદાનાર્થમાગતઃ ।
અવદાનં પ્રયચ્છામિ તવ ચાપિ મહાભુજ ॥ ૫૨॥

વક્ષો વિદારયિષ્યામિ ત્રિશૂલેન હરે તવ ।
કસ્તવાસ્તિ સમાયાતો રક્ષકોઽદ્ય મમાન્તિકમ્ ॥ ૫૩॥

પાતયિષ્યામિ ભૂપૃષ્ઠે જ્વાલયિષ્યામિ વહ્નિના ।
દગ્ધં ભવન્તમધુના પેષયિષ્યામિ સત્વરમ્ ॥ ૫૪॥

રે રે હરે દુરાચાર મહેશવિમુખાધમ ।
શ્રીમહારુદ્રમાહાત્મ્યં કિન્ન જાનાસિ પાવનમ્ ॥ ૫૫॥

અથાપિ ત્વં મહાબાહો યોદ્ધુકામોઽગ્રતઃ સ્થિતઃ ।

નેષ્યામિ પુનરાવૃત્તિં યદિ તિષ્ઠેસ્ત્વમાત્મના ॥ ૫૬॥

બ્રહ્મોવાચ ।
તસ્ય તદ્વચનં શ્રુત્વા વીરભદ્રસ્ય બુદ્ધિમાન્ ।
ઉવાચ વિહસન્ પ્રીત્યા વિષ્ણુસ્તત્ર સુરેશ્વરઃ ॥ ૫૭॥

વિષ્ણુરુવાચ ।
શ઼ૃણુ ત્વં વીરભદ્રાદ્ય પ્રવક્ષ્યામિ ત્વદગ્રતઃ ।
ન રુદ્રવિમુખં માં ત્વં વદ શઙ્કરસેવકમ્ ॥ ૫૮॥

અનેન પ્રાર્થિતઃ પૂર્વં યજ્ઞાર્થં ચ પુનઃ પુનઃ ।
દક્ષેણાવિદિતાર્થેન કર્મનિષ્ઠેન મૌઢ્યતઃ ॥ ૫૯॥

અહં ભક્તપરાધીનસ્તથા સોઽપિ મહેશ્વરઃ ।
દક્ષો ભક્તો હિ મે તાત તસ્માદત્રાગતો મખે ॥ ૬૦॥

શ઼ૃણુ પ્રતિજ્ઞાં મે વીર રુદ્રકોપસમુદ્ભવ ।
રુદ્રતેજઃસ્વરૂપો હિ સુપ્રતાપાલય પ્રભો ॥ ૬૧॥

અહં નિવારયામિ ત્વાં ત્વં ચ માં વિનિવારય ।
તદ્ભવિષ્યતિ યદ્ભાવિ કરિષ્યેઽહં પરાક્રમમ્ ॥ ૬૨॥

બ્રહ્મોવાચ ।
ઇત્યુક્તવતિ ગોવિન્દે પ્રહસ્ય સ મહાભુજઃ ।
અવદત્સુપ્રસન્નોઽસ્મિ ત્વાં જ્ઞાત્વાસ્મત્પ્રભોઃ પ્રિયમ્ ॥ ૬૩॥

તતો વિહસ્ય સુપ્રીતો વીરભદ્રો ગણાગ્રણીઃ ।
પ્રશ્રયાવનતોઽવાદીદ્વિષ્ણું દેવં હિ તત્ત્વતઃ ॥ ૬૪॥

વીરભદ્ર ઉવાચ ।
તવ ભાવપરીક્ષાર્થમિત્યુક્તં મે મહાપ્રભો ।
ઇદાનીં તત્ત્વતો વચ્મિ શ઼ૃણુ ત્વં સાવધાનતઃ ॥ ૬૫॥

યથા શિવસ્તથા ત્વં હિ યથા ત્વં ચ તથા શિવઃ ।
ઇતિ વેદા વર્ણયન્તિ શિવશાસનતો હરે ॥ ૬૬॥

શિવાજ્ઞયા વયં સર્વે સેવકાઃ શઙ્કરસ્ય વૈ ।
તથાપિ ચ રમાનાથ પ્રવાદોચિતમાદરાત્ ॥ ૬૭॥

બ્રહ્મોવાચ ।

તચ્છ્રુત્વા વચનં તસ્ય વીરભદ્રસ્ય સોઽચ્યુતઃ ।
પ્રહસ્ય ચેદં પ્રોવાચ વીરભદ્રમિદં વચઃ ॥ ૬૮॥

વિષ્ણુરુવાચ ।
યુદ્ધં કુરુ મહાવીર મયા સાર્ધમશઙ્કિતઃ ।
તવાસ્ત્રૈઃ પૂર્યમાણોઽહં ગમિષ્યામિ સ્વમાશ્રમમ્ ॥ ૬૯॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા હિ વિરમ્યાસૌ સન્નદ્ધોઽભૂદ્ રણાય ચ ।
સ્વગણૈર્વીરભદ્રોઽપિ સન્નદ્ધોઽભૂન્મહાબલઃ ॥ ૭૦॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે વિષ્ણુવીરભદ્રસંવાદો નામ ષટ્ત્રિંશોઽધ્યાયઃ ॥ ૨.૨.૩૬॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૩૭. સપ્તત્રિંશોઽધ્યાયઃ । દક્ષયજ્ઞવિધ્વંસઃ ।

બ્રહ્મોવાચ ।
વીરભદ્રોઽથ યુદ્ધે વૈ વિષ્ણુના સ મહાબલઃ ।
સંસ્મૃત્ય શઙ્કરં ચિત્તે સર્વાપદ્વિનિવારણમ્ ॥ ૧॥

આરુહ્ય સ્યન્દનં દિવ્યં સર્વવૈરિવિમર્દનઃ ।
ગૃહીત્વા પરમાસ્ત્રાણિ સિંહનાદં જગર્જ હ ॥ ૨॥

વિષ્ણુશ્ચાપિ મહાઘોષં પાઞ્ચજન્યાભિધં નિજમ્ ।
દધ્મૌ બલી મહાશઙ્ખં સ્વકીયાન્ હર્ષયન્નિવ ॥ ૩॥

તચ્છ્રુત્વા શઙ્ખનિર્હ્રાદં દેવા યે ચ પલાયિતાઃ ।
રણં હિત્વા ગતાઃ પૂર્વં તે દ્રુતં પુનરાયયુઃ ॥ ૪॥

વીરભદ્રગણૈસ્તે તુ લોકપાલાઃ સવાસવાઃ ।
યુદ્ધં ચક્રુસ્તથા સિંહનાદં કૃત્વા બલાન્વિતાઃ ॥ ૫॥

ગણાનાં લોકપાલાનાં દ્વન્દ્વયુદ્ધં ભયાવહમ્ ।

અભવત્તત્ર તુમુલં ગર્જતાં સિંહનાદતઃ ॥ ૬॥

નન્દિના યુયુધે શક્રોઽનલો વૈ ચાશ્મના તથા ।
કુબેરોઽપિ હિ કૂષ્માણ્ડપતિના યુયુધે બલી ॥ ૭॥

તદેન્દ્રેણ હતો નન્દી વજ્રેણ શતપર્વણા ॥ ૮॥

નન્દિના ચ હતઃ શક્રસ્ત્રિશૂલેન સ્તનાન્તરે ॥ ૯॥

બલિનૌ દ્વાવપિ પ્રીત્યા યુયુધાતે પરસ્પરમ્ ।
નાનાઘાતાંશ્ચ કુર્વન્તૌ નન્દિશક્રૌ જિગીષયા ॥ ૧૦॥

શક્ત્યા જઘાન ચાશ્માનં શુચિઃ પરમકોપનઃ ।
સોઽપિ શૂલેન તં વેગાચ્છિતધારેણ પાવકમ્ ॥ ૧૧॥

યમેન સહ સઙ્ગ્રામં મહાલોકો ગણાગ્રણીઃ ।
ચકાર તુમુલં વીરો મહાદેવં સ્મરન્મુદા ॥ ૧૨॥

નૈરૃતેન સમાગમ્ય ચણ્ડશ્ચ બલવત્તરઃ ।
યુયુધે પરમાસ્ત્રૈશ્ચ નૈરૃતિં નિવિડમ્બયન્ ॥ ૧૩॥

વરુણેન સમં વીરો મુણ્ડશ્ચૈવ મહાબલઃ ।
યુયુધે પરયા શક્ત્યા ત્રિલોકીં વિસ્મયન્નિવ ॥ ૧૪॥

વાયુના ચ હતો ભૃઙ્ગી સ્વાસ્ત્રેણ પરમૌજસા ।
ભૃઙ્ગિણા ચ હતો વાયુસ્ત્રિશૂલેન પ્રતાપિના ॥ ૧૫॥

કુબેરેણૈવ સઙ્ગમ્ય કૂષ્માણ્ડપતિરાદરાત્ ।
યુયુધે બલવાન્ વીરો ધ્યાત્વા હૃદિ મહેશ્વરમ્ ॥ ૧૬॥

યોગિનીચક્રસંયુક્તો ભૈરવીનાયકો મહાન્ ।
વિદાર્ય દેવાનખિલાન્ પપૌ શોણિતમદ્ભુતમ્ ॥ ૧૭॥

ક્ષેત્રપાલાસ્તથા તત્ર બુભુક્ષુઃ સુરપુઙ્ગવાન્ ।
કાલી ચાપિ વિદાર્યૈવ તાન્પપૌ રુધિરં બહુ ॥ ૧૮॥

અથ વિષ્ણુર્મહાતેજા યુયુધે તૈશ્ચ શત્રુહા ।
ચક્રં ચિક્ષેપ વેગેન દહન્નિવ દિશો દશ ॥ ૧૯॥

ક્ષેત્રપાલઃ સમાયાન્તં ચક્રમાલોક્ય વેગતઃ ।
તત્રાગત્યાગતો વીરશ્ચાગ્રસત્સહસા બલી ॥ ૨૦॥

ચક્રં ગ્રસિતમાલોક્ય વિષ્ણુઃ પરપુરઞ્જયઃ ।
મુખં તસ્ય પરામૃજ્ય તમુદ્ગાલિતવાનરિમ્ ॥ ૨૧॥

સ્વચક્રમાદાય મહાનુભાવઃ
ચુકોપ ચાતીવ ભવૈકભર્તા ।
મહાબલી તૈર્યુયુધે પ્રવીરૈઃ
સઙ્ક્રુદ્ધનાનાયુધધારકોઽસ્ત્રૈઃ ॥ ૨૨॥

ચક્રે મહારણં વિષ્ણુઃ તૈઃ સાર્ધં યુયુધે મુદા ।
નાનાયુધાનિ સઙ્ક્ષિપ્ય તુમુલં ભીમવિક્રમમ્ ॥ ૨૩॥

અથ તે ભૈરવાદ્યાશ્ચ યુયુધુસ્તેન ભૂરિશઃ ।
નાનાસ્ત્રાણિ વિમુઞ્ચન્તઃ સઙ્ક્રુદ્ધાઃ પરમૌજસા ॥ ૨૪॥

ઇત્થં તેષાં રણં દૃષ્ટ્વા હરિણાતુલતેજસા ।
વિનિવૃત્ય સમાગમ્ય તાન્સ્વયં યુયુધે બલી ॥ ૨૫॥

અથ વિષ્ણુર્મહાતેજાશ્ચક્રમુદ્યમ્ય મૂર્চ્છિતઃ ।
યુયુધે ભગવાંસ્તેન વીરભદ્રેણ માધવઃ ॥ ૨૬॥

તયોઃ સમભવદ્યુદ્ધં સુઘોરં રોમહર્ષણમ્ ।
મહાવીરાબ્ધિપત્યોસ્તુ નાનાસ્ત્રધરયોર્મુને ॥ ૨૭॥

વિષ્ણોર્યોગબલાત્તસ્ય દેહાદેવ સુદારુણાઃ ।
શઙ્ખચક્રગદાહસ્તા અસઙ્ખ્યાતાશ્ચ જજ્ઞિરે ॥ ૨૮॥

તે ચાપિ યુયુધુસ્તેન વીરભદ્રેણ ભાષતા ।
વિષ્ણુવત્ બલવન્તો હિ નાનાયુધધરા ગણાઃ ॥ ૨૯॥

તાન્સર્વાનપિ વીરોઽસૌ નારાયણસમપ્રભાન્ ।
ભસ્મીચકાર શૂલેન હત્વા સ્મૃત્વા શિવં પ્રભુમ્ ॥ ૩૦॥

તતશ્ચોરસિ તં વિષ્ણું લીલયૈવ રણાજિરે ।
જઘાન વીરભદ્રો હિ ત્રિશૂલેન મહાબલી ॥ ૩૧॥

તેન ઘાતેન સહસા વિહતઃ પુરુષોત્તમઃ ।
પપાત ચ તદા ભૂમૌ વિસંજ્ઞોઽભૂન્મુને હરિઃ ॥ ૩૨॥

તતો જજ્ઞેઽદ્ભુતં તેજઃ પ્રલયાનલસન્નિભમ્ ।
ત્રૈલોક્યદાહકં તીવ્રં વીરાણામપિ ભીકરમ્ ॥ ૩૩॥

ક્રોધરક્તેક્ષણઃ શ્રીમાન્ પુનરુત્થાય સ પ્રભુઃ ।
પ્રહર્તું ચક્રમુદ્યમ્ય હ્યતિષ્ઠત્પુરુષર્ષભઃ ॥ ૩૪॥

તસ્ય ચક્રં મહારૌદ્રં કાલાદિત્યસમપ્રભમ્ ।
વ્યષ્ટમ્ભયદદીનાત્મા વીરભદ્રઃ શિવઃ પ્રભુઃ ॥ ૩૫॥

મુને શમ્ભોઃ પ્રભાવાત્તુ માયેશસ્ય મહાપ્રભોઃ ।
ન ચચાલ હરેશ્ચક્રં કરસ્થં સ્તમ્ભિતં ધ્રુવમ્ ॥ ૩૬॥

અથ વિષ્ણુર્ગણેશેન વીરભદ્રેણ ભાષતા ।
અતિષ્ઠત્ સ્તમ્ભિતસ્તેન શૃઙ્ગવાનિવ નિશ્ચલઃ ॥ ૩૭॥

તતો વિષ્ણુઃ સ્તમ્ભિતો હિ વીરભદ્રેણ નારદ ।
યજ્વોપમન્ત્રણમનું નિઃસ્તમ્ભનકરં જપન્ ॥ ૩૮॥

તતઃ સ્તમ્ભનનિર્મુક્તઃ શાર્ઙ્ગધન્વા રમેશ્વરઃ ।
શાર્ઙ્ગં જગ્રાહ સ ક્રુદ્ધઃ સ્વધનુઃ સશરં મુને ॥ ૩૯॥

ત્રિભિશ્ચ ધર્ષિતં બાણૈસ્તેન શાર્ઙ્ગધનુર્હરેઃ ।
વીરભદ્રેણ તત્તાત ત્રિધાભૂત્તત્ક્ષણાન્મુને ॥ ૪૦॥

અથ વિષ્ણુર્મહાવાણ્યા બોધિતસ્તં મહાગણમ્ ।
અસહ્યવર્ચસં જ્ઞાત્વા હ્યન્તર્ધાતું મનો દધે ॥ ૪૧॥

જ્ઞાત્વા ચ તત્સર્વમિદં ભવિષ્યં
સતીકૃતં દુષ્પ્રસહં પરેષામ્ ।
ગતાઃ સ્વલોકં સ્વગણાન્વિતાસ્તુ
સ્મૃત્વા શિવં સર્વપતિં સ્વતન્ત્રમ્ ॥ ૪૨॥

સત્યલોકગતશ્ચાહં પુત્રશોકેન પીડિતઃ ।
અચિન્તયં સુદુઃખાર્તો મયા કિં કાર્યમદ્ય વૈ ॥ ૪૩॥

વિષ્ણૌ મયિ ગતે ચૈવ દેવાશ્ચ મુનિભિઃ સહ ।
વિનિર્જિતા ગણૈઃ સર્વે યે તે યજ્ઞોપજીવિનઃ ॥ ૪૪॥

તમુપદ્રવમાલક્ષ્ય વિધ્વસ્તં ચ મહામખમ્ ।
મૃગસ્વરૂપો યજ્ઞો હિ મહાભીતોઽપિ દુદ્રુવે ॥ ૪૫॥

તં તદા મૃગરૂપેણ ધાવન્તં ગગનં પ્રતિ ।
વીરભદ્રઃ સમાદાય વિશિરસ્કમથાકરોત્ ॥ ૪૬॥

તતઃ પ્રજાપતિં ધર્મં કશ્યપં ચ પ્રગૃહ્ય સઃ ।
અરિષ્ટનેમિનં વીરો બહુપુત્રં મુનીશ્વરમ્ ॥ ૪૭॥

મુનિમઙ્ગિરસં ચૈવ કૃશાશ્વં ચ મહાગણઃ ।
જઘાન મૂર્ધ્નિ પાદેન દત્તં ચ મુનિપુઙ્ગવમ્ ॥ ૪૮॥

સરસ્વત્યાશ્ચ નાસાગ્રં દેવમાતુસ્તથૈવ ચ ।
ચિચ્છેદ કરજાગ્રેણ વીરભદ્રઃ પ્રતાપવાન્ ॥ ૪૯॥

તતોઽન્યાનપિ દેવાદીન્ વિદાર્ય પૃથિવીતલે ।
પાતયામાસ સોઽયં વૈ ક્રોધાક્રાન્તાતિલોચનઃ ॥ ૫૦॥

વીરભદ્રો વિદાર્યાપિ દેવાન્મુખ્યાન્મુનીનપિ ।
નાભૂચ્છાન્તો દ્રુતક્રોધઃ ફણિરાડિવ મણ્ડિતઃ ॥ ૫૧॥

વીરભદ્રોદ્ધૃતારાતિઃ કેસરીવ વનદ્વિપાન્ ।
દિશો વિલોકયામાસ કઃ કુત્રાસ્તીત્યનુક્ષણમ્ ॥ ૫૨॥

વ્યપોથયદ્ ભૃગું યાવન્મણિભદ્રઃ પ્રતાપવાન્ ।
પદાક્રમ્યોરસિ તદાકાર્ષીત્તચ્છ્મશ્રુલુઞ્ચનમ્ ॥ ૫૩॥

ચણ્ડશ્ચોત્પાટયામાસ પૂષ્ણો દન્તાન્ પ્રવેગતઃ ।
શપ્યમાને હરે પૂર્વં યોઽહસદ્દર્શયન્દતઃ ॥ ૫૪॥

નન્દી ભગસ્ય નેત્રે હિ પાતિતસ્ય રુષા ભુવિ ।
ઉજ્જહાર દક્ષમક્ષ્ણા યઃ શપન્તમસૂસુચત્ ॥ ૫૫॥

વિડમ્બિતા સ્વધા તત્ર સા સ્વાહા દક્ષિણા તથા ।
મન્ત્રાસ્તન્ત્રાસ્તથા ચાન્યે તત્રસ્થા ગણનાયકૈઃ ॥ ૫૬॥

વવૃષુસ્તે પુરીષાણિ વિતાનાગ્નૌ રુષા ગણાઃ ।
અનિર્વાચ્યં તદા ચક્રુર્ગણા વીરાસ્તમધ્વરમ્ ॥ ૫૭॥

અન્તર્વેદ્યન્તરગતં નિલીનં તદ્ભયાદ્ બલાત્ ।
આનિનાય સમાજ્ઞાય વીરભદ્રઃ સ્વભૂઃસુતમ્ ॥ ૫૮॥

કપોલેઽસ્ય ગૃહીત્વા તુ ખડ્ગેનોપહૃતં શિરઃ ।
અભેદ્યમભવત્તસ્ય તચ્ચ યોગપ્રભાવતઃ ॥ ૫૯॥

અભેદ્યં તચ્છિરો મત્વા શસ્ત્રાસ્ત્રૈશ્ચ તુ સર્વશઃ ।
કરેણ ત્રોટયામાસ પદ્ભ્યામાક્રમ્ય ચોરસિ ॥ ૬૦॥

તચ્છિરસ્તસ્ય દુષ્ટસ્ય દક્ષસ્ય હરવૈરિણઃ ।
અગ્નિકુણ્ડે પ્રચિક્ષેપ વીરભદ્રો ગણાગ્રણીઃ ॥ ૬૧॥

રેજે તદા વીરભદ્રસ્ત્રિશૂલં ભ્રામયન્કરે ।
ક્રુધ્દ્વા રણાક્ષસંવર્તાઃ પ્રજ્વાલ્ય પર્વતોપમાઃ ॥ ૬૨॥

અનાયાસેન હત્વૈતાન્ વીરભદ્રસ્તતોઽગ્નિના ।
જ્વાલયામાસ સક્રોધો દીપ્તાગ્નિઃ શલભાનિવ ॥ ૬૩॥

વીરભદ્રસ્તતો દગ્ધાન્ દૃષ્ટ્વા દક્ષપુરોગમાન્ ।
અટ્ટાટ્ટહાસમકરોત્ પૂરયંશ્ચ જગત્ત્રયમ્ ॥ ૬૪॥

વીરશ્રિયા વૃતસ્તત્ર તતો નન્દનસમ્ભવા ।
પુષ્પવૃષ્ટિરભૂદ્દિવ્યા વીરભદ્રે ગણાન્વિતે ॥ ૬૫॥

વવુર્ગન્ધવહાઃ શીતાઃ સુગન્ધાઃ સુખદાઃ શનૈઃ ।
દેવદુન્દુભયો નેદુઃ સમમેવ તતઃ પરમ્ ॥ ૬૬॥

કૈલાસં સ યયૌ વીરઃ કૃતકાર્યસ્તતઃ પરમ્ ।
વિનાશિતદૃઢધ્વાન્તો ભાનુમાનિવ સત્વરમ્ ॥ ૬૭॥

કૃતકાર્યં વીરભદ્રં દૃષ્ટ્વા સન્તુષ્ટમાનસઃ ।
શમ્ભુર્વીરગણાધ્યક્ષં ચકાર પરમેશ્વરઃ ॥ ૬૮॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસહિતાયાં દ્વિતીયે સતીખણ્ડે યજ્ઞવિધ્વંસવર્ણનં નામ સપ્તત્રિંશોઽધ્યાયઃ ॥ ૨.૨.૩૭॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૩૮. અષ્ટત્રિંશોઽધ્યાયઃ । ક્ષુવદધીચવિવાદઃ ।

સૂત ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય વિધેરમિતધીમતઃ ।
પપ્રચ્છ નારદઃ પ્રીત્યા વિસ્મિતસ્તં દ્વિજોત્તમઃ ॥ ૧॥

નારદ ઉવાચ ।
શિવં વિહાય દક્ષસ્ય સુરૈર્યજ્ઞં હરિર્ગતઃ ।
હેતુના કેન તદ્ બ્રૂહિ યત્રાવજ્ઞાભવત્તતઃ ॥ ૨॥

જાનાતિ કિં સ શમ્ભું નો હરિઃ પ્રલયવિક્રમમ્ ।
રણં કથં ચ કૃતવાન્ તદ્ગણૈરબુધો યથા ॥ ૩॥

એષ મે સંશયો ભૂયાંસ્તં છિન્ધિ કરુણાનિધે ।
ચરિતં બ્રૂહિ શમ્ભોસ્તુ ચિત્તોત્સાહકરં પ્રભો ॥ ૪॥

બ્રહ્મોવાચ ।
દ્વિજવર્ય શ઼ૃણુ પ્રીત્યા ચરિતં શશિમૌલિનઃ ।
યત્પૃચ્છતે કુર્વતશ્ચ સર્વસંશયહારકમ્ ॥ ૫॥

દધીચસ્ય મુનેઃ શાપાદ્ ભ્રષ્ટજ્ઞાનો હરિઃ પુરા ।
સામરો દક્ષયજ્ઞં વૈ ગતઃ ક્ષુવસહાયકૃત્ ॥ ૬॥

નારદ ઉવાચ ।
કિમર્થં શપ્તવાન્વિષ્ણું દધીચો મુનિસત્તમઃ ।
કોઽપકારઃ કૃતસ્તસ્ય હરિણા તત્સહાયિના ॥ ૭॥

બ્રહ્મોવાચ ।
સમુત્પન્નો મહાતેજા રાજા ક્ષુવ ઇતિ સ્મૃતઃ ।
અભૂન્મિત્રં દધીચસ્ય મુનીન્દ્રસ્ય મહાપ્રભોઃ ॥ ૮॥

ચિરાત્તપઃપ્રસઙ્ગાદ્વૈ વાદઃ ક્ષુવદધીચયોઃ ।
મહાનર્થકરઃ ખ્યાતસ્ત્રિલોકેષ્વભવત્પુરા ॥ ૯॥

તત્ર ત્રિવર્ણતઃ શ્રેષ્ઠો વિપ્ર એવ ન સંશયઃ ।
ઇતિ પ્રાહ દધીચો હિ શિવભક્તસ્તુ વેદવિત્ ॥ ૧૦॥

તચ્છ્રુત્વા વચનં તસ્ય દધીચસ્ય મહામુને ।
ક્ષુવઃ પ્રાહેતિ નૃપતિઃ શ્રીમદેન વિમોહિતઃ ॥ ૧૧॥

ક્ષુવ ઉવાચ ।
અષ્ટાનાં લોકપાલાનાં વપુર્ધારયતે નૃપઃ ।
તસ્માન્નૃપો વરિષ્ઠો હિ વર્ણાશ્રમપતિઃ પ્રભુઃ ॥ ૧૨॥

સર્વદેવમયો રાજા શ્રુતિઃ પ્રાહેતિ તત્પરા ।

મહતી દેવતા યા સા સોઽહમેવ તતો મુને ॥ ૧૩॥

તસ્માદ્વિપ્રાદ્વરો રાજા ચ્યાવનેય વિચાર્યતામ્ ।
નાવમન્તવ્ય એવાતઃ પૂજ્યોઽહં સર્વથા ત્વયા ॥ ૧૪॥

બ્રહ્મોવાચ ।
શ્રુત્વા તથા મતં તસ્ય ક્ષુવસ્ય મુનિસત્તમઃ ।
શ્રુતિસ્મૃતિવિરુદ્ધં તં ચુકોપાતીવ ભાર્ગવઃ ॥ ૧૫॥

અથ ક્રુદ્ધો મહાતેજા ગૌરવાચ્ચાત્મનો મુને ।
અતાડયત્ક્ષુવં મૂર્ધ્નિ દધીચો વામમુષ્ટિતઃ ॥ ૧૬॥

વજ્રેણ તં ચ ચિચ્છેદ દધીચં તાડિતઃ ક્ષુવઃ ।
જગર્જાતીવ સઙ્ક્રુદ્ધો બ્રહ્માણ્ડાધિપતિઃ કુધીઃ ॥ ૧૭॥

પપાત ભૂમૌ નિહતો તેન વજ્રેણ ભાર્ગવઃ ।
શુક્રં સસ્માર ક્ષુવકૃદ્ભાર્ગવસ્ય કુલન્ધરઃ ॥ ૧૮॥

શુક્રોઽથ સન્ધયામાસ તાડિતં ચ ક્ષુવેન તુ ।
યોગી દધીચસ્ય તદા દેહમાગત્ય સ દ્રુતમ્ ॥ ૧૯॥

સન્ધાય પૂર્વવદ્દેહં દધીચસ્યાહ ભાર્ગવઃ ।
શિવભક્તાગ્રણીર્મૃત્યઞ્જયવિદ્યાપ્રવર્તકઃ ॥ ૨૦॥

શુક્ર ઉવાચ ।
દધીચ તાત સમ્પૂજ્ય શિવં સર્વેશ્વરં પ્રભુમ્ ।
મહામૃત્યુઞ્જયં મન્ત્રં શ્રૌતમગ્ર્યં વદામિ તે ॥ ૨૧॥

ત્ર્યમ્બકં યજામહે ત્રૈલોક્યં પિતરં પ્રભુમ્ ।
ત્રિમણ્ડલસ્ય પિતરં ત્રિગુણસ્ય મહેશ્વરમ્ ॥ ૨૨॥

ત્રિતત્ત્વસ્ય ત્રિવહ્નેશ્ચ ત્રિધાભૂતસ્ય સર્વતઃ ।
ત્રિદિવસ્ય ત્રિબાહોશ્ચ ત્રિધાભૂતસ્ય સર્વતઃ ॥ ૨૩॥

ત્રિદેવસ્ય મહાદેવઃ સુગન્ધિં પુષ્ટિવર્દ્ધનમ્ ।
સર્વભૂતેષુ સર્વત્ર ત્રિગુણેષુ કૃતૌ યથા ॥ ૨૪॥

ઇન્દ્રિયેષુ તથાન્યેષુ દેવેષુ ચ ગણેષુ ચ ।
પુષ્પે સુગન્ધિવત્સૂરઃ સુગન્ધિરમરેશ્વરઃ ॥ ૨૫॥

પુષ્ટિશ્ચ પ્રકૃતેર્યસ્માત્પુરુષાદ્ વૈ દ્વિજોત્તમ ।

મહદાદિવિશેષાન્તવિકલ્પશ્ચાપિ સુવ્રત ॥ ૨૬॥

વિષ્ણોઃ પિતામહસ્યાપિ મુનીનાં ચ મહામુને ।
ઇન્દ્રિયાણાં ચ દેવાનાં તસ્માદ્ વૈ પુષ્ટિવર્ધનઃ ॥ ૨૭॥

તં દેવમમૃતં રુદ્રં કર્મણા તપસાપિ વા ।
સ્વાધ્યાયેન ચ યોગેન ધ્યાનેન ચ પ્રજાયતે ॥ ૨૮॥

સત્યેનાન્યેન સૂક્ષ્માગ્રાન્મૃત્યુપાશાદ્ભવઃ સ્વયમ્ ।
બન્ધમોક્ષકરો યસ્માદુર્વારુકમિવ પ્રભુઃ ॥ ૨૯॥

મૃતસઞ્જીવનીમન્ત્રો મમ સર્વોત્તમઃ સ્મૃતઃ ।
એવં જપપરઃ પ્રીત્યા નિયમેન શિવં સ્મરન્ ॥ ૩૦॥

જપ્ત્વા હુત્વાભિમન્ત્ર્યૈવં જલં પિબ દિવાનિશમ્ ।
શિવસ્ય સન્નિધૌ ધ્યાત્વા નાસ્તિ મૃત્યુભયં ક્વચિત્ ॥ ૩૧॥

કૃત્વા ન્યાસાદિકં સર્વં સમ્પૂજ્ય વિધિવચ્છિવમ્ ।
સંવિધાયેદં નિર્વ્યગ્રઃ શઙ્કરં ભક્તવત્સલમ્ ॥ ૩૨॥

ધ્યાનમસ્ય પ્રવક્ષ્યામિ યથા ધ્યાત્વા જપેન્મનુમ્ ।
સિદ્ધમન્ત્રો ભવેદ્ધીમાન્ યાવચ્છમ્ભુપ્રભાવતઃ ॥ ૩૩॥

હસ્તામ્ભોજયુગસ્થકુમ્ભયુગલાદુદ્ધૃત્ય તોયં શિરઃ
સિઞ્ચન્તં કરયોર્યુગેન દધતં સ્વાઙ્કે સકુમ્ભૌ કરૌ ।
અક્ષસ્રઙ્મૃગહસ્તમમ્બુજગતં મૂર્ધસ્થચન્દ્રસ્રવત્-
પીયૂષાર્દ્રતનું ભજે સગિરિજં ત્ર્યક્ષં ચ મૃત્યુઞ્જયમ્ ॥ ૩૪॥

બ્રહ્મોવાચ ।
ઉપદિશ્યેતિ શુક્રઃ તં દધીચિં મુનિસત્તમમ્ ।
સ્વસ્થાનમગમત્તાત સંસ્મરન્ શઙ્કરં પ્રભુમ્ ॥ ૩૫॥

તસ્ય તદ્વચનં શ્રુત્વા દધીચો હિ મહામુનિઃ ।
વનં જગામ તપસે મહાપ્રીત્યા શિવં સ્મરન્ ॥ ૩૬॥

તત્ર ગત્વા વિધાનેન મહામૃત્યુઞ્જયાભિધમ્ ।
તં મનું પ્રજપન્ પ્રીત્યા તપસ્તેપે શિવં સ્મરન્ ॥ ૩૭॥

તન્મનું સુચિરં જપ્ત્વા તપસારાધ્ય શઙ્કરમ્ ।
શિવં સન્તોષયામાસ મહામૃત્યુઞ્જયં હિ સઃ ॥ ૩૮॥

અથ શમ્ભુઃ પ્રસન્નાત્મા તજ્જપાદ્ભક્તવત્સલઃ ।
આવિર્બભૂવ પુરતસ્તસ્ય પ્રીત્યા મહામુને ॥ ૩૯॥

તં દૃષ્ટ્વા સ્વપ્રભું શમ્ભું સ મુમોદ મુનીશ્વરઃ ।
પ્રણમ્ય વિધિવદ્ભક્ત્યા તુષ્ટાવ સુકૃતાઞ્જલિઃ ॥ ૪૦॥

અથ પ્રીત્યા શિવસ્તાત પ્રસન્નશ્ચ્યાવનિં મુને ।
વરં બ્રૂહીતિ સ પ્રાહ સુપ્રસન્નેન ચેતસા ॥ ૪૧॥

તચ્છ્રુત્વા શમ્ભુવચનં દધીચો ભક્તસત્તમઃ ।
સાઞ્જલિર્નતકઃ પ્રાહ શઙ્કરં ભક્તવત્સલમ્ ॥ ૪૨॥

દધીચ ઉવાચ ।
દેવદેવ મહાદેવ મહ્યં દેહિ વરત્રયમ્ ।
વજ્રાસ્થિત્વમવધ્યત્વમદીનત્વં હિ સર્વતઃ ॥ ૪૩॥

બ્રહ્મોવાચ ।
તદુક્તવચનં શ્રુત્વા પ્રસન્નઃ પરમેશ્વરઃ ।
વરત્રયં દદૌ તસ્મૈ દધીચાય તથાસ્ત્વિતિ ॥ ૪૪॥

વરત્રયં શિવાત્પ્રાપ્ય સાનન્દશ્ચ મહામુનિઃ ।
ક્ષુવસ્થાનં જગામાશુ વેદમાર્ગે પ્રતિષ્ઠિતઃ ॥ ૪૫॥

પ્રાપ્યાવધ્યત્વમુગ્રાત્સ વજ્રાસ્થિત્વમદીનતામ્ ।
અતાડયચ્ચ રાજેન્દ્રં પાદમૂલેન મૂર્ધનિ ॥ ૪૬॥

ક્ષુવો દધીચં વજ્રેણ જઘાનોરસ્યથો નૃપઃ ।
ક્રોધં કૃત્વા વિશેષેણ વિષ્ણુગૌરવગર્વિતઃ ॥ ૪૭॥

નાભૂન્નાશાય તદ્વજ્રં દધીચસ્ય મહાત્મનઃ ।
પ્રભાવાત્પરમેશસ્ય ધાતૃપુત્રો વિસિસ્મિયે ॥ ૪૮॥

દૃષ્ટ્વાપ્યવધ્યત્વમદીનતાં ચ
વજ્રસ્ય ચાત્યન્તપરપ્રભાવમ્ ।
ક્ષુવો દધીચસ્ય મુનીશ્વરસ્ય
વિસિસ્મિયે ચેતસિ ધાતૃપુત્રઃ ॥ ૪૯॥

આરાધયામાસ હરિં મુકુન્દ-
મિન્દ્રાનુજં કાનનમાશુ ગત્વા ।

પ્રપન્નપાલશ્ચ પરાજિતો હિ
દધીચમૃત્યુઞ્જયસેવકેન ॥ ૫૦॥

પૂજયા તસ્ય સન્તુષ્ટો ભગવાન્ મધુસૂદનઃ ।
પ્રદદૌ દર્શનં તસ્મૈ દિવ્યં વૈ ગરુડધ્વજઃ ॥ ૫૧॥

દિવ્યેન દર્શનેનૈવ દૃષ્ટ્વા દેવં જનાર્દનમ્ ।
તુષ્ટાવ વાગ્ભિરિષ્ટાભિઃ પ્રણમ્ય ગરુડધ્વજમ્ ॥ ૫૨॥

સમ્પૂજ્ય ચૈવં ત્રિદશેશ્વરાદ્યૈઃ
સ્તુત્વા સ્તુતં દેવમજેયમીશમ્ ।
વિજ્ઞાપયામાસ નિરીક્ષ્ય ભક્ત્યા
જનાર્દનાય પ્રણિપત્ય મૂર્ધ્ના ॥ ૫૩॥

રાજોવાચ ।
ભગવન્ બ્રાહ્મણઃ કશ્ચિદ્દધીચ ઇતિ વિશ્રુતઃ ।
ધર્મવેત્તા વિનીતાત્મા સખા મમ પુરાભવત્ ॥ ૫૪॥

અવધ્યઃ સર્વદા સર્વૈઃ શઙ્કરસ્ય પ્રભાવતઃ ।
તમારાધ્ય મહાદેવં મૃત્યુઞ્જયમનામયમ્ ॥ ૫૫॥

સાવજ્ઞં વામપાદેન મમ મૂર્ધ્નિ સદસ્યપિ ।
તાડયામાસ વેગેન સ દધીચો મહાતપાઃ ॥ ૫૬॥

ઉવાચ માં ચ ગર્વેણ ન બિભેમીતિ સર્વતઃ ।
મૃત્યુઞ્જયાપ્તસુવરો ગર્વિતો હ્યતુલં હરે ॥ ૫૭॥

અથ જ્ઞાત્વા દધીચસ્ય હ્યવધ્યત્વં મહાત્મનઃ ।
સસ્મારાસ્ય મહેશસ્ય પ્રભાવમતુલં હરિઃ ॥ ૫૮॥

એવં સ્મૃત્વા હરિઃ પ્રાહ ક્ષુવં વિધિસુતં દ્રુતમ્ ।
વિપ્રાણાં નાસ્તિ રાજેન્દ્ર ભયમણ્વપિ કુત્રચિત્ ॥ ૫૯॥

વિશેષાદ્ રુદ્રભક્તાનાં ભયં નાસ્તિ ચ ભૂપતે ।
દુઃખં કરોતિ વિપ્રસ્ય શાપાર્થં સ સુરસ્ય મે ॥ ૬૦॥

ભવિતા તસ્ય શાપેન દક્ષયજ્ઞે સુરેશ્વરાત્ ।
વિનાશો મમ રાજેન્દ્ર પુનરુત્થાનમેવ ચ ॥ ૬૧॥

તસ્માત્સમેત્ય રાજેન્દ્ર સર્વયજ્ઞો ન ભૂયતે ।

કરોમિ યત્નં રાજેન્દ્ર દધીચવિજયાય તે ॥ ૬૨॥

શ્રુત્વા વાક્યં ક્ષુવઃ પ્રાહ તથાસ્ત્વિતિ હરેર્નૃપઃ ।
તસ્થૌ તત્રૈવ તત્પ્રીત્યા તત્કામોત્સુકમાનસઃ ॥ ૬૩॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે ક્ષુવદધીચવાદવર્ણનં નામાષ્ટત્રિંશોઽધ્યાયઃ ॥ ૨.૨.૩૮॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૩૯. એકોનચત્વારિંશોઽધ્યાયઃ । વિષ્ણુદધીચયુદ્ધવર્ણનમ્ ।

બ્રહ્મોવાચ ।
ક્ષુવસ્ય હિતકૃત્યેન દધીચસ્યાશ્રમં યયૌ ।
વિપ્રરૂપમથાસ્થાય ભગવાન્ ભક્તવત્સલઃ ॥ ૧॥

દધીચં પ્રાહ વિપ્રર્ષિમભિવન્દ્ય જગદ્ગુરુઃ ।
ક્ષુવકાર્યાર્થમુદ્યુક્તઃ શૈવેન્દ્રં છલમાશ્રિતઃ ॥ ૨॥

વિષ્ણુરુવાચ ।
ભો ભો દધીચ વિપ્રર્ષે ભવાર્ચનરતાવ્યય ।
વરમેકં વૃણે ત્વત્તસ્તદ્ભવાન્ દાતુમર્હતિ ॥ ૩॥

બ્રહ્મોવાચ ।
યાચિતો દેવદેવેન દધીચઃ શૈવસત્તમઃ ॥

ક્ષુવકાર્યાર્થિના શીઘ્રં જગાદ વચનં હરિમ્ ॥ ૪॥

દધીચ ઉવાચ ।
જ્ઞાતં તવેપ્સિતં વિપ્ર ક્ષુવકાર્યાર્થમાગતઃ ।
ભગવાન્ વિપ્રરૂપેણ માયી ત્વમસિ વૈ હરિઃ ॥ ૫॥

ભૂતં ભવિષ્યં દેવેશ વર્તમાનં જનાર્દન ।
જ્ઞાનં પ્રસાદાદ્ રુદ્રસ્ય સદા ત્રૈકાલિકં મમ ॥ ૬॥

ત્વાં જાનેઽહં હરિં વિષ્ણું દ્વિજત્વં ત્યજ સુવ્રત ।

આરાધિતોઽસિ ભૂપેન ક્ષુવેણ ખલબુદ્ધિના ॥ ૭॥

જાને તવૈવ ભગવન્ ભક્તવત્સલતાં હરે ।
છલં ત્યજ સ્વરૂપં હિ સ્વીકુરુ સ્મર શઙ્કરમ્ ॥ ૮॥

અસ્તિ ચેત્કસ્યચિદ્ભીતિર્ભવાર્ચનરતસ્ય મે ।
વક્તુમર્હસિ યત્નેન સત્યધારણપૂર્વકમ્ ॥ ૯॥

વદામિ ન મૃષા ક્વાપિ શિવસ્મરણસક્તધીઃ ।
ન બિભેમિ જગત્યસ્મિન્દેવદૈત્યાદિકાદપિ ॥ ૧૦॥

વિષ્ણુરુવાચ ।
ભયં દધીચ સર્વત્ર નષ્ટં ચ તવ સુવ્રત ।
ભવાર્ચનરતો યસ્માદ્ભવાન્સર્વજ્ઞ એવ ચ ॥ ૧૧॥

બિભેમીતિ સકૃદ્વક્તુમર્હસિ ત્વં નમસ્તવ ।
નિયોગાન્મમ રાજેન્દ્ર ક્ષુવાત્ પ્રતિસહાદહમ્ ॥ ૧૨॥

બ્રહ્મોવાચ ।
એવં શ્રુત્વાપિ તદ્વાક્યં વિષ્ણોઃ સ તુ મહામુનિઃ ।
વિહસ્ય નિર્ભયઃ પ્રાહ દધીચઃ શૈવસત્તમઃ ॥ ૧૩॥

દધીચ ઉવાચ ।
ન બિભેમિ સદા ક્વાપિ કુતશ્ચિદપિ કિઞ્ચન ।
પ્રભાવાદ્દેવદેવસ્ય શમ્ભોઃ સાક્ષાત્પિનાકિનઃ ॥ ૧૪॥

બ્રહ્મોવાચ ।
તતસ્તસ્ય મુનેઃ શ્રુત્વા વચનં કુપિતો હરિઃ ।
ચક્રમુદ્યમ્ય સન્તસ્થૌ દિધક્ષુર્મુનિસત્તમમ્ ॥ ૧૫॥

અભવત્કુણ્ઠિતં તત્ર વિપ્રે ચક્રં સુદારુણમ્ ।
પ્રભાવાચ્ચ તદીશસ્ય નૃપતેઃ સન્નિધાવપિ ॥ ૧૬॥

દૃષ્ટ્વા તં કુણ્ઠિતાસ્યં તચ્ચક્રં વિષ્ણું જગાદ હ ।
દધીચઃ સસ્મિતં સાક્ષાત્સદસદ્વ્યક્તિકારણમ્ ॥ ૧૭॥

દધીચ ઉવાચ ।
ભગવન્ ભવતા લબ્ધં પુરાતીવ સુદારુણમ્ ।
સુદર્શનમિતિ ખ્યાતં ચક્રં વિષ્ણોઃ પ્રયત્નતઃ ।

ભવસ્ય તચ્છુભં ચક્રં ન જિઘાંસતિ મામિહ ॥ ૧૮॥

ભગવાનથ ક્રુદ્ધોઽસ્મૈ સર્વાસ્ત્રાણિ ક્રમાદ્ધરિઃ ।
બ્રહ્માસ્ત્રાદ્યૈઃ શરૈશ્ચાસ્ત્રૈઃ પ્રયત્નં કર્તુમર્હસિ ॥ ૧૯॥

બ્રહ્મોવાચ ।
સ તસ્ય વચનં શ્રુત્વા દૃષ્ટ્વા નિર્વીર્યમાનુષમ્ ।
સસર્જાથ ક્રુધા તસ્મૈ સર્વાસ્ત્રાણિ ક્રમાદ્ધરિઃ ॥ ૨૦॥

ચક્રુર્દેવાસ્તતસ્તસ્ય વિષ્ણોઃસાહાય્યમાદરાત્ ।
દ્વિજેનૈકેન સંયોદ્ધું પ્રસૃતસ્ય વિબુદ્ધયઃ ॥ ૨૧॥

ચિક્ષિપુઃ સ્વાનિ સ્વાન્યાશુ શસ્ત્રાણ્યસ્ત્રાણિ સર્વતઃ ।
દધીચોપરિ વેગેન શક્રાદ્યા હરિપાક્ષિકાઃ ॥ ૨૨॥

કુશમુષ્ટિમથાદાય દધીચઃ સંસ્મરન્ શિવમ્ ।
સસર્જ સર્વદેવેભ્યો વજ્રાસ્થિઃ સર્વતો વશી ॥ ૨૩॥

શઙ્કરસ્ય પ્રભાવાત્તુ કુશમુષ્ટિર્મુનેર્હિ સા ।
દિવ્યં ત્રિશૂલમભવત્ કાલાગ્નિસદૃશં મુને ॥ ૨૪॥

દગ્ધું દેવાન્ મતિં ચક્રે સાયુધાન્ સશિખં ચ તત્ ।
પ્રજ્વલત્સર્વતઃ શૈવં યુગાન્તાગ્ન્યધિકપ્રભમ્ ॥ ૨૫॥

નારાયણેન્દ્રમુખ્યૈસ્તુ દેવૈઃ ક્ષિપ્તાનિ યાનિ ચ ।
આયુધાનિ સમસ્તાનિ પ્રણેમુસ્ત્રિશિખં ચ તત્ ॥ ૨૬॥

દેવાશ્ચ દુદ્રુવુઃ સર્વે ધ્વસ્તવીર્યા દિવૌકસઃ ।
તસ્થૌ તત્ર હરિર્ભીતઃ કેવલં માયિનાં વરઃ ॥ ૨૭॥

સસર્જ ભગવાન્ વિષ્ણુઃ સ્વદેહાત્પુરુષોત્તમઃ ।
આત્મનઃ સદૃશાન્ દિવ્યાન્ લક્ષલક્ષાયુતાન્ ગણાન્ ॥ ૨૮॥

તે ચાપિ યુયુધુસ્તત્ર વીરા વિષ્ણુગણાસ્તતઃ ।
મુનિનૈકેન દેવર્ષે દધીચેન શિવાત્મના ॥ ૨૯॥

તતો વિષ્ણુગણાંસ્તાન્વૈ નિયુધ્ય બહુશો રણે ।
દદાહ સહસા સર્વાન્ દધીચઃ શૈવસત્તમઃ ॥ ૩૦॥

તતસ્તદ્વિસ્મયાર્થાય દધીચસ્ય મુનેર્હરિઃ ।
વિશ્વમૂર્તિરભૂચ્છીઘ્રં મહામાયાવિશારદઃ ॥ ૩૧॥

તસ્ય દેહે હરેઃ સાક્ષાદપશ્યદ્ દ્વિજસત્તમઃ ।
દધીચો દેવતાદીનાં જીવાનાં ચ સહસ્રકમ્ ॥ ૩૨॥

ભૂતાનાં કોટયશ્ચૈવ ગણાનાં કોટયસ્તથા ।
અણ્ડાનાં કોટયશ્ચૈવ વિશ્વમૂર્તેસ્તનૌ તદા ॥ ૩૩॥

દૃષ્ટ્વૈતદખિલં તત્ર ચ્યાવનિઃ સતતં તદા ।
વિષ્ણુમાહ જગન્નાથં જગત્સ્તવમજં વિભુમ્ ॥ ૩૪॥

દધીચ ઉવાચ ।
માયાં ત્યજ મહાબાહો પ્રતિભાસો વિચારતઃ ।
વિજ્ઞાતાનિ સહસ્રાણિ દુર્વિજ્ઞેયાનિ માધવ ॥ ૩૫॥

મયિ પશ્ય જગત્સર્વં ત્વયા યુક્તમતન્દ્રિતઃ ।
બ્રહ્માણં ચ તથા રુદ્રં દિવ્યાં દૃષ્ટિં દદામિ તે ॥ ૩૬॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા દર્શયામાસ સ્વતનૌ નિખિલં મુનિઃ ।
બ્રહ્માણ્ડં ચ્યાવનિઃ શમ્ભુતેજસા પૂર્ણદેહકઃ ॥ ૩૭॥

તદાહ વિષ્ણું દેવેશં દધીચઃ શૈવસત્તમઃ ।
સંસ્મરન્ શઙ્કરં ચિત્તે વિહસન્ વિભયઃ સુધીઃ ॥ ૩૮॥

દધીચ ઉવાચ ।
માયયા ત્વનયા કિં વા મન્ત્રશક્ત્યાથ વા હરે ।
સત્કામનામિમાં કૃત્વા યોદ્ધુમર્હસિ યત્નતઃ ॥ ૩૯॥

બ્રહ્મોવાચ ।
એતચ્છ્રુત્વા મુનેસ્તસ્ય વચનં નિર્ભયસ્તદા ।
શમ્ભુતેજોમયં વિષ્ણુઃ ચુકોપાતીવ તં મુનિમ્ ॥ ૪૦॥

દેવાશ્ચ દુદ્રુવુર્ભૂયો દેવં નારાયણં ચ તમ્ ।
યોદ્ધુકામાશ્ચ મુનિના દધીચેન પ્રતાપિના ॥ ૪૧॥

એતસ્મિન્નન્તરે તત્રાગમન્મત્સઙ્ગમઃ ક્ષુવઃ ।
અવારયન્તં નિશ્ચેષ્ટં પદ્મયોનિં હરિં સુરાન્ ॥ ૪૨॥

નિશમ્ય વચનં મે હિ બ્રાહ્મણો ન વિનિર્જિતઃ ।

જગામ નિકટં તસ્ય પ્રણનામ મુનિં હરિઃ ॥ ૪૩॥

ક્ષુવો દીનતરો ભૂત્વા ગત્વા તત્ર મુનીશ્વરમ્ ।
દધીચમભિવાદ્યૈવ પ્રાર્થયામાસ વિક્લવઃ ॥ ૪૪॥

ક્ષુવ ઉવાચ ।
પ્રસીદ મુનિશાર્દૂલ શિવભક્તશિરોમણે ।
પ્રસીદ પરમેશાન દુર્લક્ષ્યો દુર્જનૈઃ સદા ॥ ૪૫॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચસ્તસ્ય રાજ્ઞઃ સુરગણસ્ય હિ ।
અનુજગ્રાહ તં વિપ્રો દધીચસ્તપસાં નિધિઃ ॥ ૪૬॥

અથ દૃષ્ટ્વા રમેશાદીન્ ક્રોધવિહ્વલિતો મુનિઃ ।
હૃદિ સ્મૃત્વા શિવં વિષ્ણું શશાપ ચ સુરાનપિ ॥ ૪૭॥

દધીચ ઉવાચ ।
રુદ્રકોપાગ્નિના દેવાઃ સદેવેન્દ્રા મુનીશ્વરાઃ ।
ધ્વસ્તા ભવન્તુ દેવેન વિષ્ણુના ચ સમં ગણૈઃ ॥ ૪૮॥

બ્રહ્મોવાચ ।
એવં શપ્ત્વા સુરાન્ પ્રેક્ષ્ય ક્ષુવમાહ તતો મુનિઃ ।
દેવૈશ્ચ પૂજ્યો રાજેન્દ્ર નૃપૈશ્ચૈવ દ્વિજોત્તમઃ ॥ ૪૯॥

બ્રાહ્મણા એવ રાજેન્દ્ર બલિનઃ પ્રભવિષ્ણવઃ ।
ઇત્યુક્ત્વા સ સ્ફુટં વિપ્રઃ પ્રવિવેશ નિજાશ્રમમ્ ॥ ૫૦॥

દધીચમભિવન્દ્યૈવ ક્ષુવો નિજગૃહં ગતઃ ।
વિષ્ણુર્જગામ સ્વં લોકં સુરૈઃ સહ યથાગતમ્ ॥ ૫૧॥

તદેવં તીર્થમભવત્ સ્થાનેશ્વર ઇતિ સ્મૃતમ્ ।
સ્થાનેશ્વરમનુપ્રાપ્ય શિવસાયુજ્યમાપ્નુયાત્ ॥ ૫૨॥

કથિતસ્તવ સઙ્ક્ષેપાદ્વાદઃ ક્ષુવદધીચયોઃ ।
નૃપામશાપયોસ્તાત બ્રહ્મવિષ્ણ્વોઃ શિવં વિના ॥ ૫૩॥

ય ઇદં કીર્તયેન્નિત્યં વાદં ક્ષુવદધીચયોઃ ।
જિત્વાપમૃત્યું દેહાન્તે બ્રહ્મલોકં પ્રયાતિ સઃ ॥ ૫૪॥

રણે યઃ કીર્તયિત્વેદં પ્રવિશેત્તસ્ય સર્વદા ।

મૃત્યુભીતિર્ભવેન્નૈવ વિજયી ચ ભવિષ્યતિ ॥ ૫૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે વિષ્ણુદધીચયુદ્ધવર્ણનં નામૈકોનચત્વારિંશોઽધ્યાયઃ ॥ ૨.૨.૩૯॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૪૦. ચત્વારિંશોઽધ્યાયઃ । બ્રહ્માદીનાં કૈલાસયાત્રા શિવદર્શનં ચ ।

નારદ ઉવાચ
વિધે વિધે મહાપ્રાજ્ઞ શૈવતત્ત્વપ્રદર્શક ।
શ્રાવિતા રમણીપ્રાયા શિવલીલા મહાદ્ભુતા ॥ ૧॥

વીરેણ વીરભદ્રેણ દક્ષયજ્ઞં વિનાશ્ય વૈ ।
કૈલાસાદ્રૌ ગતે તાત કિમભૂત્તદ્વદાધુના ॥ ૨॥

બ્રહ્મોવાચ ।
અથ દેવગણાઃ સર્વે મુનયશ્ચ પરાજિતાઃ ।
રુદ્રાનીકૈર્વિભિન્નાઙ્ગા મમ લોકં યયુસ્તદા ॥ ૩॥

સ્વયમ્ભુવે નમસ્કૃત્ય મહ્યં સંસ્તૂય ભૂરિશઃ ।
તત્સ્વક્લેશં વિષેશેણ કાર્ત્સ્ન્યેનૈવ ન્યવેદયન્ ॥ ૪॥

તદાકર્ણ્ય તતોઽહં વૈ પુત્રશોકેન પીડિતઃ ।
અચિન્તયમતિવ્યગ્રો દૂયમાનેન ચેતસા ॥ ૫॥

કિં કાર્યં કાર્યમદ્યાશુ મયા દેવસુખાવહમ્ ।
યેન જીવતુ દક્ષોઽસૌ મખઃ પૂર્ણો ભવેત્સુરઃ ॥ ૬॥

એવં વિચાર્ય બહુધા નાલભં શમહં મુને ।
વિષ્ણું તદા સ્મરન્ ભક્ત્યા જ્ઞાનમાપ તદોચિતમ્ ॥ ૭॥

અથ દેવૈશ્ચ મુનિભિર્વિષ્ણોર્લોકમહં ગતઃ ।
નત્વા નુત્વા ચ વિવિધૈઃ સ્તવૈર્દુઃખં ન્યવદેયમ્ ॥ ૮॥

યથાધ્વરઃ પ્રપૂર્ણઃ સ્યાદ્દેવ યજ્ઞકરશ્ચ સઃ ।

સુખિનઃ સ્યુઃ સુરાઃ સર્વે મુનયશ્ચ તથા કુરુ ॥ ૯॥

દેવદેવ રમાનાથ વિષ્ણો દેવસુખાવહ ।
વયં ત્વચ્છરણં પ્રાપ્તાઃ સદેવમુનયો ધ્રુવમ્ ॥ ૧૦॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય વચો મે હિ બ્રહ્મણઃ સ રમેશ્વરઃ ।
પ્રત્યુવાચ શિવં સ્મૃત્વા શિવાત્મા દીનમાનસઃ ॥ ૧૧॥

વિષ્ણુરુવાચ ।
તેજીયસિ ન સા ભૂતા કૃતાગસિ બુભૂષતામ્ ।
તત્ર ક્ષેમાય બહુધા બુભૂષા હિ કૃતાગસામ્ ॥ ૧૨॥

કૃતપાપાઃ સુરાઃ સર્વે શિવે હિ પરમેશ્વરે ।
પરાદદુર્યજ્ઞભાગં તસ્ય શમ્ભોર્વિધે યતઃ ॥ ૧૩॥

પ્રસાદયધ્વં સર્વે હિ યૂયં શુદ્ધેન ચેતસા ।
અથાપરપ્રસાદં તં ગૃહીતાઙ્ઘ્રિયુગં શિવમ્ ॥ ૧૪॥

યસ્મિન્ પ્રકુપિતે દેવે વિનશ્યત્યખિલં જગત્ ।
સલોકપાલયજ્ઞસ્ય શાસનાજ્જીવિતં દ્રુતમ્ ॥ ૧૫॥

તમાશુ પ્રિયયા દેવં વિહીનં ચ દુરુક્તિભિઃ ।
ક્ષમાપયધ્વં હૃદ્વિદ્ધં દક્ષેણ સુદુરાત્મના ॥ ૧૬॥

અયમેવ મહોપાયસ્તચ્છાન્ત્યૈ કેવલં વિધે ।
શમ્ભોઃ સન્તુષ્ટયે મન્યે સત્યમેવોદિતં મયા ॥ ૧૭॥

નાહં ન ત્વં સુરાશ્ચાન્યે મુનયોઽપિ તનૂભૃતઃ ।
યસ્ય તત્ત્વં પ્રમાણં ચ ન વિદુર્બલવીર્યયોઃ ॥ ૧૮॥

આત્મતન્ત્રસ્ય તસ્યાપિ પરસ્ય પરમાત્મનઃ ।
ક ઉપાયં વિધિત્સેદ્વૈ પરં મૂઢ વિરોધિનમ્ ॥ ૧૯॥

ચલિષ્યેઽહમપિ બ્રહ્મન્ સર્વૈઃ સાર્ધં શિવાલયમ્ ।
ક્ષમાપયામિ ગિરિશં કૃતાગશ્ચ શિવે ધ્રુવમ્ ॥ ૨૦॥

બ્રહ્મોવાચ ।
ઇત્થમાદિશ્ય વિષ્ણુર્માં બ્રહ્માણં સામરાદિકમ્ ।
સાર્ધં દેવૈર્મતિં ચક્રે તદ્ગિરૌ ગમનાય સઃ ॥ ૨૧॥

યયૌ સ્વધિષ્ણ્યનિલયં શિવસ્યાદ્રિવરં શુભમ્ ।
કૈલાસં સામરમુનિપ્રજેશાદિમયો હરિઃ ॥ ૨૨॥

અતિપ્રિયં પ્રભોર્નિત્યં સુજુષ્ટં કિન્નરાદિભિઃ ।
નરેતરૈરપ્સરોભિર્યોગસિદ્ધૈર્મહોન્નતમ્ ॥ ૨૩॥

નાનામણિમયૈઃ શૃઙ્ગૈઃ શોભમાનં સમન્તતઃ ।
નાનાધાતુવિચિત્રં વૈ નાનાદ્રુમલતાકુલમ્ ॥ ૨૪॥

નાનામૃગગણાકીર્ણં નાનાપક્ષિસમન્વિતમ્ ।
નાનાજલપ્રસ્રવણૈરમરૈઃ સિદ્ધયોષિતામ્ ॥ ૨૫॥

રમણૈર્વિહરન્તીનાં નાનાકન્દરસાનુભિઃ ।
દ્રુમજાતિભિરન્યાભી રાજિતં રાજતપ્રભમ્ ॥ ૨૬॥

વ્યાઘ્રાદિભિર્મહાસત્ત્વૈર્નિર્ઘુષ્ટં ક્રૂરતોજ્ઝિતમ્ ।
સર્વશોભાન્વિતં દિવ્યં મહાવિસ્મયકારકમ્ ॥ ૨૭॥

પર્યસ્તં ગઙ્ગયા સત્યા સ્થાનપુણ્યતરોદયા ।
સર્વપાવનસઙ્કુર્ત્ર્યા વિષ્ણુપદ્યા સુનિર્મલમ્ ॥ ૨૮॥

એવંવિધં ગિરિં દૃષ્ટ્વા કૈલાસાખ્યં શિવપ્રિયમ્ ।
યયુસ્તે વિસ્મયં દેવા વિષ્ણ્વાદ્યાઃ સમુનીશ્વરાઃ ॥ ૨૯॥

તત્સમીપેઽલકાં રમ્યાં દદૃશુર્નામ તે પુરીમ્ ।
કુબેરસ્ય મહાદિવ્યાં રુદ્રમિત્રસ્ય નિર્જરાઃ ॥ ૩૦॥

વનં સૌગન્ધિકં ચાપિ દદૃશુસ્તત્સમીપતઃ ।
સર્વદ્રુમાન્વિતં દિવ્યં યત્ર તન્નાદમદ્ભુતમ્ ॥ ૩૧॥

તદ્બાહ્યતસ્તસ્ય દિવ્યે સરિતાવતિપાવને ।
નન્દા ચાલકનન્દા ચ દર્શનાત્પાપહારિકે ॥ ૩૨॥

પપુઃ સુરસ્ત્રિયો નિત્યમવગૂહ્ય સ્વલોકતઃ ।
વિગાહ્ય પુમ્ભિસ્તાસ્તત્ર ક્રીડન્તિ રતિકર્શિતાઃ ॥ ૩૩॥

હિત્વા યક્ષેશ્વરપુરીં વનં સૌગન્ધિકં ચ યત્ ।
ગચ્છન્તસ્તે સુરા આરાદ્દદૃશુઃ શાઙ્કરં વટમ્ ॥ ૩૪॥

પર્યક્કૃતાચલચ્છાયં પાદોનવિટપાયતમ્ ।
શતયોજનકોત્સેધં નિર્નીડં તાપવર્જિતમ્ ॥ ૩૫॥

મહાપુણ્યવતાં દૃશ્યં સુરમ્યં ચાતિપાવનમ્ ।
શમ્ભુયોગસ્થલં દિવ્યં યોગિસેવ્યં મહોત્તમમ્ ॥ ૩૬॥

મુમુક્ષુશરણે તસ્મિન્ મહાયોગમયે વટે ।
આસીનં દદૃશુઃ સર્વે શિવં વિષ્ણ્વાદયઃ સુરાઃ ॥ ૩૭॥

વિધિપુત્રૈર્મહાસિદ્ધૈઃ શિવભક્તિરતૈઃ સદા ।
ઉપાસ્યમાનં સમુદા શાન્તૈઃ સંશાન્તવિગ્રહૈઃ ॥ ૩૮॥

તથા સખ્યા કુબેરેણ ભર્ત્રા ગુહ્યકરક્ષસામ્ ।
સેવ્યમાનં વિશેષેણ સ્વગણૈર્જ્ઞાતિભિઃ સદા ॥ ૩૯॥

તાપસાભીષ્ટસદ્રૂપં બિભ્રતં પરમેશ્વરમ્ ।
વાત્સલ્યાદ્વિશ્વસુહૃદં ભસ્માદિસુવિરાજિતમ્ ॥ ૪૦॥

મુને તુભ્યં પ્રવોચન્તં પૃચ્છતે જ્ઞાનમુત્તમમ્ ।
કુશાસને સૂપવિષ્ટં સર્વેષાં શ઼ૃણ્વતાં સતામ્ ॥ ૪૧॥

કૃત્વોરૌ દક્ષિણે સવ્યં ચરણં ચૈવ જાનુનિ ।
બાહુપ્રકોષ્ઠાક્ષમાલં સ્થિતં સત્તર્કમુદ્રયા ॥ ૪૨॥

એવંવિધં શિવં દૃષ્ટ્વા તદા વિષ્ણ્વાદયઃ સુરાઃ ।
પ્રણેમુસ્ત્વરિતં સર્વે કરૌ બધ્વા વિનમ્રકાઃ ॥ ૪૩॥

ઉપલભ્યાગતં રુદ્રો મયા વિષ્ણું સતાં ગતિઃ ।
ઉત્થાય ચક્રે શિરસાભિવન્દનમપિ પ્રભુઃ ॥ ૪૪॥

વન્દિતાઙ્ઘ્રિસ્તદા સર્વૈર્દિવ્યૈર્વિષ્ણ્વાદિભિઃ શિવઃ ।
નનામાથ યથા વિષ્ણુઃ કશ્યપં લોકસદ્ગતિઃ ॥ ૪૫॥

સુરસિદ્ધગણાધીશમહર્ષિસુનમસ્કૃતમ્ ।
સમુવાચ સુરૈર્વિષ્ણું કૃતસન્નતિમાદરાત્ ॥ ૪૬॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે શિવદર્શનવર્ણનં નામ ચત્વારિંશોઽધ્યાયઃ ॥ ૨.૨.૪૦॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૪૧. એકચત્વારિંશોઽધ્યાયઃ । દેવૈઃ કૃતા શિવસ્તુતિઃ ।

વિષ્ણ્વાદય ઊચુઃ ।
દેવદેવ મહાદેવ લૌકિકાચારકૃત્પ્રભો ।
બ્રહ્મ ત્વામીશ્વરં શમ્ભું જાનીમઃ કૃપયા તવ ॥ ૧॥

કિં મોહયસિ નસ્તાત માયયા પરયા તવ ।
દુર્જ્ઞેયયા સદા પુંસાં મોહિન્યા પરમેશ્વર ॥ ૨॥ ।

પ્રકૃતેઃ પુરુષસ્યાપિ જગતો યોનિબીજયોઃ ।
પરબ્રહ્મ પરસ્ત્વં ચ મનોવાચામગોચરઃ ॥ ૩॥

ત્વમેવ વિશ્વં સૃજસિ પાસ્યત્સિ નિજતન્ત્રતઃ ।
સ્વરૂપાં શિવશક્તિં હિ ક્રીડન્નૂર્ણપટો યથા ॥ ૪॥

ત્વમેવ ક્રતુમીશાન સસર્જિથ દયાપરઃ ।
દક્ષેણ સૂત્રેણ વિભો સદા ત્રય્યભિપત્તયે ॥ ૫॥

ત્વયૈવ લોકેઽવસિતાઃ સેતવો યાન્ ધૃતવ્રતાઃ ।
શુદ્ધાન્ શ્રદ્દધતે વિપ્રા વેદમાર્ગવિચક્ષણાઃ ॥ ૬॥

કર્તુસ્ત્વં મઙ્ગલાનાં હિ સ્વપરં તુ સુખે વિભો ।
અમઙ્ગલાનાં ચ હિતં મિશ્રં વાથ વિપર્યયમ્ ॥ ૭॥

સર્વકર્મફલાનાં હિ સદા દાતા ત્વમેવ હિ ।
સર્વે હિ પ્રોક્તાઃ પશવસ્તત્પતિસ્ત્વં શ્રુતિશ્રુતઃ ॥ ૮॥

પૃથગ્ધિયઃ કર્મદૃશોઽરુન્તુદાશ્ચ દુરાશયાઃ ।
વિતુદન્તિ પરાન્ મૂઢા દુરુક્તૈર્મત્સરાન્વિતાઃ ॥ ૯॥

તેષાં દૈવવધાનાં ભો ભૂયાત્ત્વચ્ચ વધો વિભો ।
ભગવન્પરમેશાન કૃપાં કુરુ પરપ્રભો ॥ ૧૦॥

નમો રુદ્રાય શાન્તાય બ્રહ્મણે પરમાત્મને ।
કપર્દિને મહેશાય જ્યોત્સ્નાય મહતે નમઃ ॥ ૧૧॥

ત્વં હિ વિશ્વસૃજાં સ્રષ્ટા ધાતા ત્વં પ્રપિતામહઃ ।
ત્રિગુણાત્મા નિર્ગુણશ્ચ પ્રકૃતેઃ પુરુષાત્પરઃ ॥ ૧૨॥

નમસ્તે નીલકણ્ઠાય વેધસે પરમાત્મને ।
વિશ્વાય વિશ્વબીજાય જગદાનન્દહેતવે ॥ ૧૩॥

ઓઙ્કારસ્ત્વં વષટ્કારઃ સર્વારમ્ભપ્રવર્તકઃ ।
હન્તકારઃ સ્વધાકારો હવ્યકવ્યાન્નભુક્ સદા ॥ ૧૪॥

કૃતઃ કથં યજ્ઞભઙ્ગસ્ત્વયા ધર્મપરાયણ ।
બ્રહ્મણ્યસ્ત્વં મહાદેવ કથં યજ્ઞહનો વિભો ॥ ૧૫॥

બ્રાહ્મણાનાં ગવાં ચૈવ ધર્મસ્ય પ્રતિપાલકઃ ।
શરણ્યોઽસિ સદાનન્ત્યઃ સર્વેષાં પ્રાણિનાં પ્રભો ॥ ૧૬॥

નમસ્તે ભગવન્ રુદ્ર ભાસ્કરામિતતેજસે ।
નમો ભવાય દેવાય રસાયામ્બુમયાય તે ॥ ૧૭॥

શર્વાય ક્ષિતિરૂપાય સદા સુરભિણે નમઃ ।
રુદ્રાયાગ્નિસ્વરૂપાય મહાતેજસ્વિને નમઃ ॥ ૧૮॥

ઈશાય વાયવે તુભ્યં સંસ્પર્શાય નમો નમઃ ।
પશૂનાં પતયે તુભ્યં યજમાનાય વેધસે ॥ ૧૯॥

ભીમાય વ્યોમરૂપાય શબ્દમાત્રાય તે નમઃ ।
મહાદેવાય સોમાય પ્રવૃત્તાય નમોઽસ્તુ તે ॥ ૨૦॥

ઉગ્રાય સૂર્યરૂપાય નમસ્તે કર્મયોગિને ।
નમસ્તે કાલકાલાય નમસ્તે રુદ્રમન્યવે ॥ ૨૧॥

નમઃ શિવાય ભીમાય શઙ્કરાય શિવાય તે ।
ઉગ્રોઽસિ સર્વભૂતાનાં નિયન્તા યચ્છિવોઽસિ નઃ ॥ ૨૨॥

મયસ્કરાય વિશ્વાય બ્રહ્મણે હ્યાર્તિનાશિને ।
અમ્બિકાપતયે તુભ્યમુમાયાઃ પતયે નમઃ ॥ ૨૩॥

શર્વાય સર્વરૂપાય પુરુષાય પરાત્મને ।
સદસદ્વ્યક્તિહીનાય મહતઃ કારણાય તે ॥ ૨૪॥

જાતાય બહુધા લોકે પ્રભૂતાય નમો નમઃ ।
નીલાય નીલરુદ્રાય કદ્રુદ્રાય પ્રચેતસે ॥ ૨૫॥

મીઢુષ્ટમાય દેવાય શિપિવિષ્ટાય તે નમઃ ।
મહીયસે નમસ્તુભ્યં હન્ત્રે દેવારિણાં સદા ॥ ૨૬॥

તારાય ચ સુતારાય તરુણાય સુતેજસે ।
હરિકેશાય દેવાય મહેશાય નમો નમઃ ॥ ૨૭॥

દેવાનાં શમ્ભવે તુભ્યં વિભવે પરમાત્મને ।
પરમાય નમસ્તુભ્યં કાલકણ્ઠાય તે નમઃ ॥ ૨૮॥

હિરણ્યાય પરેશાય હિરણ્યવપુષે નમઃ ।
ભીમાય ભીમરૂપાય ભીમકર્મરતાય ચ ॥ ૨૯॥

ભસ્મદિગ્ધશરીરાય રુદ્રાક્ષાભરણાય ચ ।
નમો હ્રસ્વાય દીર્ઘાય વામનાય નમોઽસ્તુ તે ॥ ૩૦॥

દૂરેવધાય તે દેવાગ્રેવધાય નમો નમઃ ।
ધન્વિને શૂલિને તુભ્યં ગદિને હલિને નમઃ ॥ ૩૧॥

નાનાયુધધરાયૈવ દૈત્યદાનવનાશિને ।
સદ્યાય સદ્યરૂપાય સદ્યોજાતાય વૈ નમઃ ॥ ૩૨॥

વામાય વામરૂપાય વામનેત્રાય તે નમઃ ।
અઘોરાય પરેશાય વિકટાય નમો નમઃ ॥ ૩૩॥

તત્પુરુષાય નાથાય પુરાણપુરુષાય ચ ।
પુરુષાર્થપ્રદાનાય વ્રતિને પરમેષ્ઠિને ॥ ૩૪॥

ઈશાનાય નમસ્તુભ્યમીશ્વરાય નમો નમઃ ।
બ્રહ્મણે બ્રહ્મરૂપાય નમઃ સાક્ષાત્પરાત્મને ॥ ૩૫॥

ઉગ્રોઽસિ સર્વદુષ્ટાનાં નિયન્તાસિ શિવોઽસિ નઃ ।
કાલકૂટાશિને તુભ્યં દેવાદ્યવનકારિણે ॥ ૩૬॥

વીરાય વીરભદ્રાય રક્ષદ્વીરાય શૂલિને ।
મહાદેવાય મહતે પશૂનાં પતયે નમઃ ॥ ૩૭॥

વીરાત્મને સુવિદ્યાય શ્રીકણ્ઠાય પિનાકિને ।
નમોઽનન્તાય સૂક્ષ્માય નમસ્તે મૃત્યુમન્યવે ॥ ૩૮॥

પરાય પરમેશાય પરાત્પરતરાય તે ।
પરાત્પરાય વિભવે નમસ્તે વિશ્વમૂર્તયે ॥ ૩૯॥

નમો વિષ્ણુકલત્રાય વિષ્ણુક્ષેત્રાય ભાનવે ।

ભૈરવાય શરણ્યાય ત્ર્યમ્બકાય વિહારિણે ॥ ૪૦॥

મૃત્યુઞ્જયાય શોકાય ત્રિગુણાય ગુણાત્મને ।
ચન્દ્રસૂર્યાગ્નિનેત્રાય સર્વકારણસેતવે ॥ ૪૧॥

ભવતા હિ જગત્સર્વં વ્યાપ્તં સ્વેનૈવ તેજસા ।
પરબ્રહ્મ નિર્વિકારી ચિદાનન્દઃ પ્રકાશવાન્ ॥ ૪૨॥

બ્રહ્મવિષ્ણ્વિન્દ્રચન્દ્રાદિપ્રમુખાઃસકલાઃ સુરાઃ ।
મુનયશ્ચાપરે ત્વત્તઃ સમ્પ્રસૂતા મહેશ્વર ॥ ૪૩॥

યતો બિભર્ષિ સકલં વિભજ્ય તનુમષ્ટધા ।
અષ્ટમૂર્તિરિતીશશ્ચ ત્વમાદ્યઃ કરુણામયઃ ॥ ૪૪॥

ત્વદ્ભયાદ્વાતિ વાતોઽયં દહત્યગ્નિર્ભયાત્તવ ।
સૂર્યસ્તપતિ તે ભીત્યા મૃત્યુર્ધાવતિ સર્વતઃ ॥ ૪૫॥

દયાસિન્ધો મહેશાન પ્રસીદ પરમેશ્વર ।
રક્ષ રક્ષ સદૈવાસ્માન્ યસ્માન્નષ્ટાન્ વિચેતસઃ ॥ ૪૬॥

રક્ષિતાઃ સતતં નાથ ત્વયૈવ કરુણાનિધે ।
નાનાપદ્ભ્યો વયં શમ્ભો તથૈવાદ્ય પ્રપાહિ નઃ ॥ ૪૭॥

યજ્ઞસ્યોદ્ધરણં નાથ કુરુ શીઘ્રં પ્રસાદકૃત્ ।
અસમાપ્તસ્ય દુર્ગેશ દક્ષસ્ય ચ પ્રજાપતેઃ ॥ ૪૮॥

ભગોઽક્ષિણી પ્રપદ્યેત યજમાનશ્ચ જીવતુ ।
પૂષ્ણો દન્તાશ્ચ રોહન્તુ ભૃગોઃ શ્મશ્રૂણિ પૂર્વવત્ ॥ ૪૯॥

ભવતાનુગૃહીતાનાં દેવાદીનાં ચ સર્વશઃ ।
આરોગ્યં ભગ્નગાત્રાણાં શઙ્કર ત્વાયુધાશ્મભિઃ ॥ ૫૦॥

પૂર્ણભાગોઽસ્તુ તે નાથાવશિષ્ટેઽધ્વરકર્મણિ ।
રુદ્રભાગેન યજ્ઞસ્તે કલ્પિતો નાન્યથા ક્વચિત્ ॥ ૫૧॥

ઇત્યુક્ત્વા સપ્રજેશશ્ચ રમેશશ્ચ કૃતાઞ્જલિઃ ।
દણ્ડવત્પતિતો ભૂમૌ ક્ષમાપયિતુમુદ્યતઃ ॥ ૫૨॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે દેવસ્તુતિવર્ણનં નામૈકચત્વારિંશોઽધ્યાયઃ ॥ ૨.૨.૪૧॥

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥

॥ શ્રીશિવમહાપુરાણમ્ ॥

॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૪૨. દ્વિચત્વારિંશોઽધ્યાયઃ । દક્ષદુઃખનિરાકરણમ્ ।

બ્રહ્મોવાચ ।
શ્રીબ્રહ્મેશપ્રજેશેન સદૈવ મુનિના ચ વૈ ।
અનુનીતઃ શમ્ભુરાસીત્પ્રસન્નઃ પરમેશ્વરઃ ॥ ૧॥

આશ્વાસ્ય દેવાન્ વિષ્ણ્વાદીન્ વિહસ્ય કરુણાનિધિઃ ।
ઉવાચ પરમેશાનઃ કુર્વન્ પરમનુગ્રહમ્ ॥ ૨॥

શ્રીમહાદેવ ઉવાચ ।
શૃણુતં સાવધાનેન મમ વાક્યં સુરોત્તમૌ ।
યથાર્થં વચ્મિ વાં તાત વાં ક્રોધં સર્વદાસહમ્ ॥ ૩॥

નાઘં તનૌ તુ બાલાનાં વર્ણયે નાનુચિન્તયે ।
મમ માયાભિભૂતાનાં દણ્ડસ્તત્ર ધૃતો મયા ॥ ૪॥

દક્ષસ્ય યજ્ઞભઙ્ગોઽયં ન કૃતશ્ચ મયા ક્વચિત્ ।
પરં દ્વેષ્ટિ પરેષાં યદાત્મનસ્તદ્ભવિષ્યતિ ॥ ૫॥

પરેષાં ક્લેદનં કર્મ ન કાર્યં તત્ કદાચન ।
પરં દ્વેષ્ટિ પરેષાં યદાત્મનસ્તદ્ભવિષ્યતિ ॥ ૬॥

દક્ષસ્ય યજ્ઞશીર્ષ્ણો હિ ભવત્વજમુખં શિરઃ ।
મિત્રનેત્રેણ સમ્પશ્યેદ્યજ્ઞભાગં ભગઃ સુરઃ ॥ ૭॥

પૂષાભિધઃ સુરસ્તાત દદ્ભિર્જક્ષતુ પિષ્ટભુક્ ।
યાજમાનૈર્ભગ્નદન્તઃ સત્યમેતન્મયોદિતમ્ ॥ ૮॥

બસ્તશ્મશ્રુર્ભવેદેવ ભૃગુર્મમ વિરોધકૃત્ ।
દેવાઃ પ્રકૃતિસર્વાઙ્ગા યે મ ઉચ્છેષણં દદુઃ ॥ ૯॥

બાહુભ્યામશ્વિનૌ પૂષ્ણો હસ્તાભ્યાં કૃતવાહકઃ ।
ભવન્ત્વધ્વર્યવશ્ચાન્યે ભવત્પ્રીત્યા મયોદિતમ્ ॥ ૧૦॥

બ્રહ્મોવાચ ।
ઇત્યુક્ત્વા પરમેશાનો વિરરામ દયાન્વિતઃ ।
ચરાચરપતિર્દેવઃ સમ્રાટ્ વેદાનુસારકૃત્ ॥ ૧૧॥

તદા સર્વે સુરાદ્યાસ્તે શ્રુત્વા શઙ્કરભાષિતમ્ ।
સાધુ સાધ્વિતિ સમ્પ્રોચુઃ પરિતુષ્ટાઃ સવિષ્ણવજાઃ ॥ ૧૨॥

તતઃ શમ્ભું સમામન્ત્ર્ય મયા વિષ્ણુઃ સુરર્ષિભિઃ ।
ભૂયસ્તદ્દેવયજનં યયૌ ચ પરયા મુદા ॥ ૧૩॥

એવં તેષાં પ્રાર્થનયા વિષ્ણુપ્રભૃતિભિઃ સુરૈઃ ।
યયૌ કનખલં શમ્ભુર્યજ્ઞવાટં પ્રજાપતેઃ ॥ ૧૪॥

રુદ્રસ્તદા દદર્શાથ વીરભદ્રેણ યત્કૃતમ્ ।
પ્રધ્વંસં તં ક્રતોસ્તત્ર દેવર્ષીણાં વિશેષતઃ ॥ ૧૫॥

સ્વહા સ્વધા તથા પૂષા તુષ્ટિર્ધૃતિઃ સરસ્વતી ।
તથાન્યે ઋષયઃ સર્વે પિતરશ્ચાગ્નયસ્તથા ॥ ૧૬॥

યેઽન્યે ચ બહવસ્તત્ર યક્ષગન્ધર્વરાક્ષસાઃ ।
ત્રોટિતા લુઞ્ચિતાશ્ચૈવ મૃતાઃ કેચિદ્રણાજિરે ॥ ૧૭॥

યજ્ઞં તથાવિધં દૃષ્ટ્વા સમાહૂય ગણાધિપમ્ ।
વીરભદ્રં મહાવીર્યમુવાચ પ્રહસન્ પ્રભુઃ ॥ ૧૮॥

વીરભદ્ર મહાબાહો કિં કૃતં કર્મ તે ત્વિદમ્ ।
મહાન્ દણ્ડો ધૃતસ્તાત દેવર્ષ્યાદિષુ સત્વરમ્ ॥ ૧૯॥

દક્ષમાનય શીઘ્રં ત્વં યેનેદં કૃતમીદૃશમ્ ।
યજ્ઞો વિલક્ષણસ્તાત યસ્યેદં ફલમીદૃશમ્ ॥ ૨૦॥

બ્રહ્મોવાચ ।
એવમુક્તઃ શઙ્કરેણ વીરભદ્રસ્ત્વરાન્વિતઃ ।
કબન્ધમાનયિત્વાગ્રે તસ્ય શમ્ભોરથાક્ષિપત્ ॥ ૨૧॥

વિશિરસ્કં ચ તં દૃષ્ટ્વા શઙ્કરો લોકશઙ્કરઃ ।
વીરભદ્રમુવાચાગ્રે વિહસન્ મુનિસત્તમ ॥ ૨૨॥

શિરઃ કુત્રેતિ તેનોક્તં વીરભદ્રોઽબ્રવીત્પ્રભુઃ ।
મયા શિરો હુતં ચાગ્નૌ તદાનીમેવ શઙ્કર ॥ ૨૩॥

ઇતિ શ્રુત્વા વચસ્તસ્ય વીરભદ્રસ્ય શઙ્કરઃ ।
દેવાન્ તથાજ્ઞાપત્પ્રીત્યા યદુક્તં તત્પુરા પ્રભુઃ ॥ ૨૪॥

વિધાય કાર્ત્સ્ન્યેન ચ તદ્યદાહ ભગવાન્ ભવઃ ।
મયા વિષ્ણ્વાદયઃ સર્વે ભૃગ્વાદીનથ સત્વરમ્ ॥ ૨૫॥

અથ પ્રજાપતેસ્તસ્ય સવનીયપશોઃ શિરઃ ।
બસ્તસ્ય સન્દધુઃ શમ્ભોઃ કાયેનારં સુશાસનાત્ ॥ ૨૬॥

સન્ધીયમાને શિરસિ શમ્ભુસદૃષ્ટિવીક્ષિતઃ ।
સદ્યઃ સુપ્ત ઇવોત્તસ્થૌ લબ્ધપ્રાણઃ પ્રજાપતિઃ ॥ ૨૭॥

ઉત્થિતશ્ચાગ્રતઃ શમ્ભું દદર્શ કરુણાનિધિમ્ ।
દક્ષઃ પ્રીતમતિઃ પ્રીત્યા સંસ્થિતઃ સુપ્રસન્નધીઃ ॥ ૨૮॥

પુરા હરમહાદ્વેષકલિલાત્માભવદ્ધિ સઃ ।
શિવાવલોકનાત્ સદ્યઃ શરચ્ચન્દ્ર ઇવામલઃ ॥ ૨૯॥

ભવં સ્તોતુમનાઃ સોઽથ નાશક્નોદનુરાગતઃ ।
ઉત્કણ્ઠાવિકલત્વાચ્ચ સમ્પરેતાં સુતાં સ્મરન્ ॥ ૩૦॥

અથ દક્ષઃ પ્રસન્નાત્મા શિવં લજ્જાસમન્વિતઃ ।
તુષ્ટાવ પ્રણતો ભૂત્વા શઙ્કરં લોકશઙ્કરમ્ ॥ ૩૧॥

દક્ષ ઉવાચ ।
નમામિ દેવ વરદં વરેણ્યં
મહેશ્વરં જ્ઞાનનિધિં સનાતનમ્ ।
નમામિ દેવાધિપતીશ્વરં હરં
સદા સુખાઢ્યં જગદેકબાન્ધવમ્ ॥ ૩૨॥

નમામિ વિશ્વેશ્વર વિશ્વરૂપં
પુરાતનં બ્રહ્મનિજાત્મરૂપમ્ ।
નમામિ શર્વં ભવભાવભાવં
પરાત્પરં શઙ્કરમાનતોઽસ્મિ ॥ ૩૩॥

દેવદેવ મહાદેવ કૃપાં કુરુ નમોઽસ્તુ તે ।
અપરાધં ક્ષમસ્વાદ્ય મમ શમ્ભો કૃપાનિધે ॥ ૩૪॥

અનુગ્રહઃ કૃતસ્તે હિ દણ્ડવ્યાજેન શઙ્કર ।

ખલોઽહં મૂઢધીર્દેવ જ્ઞાતં તત્ત્વં મયા ન તે ॥ ૩૫॥

અદ્ય જ્ઞાતં મયા તત્ત્વં સર્વોપરિ ભવાન્મતઃ ।
વિષ્ણુબ્રહ્માદિભિઃ સેવ્યો વેદવેદ્યો મહેશ્વરઃ ॥ ૩૬॥

સાધૂનાં કલ્પવૃક્ષસ્ત્વં દુષ્ટાનાં દણ્ડધૃક્ સદા ।
સ્વતન્ત્રઃ પરમાત્મા હિ ભક્તાભીષ્ટવરપ્રદઃ ॥ ૩૭॥

વિદ્યાતપોવ્રતધરાનસૃજઃ પ્રથમં દ્વિજા ।
આત્મતત્ત્વં સમાવેત્તું મુખતઃ પરમેશ્વરઃ ॥ ૩૮॥

સર્વાપદ્ભ્યઃ પાલયિતા ગોપતિસ્તુ પશૂનિવ ।
ગૃહીતદણ્ડો દુષ્ટાંસ્તાન્ મર્યાદાપરિપાલકઃ ॥ ૩૯॥

મયા દુરુક્તવિશિખૈઃ પ્રવિદ્ધઃ પરમેશ્વરઃ ।
અમરાનતિદીનાશાન્ મદનુગ્રહકારકઃ ॥ ૪૦॥

સ ભવાન્ ભગવાન્ શમ્ભો દીનબન્ધો પરાત્પરઃ ।
સ્વકૃતેન મહાર્હેણ સન્તુષ્ટો ભક્તવત્સલ ॥ ૪૧॥

બ્રહ્મોવાચ ।
ઇતિ સ્તુત્વા મહેશાનં શઙ્કરં લોકશઙ્કરમ્ ।
પ્રજાપતિર્વિનીતાત્મા વિરરામ મહાપ્રભુમ્ ॥ ૪૨॥

અથ વિષ્ણુઃ પ્રસન્નાત્મા તુષ્ટાવ વૃષભધ્વજમ્ ।
બાષ્પગદ્ગદયા વાણ્યા સુપ્રણમ્ય કૃતાઞ્જલિઃ ॥ ૪૩॥

વિષ્ણુરુવાચ ।
મહાદેવ મહેશાન લોકાનુગ્રહકારક ।
પરબ્રહ્મ પરાત્મા ત્વં દીનબન્ધો દયાનિધે ॥ ૪૪॥

સર્વવ્યાપી સ્વૈરવર્તી વેદવેદ્યયશાઃ પ્રભો ।
અનુગ્રહઃ કૃતસ્તેન કૃતાશ્ચાસુકૃતા વયમ્ ॥ ૪૫॥

દક્ષોઽયં મમ ભક્તસ્ત્વાં યન્નિનિન્દ ખલઃ પુરા ।
તત્ ક્ષન્તવ્યં મહેશાદ્ય નિર્વિકારો યતો ભવાન્ ॥ ૪૬॥

કૃતો મયાપરાધોઽપિ તવ શઙ્કર મૌઢ્યતઃ ।
ત્વદ્ગણેન કૃતં યુદ્ધં વીરભદ્રેણ પક્ષતઃ ॥ ૪૭॥

ત્વં મે સ્વામી પરબ્રહ્મ દાસોઽહં તે સદાશિવ ।

પોષ્યશ્ચાપિ સદા તે હિ સર્વેષાં ત્વં પિતા યતઃ ॥ ૪૮॥

બ્રહ્મોવાચ ।
દેવદેવ મહાદેવ કરુણાસાગર પ્રભો ।
સ્વતન્ત્રઃ પરમાત્મા ત્વં પરમેશોઽદ્વયોઽવ્યયઃ ॥ ૪૯॥

મમ પુત્રોપરિ કૃતો દેવાનુગ્રહ ઈશ્વર ।
સ્વાપમાનમગણયન્ દક્ષયજ્ઞં સમુદ્ધર ॥ ૫૦॥

પ્રસન્નો ભવ દેવેશ સર્વશાપાન્નિરાકુરુ ।
સબોધઃ પ્રેરકસ્ત્વં મે ત્વમેવ વિનિવારકઃ ॥ ૫૧॥

ઇતિ સ્તુત્વા મહેશાનં પરમં ચ મહામુને ।
કૃતાઞ્જલિપુટો ભૂત્વા વિનમ્રીકૃતમસ્તકઃ ॥ ૫૨॥

અથ શક્રાદયો દેવા લોકપાલાઃ સુચેતસઃ ।
તુષ્ટુવુઃ શઙ્કરં દેવં પ્રસન્નમુખપઙ્કજમ્ ॥ ૫૩॥

તતઃ પ્રસન્નમનસઃ સર્વે દેવાસ્તથા પરે ।
સિદ્ધર્ષયઃ પ્રજેશાશ્ચ તુષ્ટુવુઃ શઙ્કરં મુદા ॥ ૫૪॥

તથોપદેવનાગાશ્ચ સદસ્યા બ્રાહ્મણાસ્તથા ।
પ્રણમ્ય પરયા ભક્ત્યા તુષ્ટુવુશ્ચ પૃથક્ પૃથક્ ॥ ૫૫॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે દક્ષદુઃખનિરાકરણવર્ણનં નામ દ્વિચત્વારિંશોઽધ્યાયઃ ॥ ૨.૨.૪૨॥

॥ શ્રીગણેશાય નમઃ ॥
॥ શ્રીગૌરીશઙ્કરાભ્યાં નમઃ ॥
॥ શ્રીશિવમહાપુરાણમ્ ॥
॥ દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડે

## ૨.૨.૪૩. ત્રિચત્વારિંશોઽધ્યાયઃ । દક્ષયજ્ઞાનુસન્ધાનમ્ ।

બ્રહ્મોવાચ ।
ઇતિ સ્તુતો રમેશેન મયા ચૈવ સુરર્ષિભિઃ ।
તથાન્યૈશ્ચ મહાદેવઃ પ્રસન્નઃ સમ્બભૂવ હ ॥ ૧॥

અથ શમ્ભુઃ કૃપાદૃષ્ટ્યા સર્વાન્ ઋષિસુરાદિકાન્ ।

બ્રહ્મવિષ્ણૂ સમાધાય દક્ષમેતદુવાચ હ ॥ ૨॥

મહાદેવ ઉવાચ ।
શ઼ૃણુ દક્ષ પ્રવક્ષ્યામિ પ્રસન્નોઽસ્મિ પ્રજાપતે ।
ભક્તાધીનઃ સદાહં વૈ સ્વતન્ત્રોઽપ્યખિલેશ્વરઃ ॥ ૩॥

ચતુર્વિધા ભજન્તે માં જનાઃ સુકૃતિનઃ સદા ।
ઉત્તરોત્તરતઃ શ્રેષ્ઠાસ્તેષાં દક્ષ પ્રજાપતે ॥ ૪॥

આર્તો જિજ્ઞાસુરર્થાર્થી જ્ઞાની ચૈવ ચતુર્થકઃ ।
પૂર્વે ત્રયશ્ચ સામાન્યાશ્ચતુર્થો હિ વિશિષ્યતે ॥ ૫॥

તત્ર જ્ઞાની પ્રિયતરો મમ રૂપં ચ સ સ્મૃતઃ ।
તસ્માત્પ્રિયતરો નાન્યઃ સત્યં સત્યં વદામ્યહમ્ ॥ ૬॥

જ્ઞાનગમ્યોઽહમાત્મજ્ઞો વેદાન્તશ્રુતિપારગૈઃ ।
વિના જ્ઞાનેન માં પ્રાપ્તું યતન્તે ચાલ્પબુદ્ધયઃ ॥ ૭॥

ન વેદૈશ્ચ ન યજ્ઞૈશ્ચ ન દાનૈસ્તપસા ક્વચિત્ ।
ન શક્નુવન્તિ માં પ્રાપ્તું મૂઢાઃ કર્મવશા નરાઃ ॥ ૮॥

કેવલં કર્મણા ત્વં સ્મ સંસારં તર્તુમિચ્છસિ ।
અત એવાભવં રુષ્ટો યજ્ઞવિધ્વંસકારકઃ ॥ ૯॥

ઇતઃ પ્રભૃતિ ભો દક્ષ મત્વા માં પરમેશ્વરમ્ ।
બુદ્ધ્યા જ્ઞાનપરો ભૂત્વા કુરુ કર્મ સમાહિતઃ ॥ ૧૦॥

અન્યચ્ચ શ઼ૃણુ સદ્બુદ્ધ્યા વચનં મે પ્રજાપતે ।
વચ્મિ ગુહ્યં ધર્મહેતોઃ સગુણત્વેઽપ્યહં તવ ॥ ૧૧॥

અહં બ્રહ્મા ચ વિષ્ણુશ્ચ જગતઃ કારણં પરમ્ ।
આત્મેશ્વર ઉપદ્રષ્ટા સ્વયન્દૃગવિશેષણઃ ॥ ૧૨॥

આત્મમાયાં સમાવિશ્ય સોઽહં ગુણમયીં મુને ।
સૃજન્ રક્ષન્હરન્વિશ્વં દધે સંજ્ઞાઃ ક્રિયોચિતાઃ ॥ ૧૩॥

અદ્વિતીયે પરે તસ્મિન્ બ્રહ્મણ્યાત્મનિ કેવલે ।
અજ્ઞઃ પશ્યતિ ભેદેન ભૂતાનિ બ્રહ્મ ચેશ્વરમ્ ॥ ૧૪॥

શિરઃકરાદિસ્વાઙ્ગેષુ કુરુતે ન યથા પુમાન્ ।
પારક્યશેમુષીં ક્વાપિ ભૂતેષ્વેવં હિ મત્પરઃ ॥ ૧૫॥

સર્વભૂતાત્મનામેકભાવનાં યો ન પશ્યતિ ।
ત્રિસુરાણાં ભિદાં દક્ષ સ શાન્તિમધિગચ્છતિ ॥ ૧૬॥

યઃ કરોતિ ત્રિદેવેષુ ભેદબુદ્ધિં નરાધમઃ ।
નરકે સ વસેન્નૂનં યાવદાચન્દ્રતારકમ્ ॥ ૧૭॥

મત્પરઃ પૂજયેદ્દેવાન્ સર્વાનપિ વિચક્ષણઃ ।
સ જ્ઞાનં લભતે યેન મુક્તિર્ભવતિ શાશ્વતી ॥ ૧૮॥

વિધિભક્તિં વિના નૈવ ભક્તિર્ભવતિ વૈષ્ણવી ।
વિષ્ણુભક્તિં વિના મે ન ભક્તિઃ ક્વાપિ પ્રજાયતે ॥ ૧૯॥

ઇત્યુક્ત્વા શઙ્કરઃ સ્વામી સર્વેષાં પરમેશ્વરઃ ।
સર્વેષાં શ ૃણ્વતાં તત્રોવાચ વાણીં કૃપાકરઃ ॥ ૨૦॥

હરિભક્તો હિ માં નિન્દેત્તથા શૈવો ભવેદ્યદિ ।
તયોઃ શાપા ભવેયુસ્તે તત્ત્વપ્રાપ્તિર્ભવેન્ન હિ ॥ ૨૧॥

બ્રહ્મોવાચ ।
ઇત્યાકર્ણ્ય મહેશસ્ય વચનં સુખકારકમ્ ।
જહર્ષુઃ સકલાસ્તત્ર સુરમુન્યાદયો મુને ॥ ૨૨॥

દક્ષોઽભવન્મહાપ્રીત્યા શિવભક્તિરતસ્તદા ।
સકુટુમ્બઃ સુરાદ્યાસ્તે શિવં મત્વાખિલેશ્વરમ્ ॥ ૨૩॥

યથા યેન કૃતા શમ્ભોઃ સંસ્તુતિઃ પરમાત્મનઃ ।
તથા તસ્મૈ વરો દત્તઃ શમ્ભુના તુષ્ટચેતસા ॥ ૨૪॥

જ્ઞપ્તઃ શિવેનાશુ દક્ષઃ શિવભક્તઃ પ્રસન્નધીઃ ।
યજ્ઞં ચકાર સમ્પૂર્ણં શિવાનુગ્રહતો મુને ॥ ૨૫॥

દદૌ ભાગાન્સુરેભ્યો હિ પૂર્ણભાગં શિવાય સઃ ।
દાનં દદૌ દ્વિજેભ્યશ્ચ પ્રાપ્તઃ શમ્ભોરનુગ્રહઃ ॥ ૨૬॥

અથ દેવસ્ય સુમહત્તત્કર્મ વિધિપૂર્વકમ્ ।
દક્ષઃ સમાપ્ય વિધિવત્સહર્ત્વિગ્ભિઃ પ્રજાપતિઃ ॥ ૨૭॥

એવં દક્ષમખઃ પૂર્ણોઽભવત્તત્ર મુનીશ્વર ।
શઙ્કરસ્ય પ્રસાદેન પરબ્રહ્મસ્વરૂપિણઃ ॥ ૨૮॥

અથ દેવર્ષયઃ સર્વે શંસન્તઃ શાઙ્કરં યશઃ ।
સ્વધામાનિ યયુસ્તુષ્ટાઃ પરેઽપિ સુખતસ્તદા ॥ ૨૯॥

અહં વિષ્ણુશ્ચ સુપ્રીતાવપિ સ્વં સ્વં પરં મુદા ।
ગાયન્તૌ સુયશઃ શમ્ભોઃ સર્વમઙ્ગલદં સદા ॥ ૩૦॥

દક્ષસમ્માનિતઃ પ્રીત્યા મહાદેવોઽપિ સદ્ગતિઃ ।
કૈલાસં સ યયૌ શૈલં સુપ્રીતઃ સગણો નિજમ્ ॥ ૩૧॥

આગત્ય સ્વગિરિં શમ્ભુઃ સસ્માર સ્વપ્રિયાં સતીમ્ ।
ગણેભ્યઃ કથયામાસ પ્રધાનેભ્યશ્ચ તત્કથામ્ ॥ ૩૨॥

કાલં નિનાય વિજ્ઞાની બહુ તચ્ચરિતં વદન્ ।
લૌકિકીં ગતિમાશ્રિત્ય દર્શયન્ કામિતાં પ્રભુઃ ॥ ૩૩॥

નાનીતિકારકઃ સ્વામી પરબ્રહ્મ સતાં ગતિઃ ।
તસ્ય મોહઃ ક્વ વા શોકઃ ક્વ વિકારઃ પરો મુને ॥ ૩૪॥

અહં વિષ્ણુશ્ચ જાનીવસ્તદ્ભેદં ન કદાચન ।
કે પરે મુનયો દેવા માનુષાદ્યાશ્ચ યોગિનઃ ॥ ૩૫॥

મહિમા શાઙ્કરોઽનન્તો દુર્વિજ્ઞેયો મનીષિભિઃ ।
ભક્તજ્ઞાતશ્ચ સદ્ભક્ત્યા તત્પ્રસાદાદ્વિના શ્રમમ્ ॥ ૩૬॥

એકોઽપિ ન વિકારો હિ શિવસ્ય પરમાત્મનઃ ।
સન્દર્શયતિ લોકેભ્યઃ કૃત્વા તાં તાદૃશીં ગતિમ્ ॥ ૩૭॥

યત્પઠિત્વા ચ સંશ્રુત્ય સર્વલોકસુધીર્મુને ।
લભતે સદ્ગતિં દિવ્યામિહાપિ સુખમુત્તમમ્ ॥ ૩૮॥

ઇત્થં દાક્ષાયણી હિત્વા નિજદેહં સતી પુનઃ ।
જજ્ઞે હિમવતઃ પત્ન્યાં મેનાયામિતિ વિશ્રુતમ્ ॥ ૩૯॥

પુનઃ કૃત્વા તપસ્તત્ર શિવં વવ્રે પતિં ચ સા ।
ગૌરી ભૂત્વાર્ધવામાઙ્ગી લીલાશ્ચક્રેઽદ્ભુતાઃ શિવા ॥ ૪૦॥

ઇત્થં સતીચરિત્રં તે વર્ણિતં પરમાદ્ભુતમ્ ।
ભુક્તિમુક્તિપ્રદં દિવ્યં સર્વકામપ્રદાયકમ્ ॥ ૪૧॥

ઇદમાખ્યાનમનઘં પવિત્રં પરપાવનમ્ ।
સ્વર્ગ્યં યશસ્યમાયુષ્યં પુત્રપૌત્રફલપ્રદમ્ ॥ ૪૨॥

ય ઇદં શ‍ૃણુયાદ્ ભક્ત્યા શ્રાવયેદ્ભક્તિમાન્નરાન્ ।
સર્વકર્મા લભેત્તાત પરત્ર પરમાં ગતિમ્ ॥ ૪૩॥

યઃ પઠેત્પાઠયેદ્વાપિ સમાખ્યાનમિદં શુભમ્ ।
સોઽપિ ભુક્ત્વાખિલાન્ ભોગાનન્તે મોક્ષમવાપ્નુયાત્ ॥ ૪૪॥

ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયાયાં રુદ્રસંહિતાયાં દ્વિતીયે સતીખણ્ડે દક્ષયજ્ઞાનુસન્ધાનવર્ણનં નામ ત્રિચત્વારિંશોઽધ્યાયઃ ॥ ૨.૨.૪૩॥

॥ ઇતિ શ્રીશિવમહાપુરાણે દ્વિતીયરુદ્રસંહિતાયાં દ્વિતીયઃ સતીખણ્ડઃ સમાપ્તઃ ॥ ૨.૨॥

*Shri Shiva Mahapuranam 22 Rudra Samhita SatikhandaH*

pdf was typeset on January 23, 2026

Please send corrections to *sanskrit@cheerful.com*